
भीरूणां भीतिजननं शूराणां हर्षवर्धनम् ।
सुराणां विस्मयकरं दुष्टानां प्रीतिवर्धनम् ।
अदृष्टमश्रुतं कैश्चित्सर्वलोकभयंकरम् ।

32 ^{b}) D4 S शरैश्चावारयत्प्रभु. — ^{c}) K1 D4 S साल्वराजो A few MSS नरश्रेष्ठ and °श्रेष्ठ — ^{d}) Ñ1 °दाशु वै D4 S बहुशोभत भारत — After 32, D4 (marg sec m) S ins

1008* विव्याध च तदा भीष्मं वामपार्श्वे स्तनान्तरे ।
त्वरमाणस्त्वराकाले क्षत्रियर्षभसत्तम ।
[(L. 2) G3.6 तदा काले G3 क्षत्रिय भरतर्षभ]

33 ^{a}) S दृष्ट्वा तु भीष्म व्रणित (D4 marg sec m ins this before 33^{a}!) — ^{b}) S राज्ञा (for भीष्मं) Ś1 K1 D4 S साल्वेन — Ñ2 om 33^{cd}–34

34 Ñ2 om 34 (cf v l 33) — ^{b}) Ñ1 D (except D2 4 5) समरे; S पृथिव्या (for संयु°) — ^{cd}) Ś1 K1.2 साल्वं K2 B1 D (except D2 4 5) नराधिप S साल्व स(T1 साधु त)पूजयामासुर्वाग्भिर्नृपतिसत्तमा

35 ^{ab}) Ñ2 D (except D2 4 5) ततो, S तु ता. (G1 तं; G2 तद्) (for तदा) K2 राजन् (for वाच) S (by transp) श्रुत्वा वाच (G1 °चा) — ^{c}) S °नव' साल्व — ^{d}) K2 °ति चाब्रुवन्, K4 S °ति चाभ्रवीत्, Ñ1 °त्यधावत

36 ^{a}) S भीष्मो (for क्रुद्धो) — ^{b}) Dn2 T2 G (except G1.6) यत्रैव — After 36, D4 (marg sec m) ins

1009* तद्वच सारथि. श्रुत्वा यत्र शाल्वस्ततो ययौ ।,
while G1 2 ins

1010* न भेतव्य त्वया सूत तस्मात्साल्वनृपात्मजात् ।
पश्यतस्ते वधिष्यामि साल्वेश पश्य मे बलम् ।
पतेत्त्वयि शर कश्चिन्नाह साल्वस्य शत्रुं ।

37 Before 37, Ñ2 V1 ins वैश° उ° — ^{a}) S तद(T1 (sup lin) 2 G1 4 5 M3 °दा)स्त्र — ^{b}) K0 3 S पार्थिव (for कौर°) — V1 is missing from 37^{cd} up to 1. 127 21^{a}; the MS is wholly ignored up to the end of the lacuna — ^{c}) K1 मृद्नात्, K2 विद्धा., Ñ1 D2 G1.5 M5 मृद्नन्, Ñ3 B6 हत्वा, T1 विध्वा. — ^{d}) K0 3 Ñ3 Da1 नराधिप Ś1 K1 शा(K1 सा)ल्वराजो नराधिप (K1 नरर्षभ), Ñ1 2 B Dn D1.2 4 5 शाल्वराजस्य भूपते (B3 D4 °ते°, D2 °ति), S साल्वराजस्य पार्थिव° (G2 4 5 पार्थिव, M3 भारत)

38 ^{b}) K0 Ñ1 2 B Dn D1 2 4 शाल्वराजस्य. S भीष्म स्तस्य परतप. — ^{c}) S ततो Ś1 K0 2 B3 Da D2 °शार्दूल. — ^{d}) S न्यहनत्तस्य — After 38^{cd}, G1 ins

1011* अर्धचन्द्रेण बाणेन धनुश्चिच्छेद जह्नुज ।

— M3 om. 38^{ef}–39, T2 reads 38^{e}–39^{b} in marg — ^{e}) Ś1 चानलेनैव; K Ñ1 3 D5 चास्य शैलेन (K1 चाप्यथान्येन), Ñ2 B1m Dn D1 चास्त्रा(B1m °प्य)थैन्द्रेण; S (M3 om) चास्य साल्वस्य — ^{f}) S (M3 om) न्यहनत्. — D4 (marg) S (T2 marg) ins. after 38 (M3, after 38^{cd})

1012* साल्वस्तु विरथो राजन्हताश्वो हतसारथि ।
निक्षिप्य च धनु श्रीमान्भूमौ तिष्ठदवाङ्मुख ।

39 M3 om 39^{ab} (cf v l. 38) — ^{a}) Da D2 4 5 T G नरश्रेष्ठो, M (M3 om) विजित्यैन D2 reads 39^{cdef} in marg — ^{cd}) Da नृपसत्तम° T G M6–8 विसर्जयामास नृप जीवत तं नरा(M6–8 जना)धिप ; M3.5 तर्जयामास नृपतिं स जीवत नराधिप (M6 °प) — T1 G1 2 M read 41 after 39^{cd}, G3–6, after 39^{ef} — ^{ef}) S साल्वोपि राजा स्व राष्ट्र सप्राप्तो नचिरादिव — After 39, N (D2 marg sec m) ins

1013* स्वराज्यमन्वशाच्चैव धर्मेण नृपतिस्तदा ।

C 1. 4124
B 1. 102. 51
K 1. 106. 53

राजानो ये च तत्रासन्स्वयंवरदिदृक्षवः ।
स्वान्येव तेऽपि राष्ट्राणि जग्मुः परपुरंजय ॥ ४०
एवं विजित्य ताः कन्या भीष्मः प्रहरतां वरः ।
प्रययौ हास्तिनपुरं यत्र राजा स कौरवः ॥ ४१
सोऽचिरेणैव कालेन अत्यक्रामन्नराधिप ।
वनानि सरितश्चैव शैलांश्च विविधद्रुमान् ॥ ४२
अक्षतः क्षपयित्वारीन्संख्येऽसंख्येयविक्रमः ।
आनयामास काश्यस्य सुताः सागरगासुतः ॥ ४३
स्नुषा इव स धर्मात्मा भगिन्य इव चानुजाः ।
यथा दुहितरश्चैव प्रतिगृह्य ययौ कुरून् ॥ ४४
ताः सर्वा गुणसंपन्ना भ्राता भ्रात्रे यवीयसे ।
भीष्मो विचित्रवीर्याय प्रददौ विक्रमाहृताः ॥ ४५
सतां धर्मेण धर्मज्ञः कृत्वा कर्मातिमानुषम् ।
भ्रातुर्विचित्रवीर्यस्य विवाहायोपचक्रमे ।
सत्यवत्या सह मिथः कृत्वा निश्चयमात्मवान् ॥ ४६
विवाहं कारयिष्यन्तं भीष्मं काशिपतेः सुता ।
ज्येष्ठा तासामिदं वाक्यमब्रवीद्ध सती तदा ॥ ४७
मया सौभपतिः पूर्वं मनसाभिवृतः पतिः ।

---

40 [a]) S तत्र ये चासन् (by transp.). — D1 reads 40[c]-41[b] after 42[ab]. — [c]) S तेपि स्वान्येव (by transp.). — [d]) K3 Ñ1.2 B1 Dn °पुरजया. S हृतशेषा प्रचक्रमु. — After 40, S ins.:

1014* ते वनानि च रम्याणि शैलांश्च सरितस्तथा ।
अतिक्रम्य च राजानः स्वं स्वं राज्यं प्रचक्रमुः ।
भीष्मः स्वयंवरे कन्या विजित्य कुरुसत्तम ।

[With line 1 of 42[cd]. — (L. 2) = Line 2 of 1016*.]

41 For the position of 41 in S cf. v. l. 39. — [a]) S ततो (for एवं). G3 निर्जित्य. — [b]) S तिस्रो रूपगुणान्विता (M6-8 ययौ शांतनवस्तदा). — After 41[ab], G1 ins.:

1015* निहत्याजौ नृपान्सर्वांश्चित्वा(?) द्विजानन्य सैनिकान् ।
यशः कीर्तिं बलं धैर्यं नृपाणामपहृत्य च ।

— [c]) B D5.6 प्रयातो. A few MSS. हस्तिन°. M6-8 कुरुक्षेत्रं पुण्यतम (cf. 1016*). — After 41[c], S (except T2 M6-8; G1 om. line 2) ins.:

1016* भीष्मः शांतनवस्तदा ।
अतिक्रम्य च राजानः स्वं स्वं राज्यं प्रचक्रमुः ।
कुरुक्षेत्रं पुण्यतमं

[(L. 2) = Line 2 of 1014*.]

— [d]) M6-8 राजसः (sic) कौरव. — After 41, N ins.:

1017* विचित्रवीर्यो धर्मात्मा प्रशास्ति वसुधामिमाम् ।
यथा पितास्य कौरव्य शंतनुर्नृपसत्तम ।

42 S reads 42[c]-43[b] before 42[ab]. — [a]) B D5.6 M2.3 अचिरेणैव. — [b]) Ś1 K D स्वभ्यक्रा°; Ñ2 त्वभ्यक्रा°; B D5 सोभ्यक्रा°; D1 त्वत्यक्राम; D2 सोभ्यक्रा°; T G अतिक्रम्य. Ś1 K1.2 Ñ1 B1 Dn1 D5 T G °धिप; K0.3.4 Ñ3 °धिपा. M समतिक्रम्य बुद्धिमान्. — After 42[ab], D1 reads 40[c]-41[b]. — [c]) S चापि (M2 शैलान्) (for चैव). — [d]) M6 सरांसि (for शैलां°). Ś1 K3.4 B3.5 D1 T G (except G1) M2 विविधद्रु°. D5 शैलाश्नानाविधद्रु°.

43 = (var.) 1002* (q. v.). For sequence of S of v. l. 42. Dn1 om. 43. — [a]) T2 G3.4.5 क्षपयित्वा. Ñ1.2 D2 (m as in text) °त्वा तान्; M2.3 °त्वान्यान्; M6-8 °त्वारिं. — [b]) K0.3 S तानसंख्येयवि° (M6-8 असंख्येयपराक्रम).

44 [a]) Ñ सुता इव. S सा स्नुषा इव ध°. — [b]) Ñ1.2 D (except D1.2) भगिनीरिव. S भगिनीरनुजा इव. — Ñ1.2 om. 44[cd]. — [c]) Ñ3 स्नुषा इव च गांगेय; S (except T1) यथावद् (T2 पा, M6-8 च) दुहितृश्चैव (M3.4 पिता यथैव दुहितृ). — [d]) K4 Ñ3 B1 D (except D2.4.5) परिगृह्य. K0 °गृह्यायौ. B3.6 D5 नृप; B5 D2 नृप (for कुरून्). T1 G1.2.6 M प्रगृह्य प्रययौ कु°; T2 G3.4.5 °गृह्य कुरून्ययौ. — After 44, S reads 46[ab] for the first time (v. l. स सु for सतां). — After 44, N ins.:

1018* आनिन्ये स महाबाहुर्भ्रातुः प्रियचिकीर्षया ।
[Ñ3 B D5.6 रथमारोप्य (for स महा°).]

45 [a]) Ś1 सर्वास्ता (by transp.). K3.4 Ñ B D (except Dn) T2 G (except G3.6) M2 सर्वगुण°. — [d]) Ś1 K1 °भाजिता. S विक्रम्य मुदितो ददौ.

46 S repeats here 46[ab] (cf. v. l. 44). — [a]) K4 स त, Ñ B1 स तद्; Dn D1 एव; D5.6 (by corr.) S स तु; D2 ततो (for सतां). — [b]) S विधिदृष्टेन कर्मणा. — [d]) S (except M2) विवाहमुप°. — [e]) K3 सह रह. S °वत्या समीपेषु (M3.4 तु; M6-8 च).

47 [d]) S °वीद्वचनसद्धि°.

48 [a]) Ś1 K0 [s]नौ नृपति; K1 नृपति° (sic), S राज्ञपति. — [b]) Ś1 Ñ1 पितुः K1 पि; Ñ2 B1.2 D (except

तेन चास्मि वृता पूर्वमेष कामश्च मे पितुः ॥ ४८
मया वरयितव्योऽभूच्छाल्वस्तस्मिन्स्वयंवरे ।
एतद्विज्ञाय धर्मज्ञ ततस्त्वं धर्ममाचर ॥ ४९
एवमुक्तस्तया भीष्मः कन्यया विप्रसंसदि ।
चिन्तामभ्यगमद्वीरो युक्तां तस्यैव कर्मणः ॥ ५०
स विनिश्चित्य धर्मज्ञो ब्राह्मणैर्वेदपारगैः ।
अनुजज्ञे तदा ज्येष्ठामम्बां काशिपतेः सुताम् ॥ ५१
अम्बिकाम्बालिके भार्ये प्रादाद्भ्रात्रे यवीयसे ।
भीष्मो विचित्रवीर्याय विधिदृष्टेन कर्मणा ॥ ५२
तयोः पाणिं गृहीत्वा स रूपयौवनदर्पितः ।
विचित्रवीर्यो धर्मात्मा कामात्मा समपद्यत ॥ ५३
ते चापि बृहती श्यामे नीलकुञ्चितमूर्धजे ।
रक्ततुङ्गनखोपेते पीनश्रोणिपयोधरे ॥ ५४
आत्मनः प्रतिरूपोऽसौ लब्धः पतिरिति स्थिते ।
विचित्रवीर्यं कल्याणं पूजयामासतुस्तु ते ॥ ५५
स चाश्विरूपसदृशो देवसत्त्वपराक्रमः ।
सर्वासामेव नारीणां चित्तप्रमथनोऽभवत् ॥ ५६
ताभ्यां सह समाः सप्त विहरन्पृथिवीपतिः ।
विचित्रवीर्यस्तरुणो यक्ष्माणं समपद्यत ॥ ५७
सुहृदां यतमानानामाप्तैः सह चिकित्सकैः ।

C. 1 4143
B. 1 102 71
K. 1 111 7

D2 4) T1 G6 हि, G2 पि, M6 तु (for मि) — c) S राजन् (for पूर्वम्) — d) S तथा (for एष) K0 °म. पितुर्मम

49 a) K3 °तव्योसौ — b) K1 S साल्व° D5 तत्र, G3 राज (for तस्मिन्) — d) B Dn D1 4 S धर्मतस्त्व (Dn D1.4 M8 °तत्व) समाचर (T1 तन्मा तत्व त्वकुमर्हसि, G1 धर्मात त्व समा°)

50 Before 50, S (except M6) ins वैश° — a) Ñ3 B3 D5 T2 M6-8 तदा, T1 G M8 5 तथा (for तया) — c) B1 M (except M5) °गमद्वीरो — d) T1 ता स्वैरकर्मण — After 50, D4 (marg) S (M6-8 om lines 2-3, M8 5 ins them after 51^{ab}) ins

1019* अन्यासक्ता त्विय कन्या ज्येष्ठा क्षात्रे मया जिता।
वाचा दत्ता मनोदत्ता कृतमङ्गलवाचना।
निर्दिष्टा तु परस्यैव सा त्याज्या परचिन्तनी।
इत्युक्त्वा चानुमान्यैव भ्रातरं स्ववशानुगम्।

[(L 1) T2 G4 5 (all m as in text) M6-8 अन्यस° T1 G3 M क्षत्रे (M7 क्षेत्रे), G1 त्वया, G3 4.5 भवा (for क्षात्रे) — (L 2) M3 5 या तु (for कृत-) D4 G3 m °मगलकौतुका, T2 °कौतुकमगला — (L 3) G3 4 (m as in text) वरस्यैव D4 G1 3 4 m 5 m 6 M? 5 सा वर्ज्या — (L 4) T2 चानुमन्यैव M8 °वरानुग]

51 a) Ñ1.2 D (except D2.4 5) विनिश्चित्य स (by transp) K Ñ D2 धर्मज्ञैर्; S तै सार्धं — b) Ñ Da S (except M8) धर्मकोविदै (for वेद°) — After 51^{ab}, M3 5 ins lines 2-3 of 1019* (of v l. 50) — c) K2 S (except G3) ततो (for °दा)

52 b) Ś1 भ्रात्रे प्रादाद् (by transp), G (except G3 6) भ्राता भ्रात्रे

53 a) Ñ B D (except Da1 D5) तयो पाणी; M (by transp) पाणिं तयो Ñ2 Dn M3 तु, T2 G1 2 4 5 [ऽ]सौ (for स) — b) K4 D4 °गर्वित — After 53c, D4 (suppl fol sec m) S ins a passage of 129 lines given in App I (No 55) and *repeats* 53^{abc} *thereafter* — Ñ3 om 53^{cd}

54 a) K3.4 ते चैव D2 युवती (for बृह°) Ś1 K0-2 D5 ते बृहत्यौ (Ś1 °हती) तथा (K2 तदा) श्यामे, S ते चापि वनि(M6-8 वदि)ते श्लाघ्ये — c) S (except M8) °नखे (T1 G2 °नख) श्यामे

55 a) Ś1 K1 आत्मन प्रतिमोसौ नौ (K1 वा), D5 °रूपा वै, S आत्मरूपानुरूपो नौ (T G1 4 M8 5 सौ) (G3 आत्मानुरूपरूपोसौ) — b) T2 G1 4 6 M3 स्म ते; G2 5 स्तृ° (for स्थि°) — c) K1 कल्याण्यै, Ñ2 3 B D (except D5) °ण्यौ, T1 तुल्यासा — d) K2 तत, K4 Ñ2 B1 D शुभे (D2 तदा, marg corr to इति, D4 as in text), T1 च ते (for तु ते) M ते ततोभिरतेप्सु(M3 5 °ते ह्यु)मे — After 55, T G (except G5) ins

1020* अन्योन्य प्रीतिसक्ते च एकभावाविव स्थिते।

[T1 °भावाविति; T2 °भावे इव, G1 °भावादव; G2 °भावादिव]

56 a) K0 पतिश्च रूप°, Ñ1 तथाश्वरूप°; Ñ3 °श्विसदृशो रूपे, M गधर्वरूपोपेतियुवा — b) Ś1 K B5 Dn D1 5 देवतुल्य°, G2 देव सत्व°, M3 °सर्प° — d) B1 D (except D2 5) M6-8 °थनो रह

57 a) K2 S समास(T1 M °सु)क्तो, B3 5 6 D2 4 महाराजो — b) M विहृत्य (for °हरन्) T G नान्य चेतसा (for पृथि°) — c) M स्त्रीसक्तस्तरुणो राजा — d) Ñ1 3 B Dn D1.2 4 M यक्ष्मणा Ñ1.2 Da प्रत्य°,

56

C. 1. 4143 B. 1. 22. 71 K. 1. 111. 7

जगामास्तमिवादित्यः कौरव्यो यमसादनम् ॥ ५८
प्रेतकार्याणि सर्वाणि तस्य सम्यगकारयत् ।
राज्ञो विचित्रवीर्यस्य सत्यवत्या मते स्थितः ।
ऋत्विग्भिः सहितो भीष्मः सर्वैश्च कुरुपुंगवैः ॥ ५९

इति श्रीमहाभारते आदिपर्वणि षण्णवतितमोऽध्यायः ॥ ९६ ॥

९७

वैशंपायन उवाच ।
ततः सत्यवती दीना कृपणा पुत्रगृद्धिनी ।
पुत्रस्य कृत्वा कार्याणि स्नुषाभ्यां सह भारत ॥ १
धर्मं च पितृवंशं च मातृवंशं च मानिनी ।
प्रसमीक्ष्य महाभागा गाङ्गेयं वाक्यमब्रवीत् ॥ २
शंतनोर्धर्मनित्यस्य कौरव्यस्य यशस्विनः ।
त्वयि पिण्डश्च कीर्तिश्च संतानं च प्रतिष्ठितम् ॥ ३
यथा कर्म शुभं कृत्वा स्वर्गोपगमनं ध्रुवम् ।
यथा चायुर्ध्रुवं सत्ये त्वयि धर्मस्तथा ध्रुवः ॥ ४
वेत्थ धर्मांश्च धर्मज्ञ समासेनेतरेण च ।

B Dn D3 4 °गृध्नत

58 After 58, N (except Ñ3) ins

1021* धर्मात्मा स तु गाङ्गेयश्चिन्ताशोकपरायणः ।

59 ab) S तस्य प्रेतस्य कार्याणि भीष्मः सर्वाण्यकारयत् — b) =1. 95. 5d, 96. 1d — c) M6-8 भीष्मो वि°. — e) K0 विद्वद्भिः M6-8 °तो धीमान् T1 ऋत्विक्पुरोहितैर्भीष्म — f) K4 मुनि°; Ñ3 S °जाँगैः°

Colophon om in S — *Sub-parvan* K0 2 Ñ1 3 V1 B3 संभव — *Adhy name* K0 3. 4 विचित्रवीर्यविपत्ति (K0 °विनाश); Ñ1 आपच (followed by समाप्त); Ñ3 V1 Da Dn D1 विचित्रवीर्योपरम — *Adhy no* (figures words or both) K0 98, B1 100, Da1 99, Dn3 101 — *S'loka no* Ñ3 68, Dn 66 — *Aggregate s'loka no* Dn3 4143

97

1 Ś1 K1 D3 om. उवाच; S om the ref — b) B6 T G1 3 4. 5 °गर्धिनी — cd) Ś1 K1 श्राद्ध- (for कृत्वा) S कृत्वा प्रेतस्य कृत्यानि (T1 M कार्याणि) स्नुषाभ्यां सहिता तदा (M3 सह संगता) — N ins after 1

1022* समाश्वास्य स्नुषे ते च भीष्मं धर्मभृतां परम् ।

[K0 Ñ1 3 Da Dn D1 3 शास्त्रभृतां Ñ3 B D3 4 भर्तृशोकनिपीडिते (for the posterior half).]

S on the other hand ins after 1

1023* माता सत्यवती भीष्ममुवाच वदतां वरम् ।

(cf v 1 2).

2 a) Ñ3 B D4 पतिवंशं च; D3 पतिवंश यदा — b) K (except K1) Ñ1. 3 Da1 D3 भामिनी, Ñ3 B Da2 Dn D1 3 4 भाविनी, T G1-3 M शोभना G6 शोभना परमास्पदा — cd) K3 महाभाग, Ñ3 B1 Da °त्मानं; D5 °भाग Da इदं (for वाक्य) S सत्यवत्यभिसंप्रे(T1 G1 3 °प्र)क्ष्य भीष्मं वचनमब्रवीत् (cf 1023*) — After 2, S ins

1024* दुःखार्दिता तु शोकेन मज्जन्तीव च सागरे ।

3 Before 3, M ins सत्यवती — a) G4 धर्मयुक्तस्य — b) B (except B3) Da2 D3 4 G3 कौरवस्य T G (except G6) महात्मनः — cd) S (except M3) कीर्तिश्च पिंड(G1 3 °डि-; G3 पुण्य)श्च (by transp) Ñ1 धर्मश्च (for कीर्ति°) B (except B6) Da S (except M3. 6-8) संतानश्च प्रतिष्ठित Ś1 त्वयि पिंडश्च संतानकीर्तिश्चैव प्रतिष्ठित — After 3, S ins

1025* भ्राता विचित्रवीर्यस्ते भूतानामन्तमेयिवान् ।

4 b) B3 Da1 M स्वर्गाय; T G स्वर्गं च (for स्वर्गोप°) B3 (m as in text) स्वर्गोपकरण — M6-8 om. 4cd — c) A few MSS वा (for च)

5 a) D3 वेद (for वेत्थ) Ś1 K Da2 D3 वेत्सि धर्मं हि ध°; Da1 सर्वं त्व वेत्सि ध°, S वेत्थ (G1 3 °त्सि) धर्मस्य तत्त्व च (G3 धर्मं च सत्यं च; M3 तत्त्वं च धर्मस्य) — b) Ñ1 3 वा (for च) S सामान्यस्येतर(G3 °स्यैव त)स्य च — c) K0 3 D3 T1 G1 3 6 M3. 5 च; T2 G2 4. 5 M6-8 तु (for त्व) M स्मृतीर् Ñ3 D1 3 वेद — d) K4 Ñ3 D4 वेद T1 धर्मांश्च; T2 G6 शास्त्राणि, G1 दोषश्च (for वेदां°) K3 Ñ1. 3 B D (except D3) वेदांगानि च स°

6 a) S व्यवसाय (G3 °हार) K1 T G1-3 6 M च धर्मेषु; B3. 6 G4 5 च सर्वेषु — b) Ś1 कुलाचारांश्च — D3 om. 6cd

विविधास्त्वं श्रुतीर्वेत्थ वेत्थ वेदांश्च सर्वशः ॥ ५
व्यवस्थानं च ते धर्मे कुलाचारं च लक्षये ।
प्रतिपत्तिं च कृच्छ्रेषु शुक्राङ्गिरसयोरिव ॥ ६
तस्मात्सुभृशमाश्वस्य त्वयि धर्मभृतां वर ।
कार्ये त्वां विनियोक्ष्यामि तच्छ्रुत्वा कर्तुमर्हसि ॥ ७
मम पुत्रस्तव भ्राता वीर्यवान्सुप्रियश्च ते ।
बाल एव गतः स्वर्गमपुत्रः पुरुषर्षभ ॥ ८
इमे महिष्यौ भ्रातुस्ते काशिराजसुते शुभे ।
रूपयौवनसंपन्ने पुत्रकामे च भारत ॥ ९
तयोरुत्पादयापत्यं संतानाय कुलस्य नः ।
मन्नियोगान्महाभाग धर्मं कर्तुमिहार्हसि ॥ १०
राज्ये चैवाभिषिच्यस्व भारताननुशाधि च ।
दारांश्च कुरु धर्मेण मा निमज्जीः पितामहान् ॥ ११
तथोच्यमानो मात्रा च सुहृद्भिश्च परंतपः ।
प्रत्युवाच स धर्मात्मा धर्म्यमेवोत्तरं वचः ॥ १२
असंशयं परो धर्मस्त्वया मातरुदाहृतः ।
त्वमपत्यं प्रति च मे प्रतिज्ञां वेत्थ वै पराम् ॥ १३
जानासि च यथावृत्तं शुल्कहेतोस्त्वदन्तरे ।
स सत्यवति सत्यं ते प्रतिजानाम्यहं पुनः ॥ १४
परित्यजेयं त्रैलोक्यं राज्यं देवेषु वा पुनः ।
यद्वाप्यधिकमेताभ्यां न तु सत्यं कथंचन ॥ १५
त्यजेच्च पृथिवी गन्धमापश्च रसमात्मनः ।
ज्योतिस्तथा त्यजेद्रूपं वायुः स्पर्शगुणं त्यजेत् ॥ १६
प्रभां समुत्सृजेदर्को धूमकेतुस्तथोष्णताम् । C 1 4162 B 1 103.17 K. 1 112.17

---

7 ^{a}) Ñ1.3 सुभृशमाश्वास्य; D5 °माश्वर्यं, S °मैश्वर्यं (M5 परं समाश्वास्य) — ^{c}) Ś1 कार्यस्त्वाद्, K1 काया स्त्वद्- S वक्ष्यामि त्वा यथा प्राज्ञ (G1 °ज्ञा)

8 ^{a}) K0 om. 8^{a} K2 पुत्रश्च ते Ś1 स पुत्रस्तव भ्राता वै — ^{b}) Ñ1 S यवीयान्, Ñ2 Da बलवान् S कुल-वशभृ(T1 °कृ)त् — ^{d}) K1 B3 6 D1 4 G1 3 °र्षभ

9 ^{a}) S तस्य चेमे महिष्यौ द्वे (G6 तस्य देव्यौ भगिन्यौ ते) — ^{b}) K4 D2 T1 G (except G1) M5 उभे (for शुभे) G6 अबिकाबालिके उभे — After 9, S ins

1026* धर्म्यमेतत्पर ज्ञात्वा

[T G (except G3) M3 धर्मं. T1 G1 एत, T2 एव G3 कुलं ज्ञा°]

S completes the line with 10^{b}, which is followed by 10^{a} (see blow)

10 ^{ab}) S read 10^{a} after 10^{b} M5 यतस्व (for कुल°) K2 S (except G1) च (for न) — After 10^{a}, S ins

1027* संतानकुलवर्धनम् ।

[See above T1 G1.3 4 संतान कु°]

— ^{c}) K (except K2) B D महाबाहो — ^{d}) Some S MSS धर्म्यं K2 त्व (for इह)

11 ^{a}) S राजन् (T1 M °ज-) राज्येभि° — ^{b}) K3.4 Ñ3 D2 4 T M (except M5) भरता° K0 2 वै, K4 D2 G5 हि (for च) — ^{c}) S कुरु कौरव्य (G6 कल्याण) — ^{d}) Ś1 D5 मा निमज्जे , S मा त्व हिंसी (G6 धर्मस्ते ह); Cd as in text — After 11, K4 D2 4 (both marg sec m) ins

1028* अग्निहोत्र त्रयो वेदा संतानमपि चाक्षयम् ।
एषा त्रयी तु संप्रोक्ता स्वर्गमोक्षफलप्रदा ।

[Cf. 1 94 60-61 —(L 1) D4 पचानामपि]

12 Before 12, Ñ2 B D (except D5) M3 ins वैश° उ° (M3 om उ°) — ^{a}) Ś1 K (except K0) Ñ B1 Da तु, B3 Dn D1 5 स (for च) — ^{b}) A few MSS परतप — ^{c}) Ñ2 D (except D2 5) इत्युवाच K (except K1) Ñ B1 5 D (except D2) अथ (for स) — ^{d}) K0 Da D5 धर्मं Ś1 K1 उत्तम S धर्ममेव तत परं

13 Before 13, D4 (marg) S ins भीष्म , D4 cont. उवाच — ^{ab}) D5 transp परो धर्म and त्वया मात S मात. प्रकीर्तित — ^{cd}) K4 त्वमपत्य K3 4 Ñ1.2 B वै पुरा — For 13^{cd}, S subst

1029* राज्यार्थे नाभिषिच्येय नोपेयां जातु मैथुनम् ।
भवत्या मतमाज्ञाय कृतमेतद्व्रत मया ।

14 ^{a}) K2 पर वृत्त S जानीषे यत्तदा वृत्त — ^{b}) Ś1 Ñ1 T1 G2 6 M (except M3 5) तदतरे — ^{c}) S सत्येन (for सत्य ते) — ^{d}) Da तत (for पुन) S पुनरेव ब्रवीमि ते

15 B5 (hapl) om 15^{ab} — ^{a}) Ś1 K1 परित्यजामि — ^{b}) G3 देवि (for राज्य) — ^{c}) G2 4–6 -भ्यधिक°, G3 ह्यधिक°

16 ^{b}) M6–8 रसमुत्तम — ^{c}) K2 4 transp तथा and त्यजेत्

17 K4 (hapl) om 17 — ^{b}) T1 G1 3 M अथ (for

C 1. 4172 B 1. 103. 17 K 1. 112. 17

त्यजेच्छब्दं तथाकाशः सोमः शीतांशुतां त्यजेत् ॥ १७
विक्रमं वृत्रहा जह्याद्धर्मं जह्याच्च धर्मराट् ।
न त्वहं सत्यमुत्स्रष्टुं व्यवसेयं कथंचन ॥ १८
एवमुक्ता तु पुत्रेण भूरिद्रविणतेजसा ।
माता सत्यवती भीष्ममुवाच तदनन्तरम् ॥ १९
जानामि ते स्थितिं सत्ये परां सत्यपराक्रम ।
इच्छन्सृजेथास्त्रीँल्लोकानन्यांस्त्वं स्वेन तेजसा ॥ २०
जानामि चैव सत्यं तन्मदर्थं यदभाषथाः ।
आपद्धर्ममवेक्षस्व वह पैतामहीं धुरम् ॥ २१
यथा ते कुलतन्तुश्च धर्मश्च न पराभवेत् ।
सुहृदश्च प्रहृष्येरंस्तथा कुरु परंतप ॥ २२
लालप्यमानां तामेवं कृपणां पुत्रगृद्धिनीम् ।
धर्मादपेतं ब्रुवतीं भीष्मो भूयोऽब्रवीदिदम् ॥ २३
राज्ञि धर्मानवेक्षस्व मा नः सर्वान्व्यनीनशः ।
सत्याच्च्युतिः क्षत्रियस्य न धर्मेषु प्रशस्यते ॥ २४
शंतनोरपि संतानं यथा स्यादक्षयं भुवि ।
तत्ते धर्मं प्रवक्ष्यामि क्षात्रं राज्ञि सनातनम् ॥ २५
श्रुत्वा तं प्रतिपद्येथाः प्राज्ञैः सह पुरोहितैः ।
आपद्धर्मार्थकुशलैर्लोकतन्त्रमवेक्ष्य च ॥ २६

इति श्रीमहाभारते आदिपर्वणि सप्तनवतितमोऽध्यायः ॥ ९७ ॥

तथा) Ñ3 Dn1 G6 उष्मता — c) K0 3 Ñ B D (except D5) G6 तथाकाश — d) S (except T2 G5 6) चन्द्र (for सोम) Ñ1 शीत तथा (for शीतां°)

18 a) S transp विक्र° and वृत्र° — d) K1 B3.6 Dn1 D5 G3.6 M6-8 व्यवसेय (K1 °य, M6 °ह) — After 18, D5 (marg) S ins

1030* तत्र जात्वन्यथा पार्थ लोकानामपि संक्षये ।
अमरत्वस्य वा हेतोस्त्रैलोक्यमदनस्य वा ।

[(L. 2) T1 °क्यस्य धनस्य, G1 M6-8 °क्यस्य मदस्य]

19 Before 19, D5 (marg) S ins वैश°; D5 cont उवाच — ab) B D3 4 च (for तु) S त(M6-8 अ)थोक्त्वा माता पु° धर्मज्ञेन महात्मना — c) G1 पुत्र (for भीष्म) — d) S पुनरेवाभ्यभाषत (T2 °रेव मवीदिदं; M6 °रेवा मवीद्वच) — After 19, S (except T1 G6 M8 1) read (with v. l.) 21ab for the first time (cf. v. l. 21)

20 T1 G1 6 (? hapl) om 20 Before 20, D5 marg ins सत्यवत्युवाच — ab) K1 सत्यवतां वर S (T1 G1 6 om.) जानामि त्वयि धर्मज्ञ सत्य सत्यवतां वर (M सत्यपराक्रम) — c) G3 त्रैलोक्य; M6-8 (by transp) लोकांस्त्रीन K0 इच्छया सत्यजेल्लोकान् — d) T2 G1 2 4 च (for त्व) Ś1 K1 कर्मणा (for तेज°)

21 T2 G1-3 M6-8 repeat here 21ab (cf. v. l. 19), M7 8 repeat (with v. l.) 21ab consecutively — a) B (except B1) Dn1 n3 D1 G2 चैव; M6-8 चैव K3 4 ते; B1 तु (for तन्) Ś1 K0-2 D5 °मि ते स्थितिं (K1 °ध) सत्ये (K0 धर्मे) S (T2 G1-4 M1-8 all first time, M8 second time) अनुजानामि तत्सर्वं (G1 M1.8 सर्वं सत्; M1-8 सत्यं त) — b) Ś1 K Ñ1 2 D (except D1 4) मदर्थे Ñ1 3 B D (except D2 4 5) यच्च भाषित — c) Ś1 K1.2 °द्धर्ममवेक्ष्यैव; K0 3.4 °मवेक्षेथ (K0 °र्मा); Ñ1 °द्धर्मं त्ववेक्ष्येह; Ñ2 3 D (except D2 4) °द्धर्मं त्वमावेक्ष्य (D5 °क्ष्ये) — d) Ñ2 B D1 4 वहेतां महतीं धुर; D5 मा वहेतां महीं धुर

22 a) D5 न ते कुलस्य ततुश्च; S यथा तु न कुलं चैव — b) S (except G5) लोकश्च — c) S (except T2) सकामा वै (G6 °मास्ते) (for प्रहृ°) — d) S (except T2) तथा त्वं कर्तुमर्हसि — After 22, D5 (marg) S ins:

1031* आत्मनश्च हितं तात प्रियं च मम भारत ।

After the above, S reads an additional colophon *Adhy no* T1 99, T2 49, G M 50 (G5 51)

23 Before 23, D5 (marg) S ins वैश°; D5 cont उ° — a) S तां तु लालप्य(M °प्य)तीं (G2 लोलपतीं) दृष्ट्वा — b) K3 °वर्धिनीं; D2 6 T2 G1 3 °गर्धिनीं — c) Dn1 धर्मापेत ब्रुवतीं तां — d) K (except K1) भूयो भीष्मो (by transp) S भीष्मो वचनमब्रवीत्

24 Before 24, D5 marg ins भीष्म उ° — a) Dn1 राजधर्मान्, S क्षत्रधर्मं — b) M1 सर्वं Ś1 विनेनशः; K1 M6 विनी°, B3m च नीनश; G2 M3 विनाशयः; M7 8 वनी° G3 मा न सर्वान्यनीनश — cd) S धारणेन मतस्तात क्षत्रियां (G1 4 °या; G2 य) परमां (M °म) धृतिं (M1.8 स्थृतिं; M6 धृतीन्; M7 8 धृतीन्)

25 a) T2 G (except G1) M1 सतानो — b) S स्यात्पुनरेव हि — c) Ś1 K1-3 B1 त ते धर्मं, S क्षत्रध°. — d) S क्षत्रियाणां पुरातन

26 a) K0 D3 त्व (for त) Ñ1 B D प्रतिपद्यस्व — c) M (except M1) °द्धर्मेषु कु° — d) Ś1 K1

९८

भीष्म उवाच ।
जामदग्न्येन रामेण पितुर्वधममृष्यता ।
क्रुद्धेन च महाभागे हैहयाधिपतिर्हतः ।
शतानि दश बाहूनां निकृत्तान्यर्जुनस्य वै ॥ १
पुनश्च धनुरादाय महास्त्राणि प्रमुञ्चता ।
निर्दग्धं क्षत्रमसकृद्रथेन जयता महीम् ॥ २
एवमुच्चावचैरस्त्रैर्भार्गवेण महात्मना ।
त्रिःसप्तकृत्वः पृथिवी कृता निःक्षत्रिया पुरा ॥ ३
ततः संभूय सर्वाभिः क्षत्रियाभिः समन्ततः ।
उत्पादितान्यपत्यानि ब्राह्मणैर्नियतात्मभिः ॥ ४
पाणिग्राहस्य तनय इति वेदेषु निश्चितम् ।
धर्मं मनसि संस्थाप्य ब्राह्मणांस्ताः समभ्ययुः ।
लोकेऽप्याचरितो दृष्टः क्षत्रियाणां पुनर्भवः ॥ ५
अथोतथ्य इति ख्यात आसीद्धीमानृषिः पुरा ।
ममता नाम तस्यासीद्भार्या परमसंमता ॥ ६
उतथ्यस्य यवीयांस्तु पुरोधास्त्रिदिवौकसाम् ।
बृहस्पतिर्बृहत्तेजा ममतां सोऽन्वपद्यत ॥ ७
उवाच ममता तं तु देवरं वदतां वरम् ।

C 1 4181
B 1 104 11
K. 1 113 11

लोकधर्मं, Ñ1 °यात्रा; D2 T2 G °तत्व

Colophon om in S — *Sub-parvan* Ko 8 Ñ1 2 V1 B5 सभव — *Adhy name* K3 4 सत्यवतीवाक्य, Ñ1 2 V1 भीष्मसत्यवतीसवाद — *Adhy no* (figures, words or both) Ko 99, Da1 100, Dn3 102, D4 101 — *S'loka no* Dn 26 — *Aggregate s'loka no* Dn2 4169

98

1 K1 T1 G1 M om. उवाच, T2 G2–6 om the ref — *b*) S निशम्य वचन (T1 G1 M3 5 निधन) पितु — After 1*ab*, D4 (marg) S ins

1032* राजा परशुहस्तेन,

completing the line with 1*d*, which is followed by 1*c*. — *c*) D4 (marg) S महाप्राज्ञे (D4 °ज्ञि; T1 °ज्ञैर्) B D (except D5) राजा परशुना पूर्वं — After 1*c*, D4 (marg) S ins

1033* हैहयस्य महात्मन ।
[D4 T1 हैहय°]

— *d*) Ś1 K1 S (except T1 M6–8) हैहया° — Ñ1 8 om 1*ef* — After 1, N (except Ñ1 8) M6–8 read (with v 1) 5*ef*, Dn M6–8 repeating the line in its proper place

2 *b*) Ko Da S (except M8) विमुञ्चता, B5 वियुजता — *c*) S क्षत्रमेकेन (M6–8 क्षत्रियकुल) — *d*) K1 S रामेण ज°

3 *c*) S रोषेण (G1 M6–8 रामेण) (for पृथि°) — *d*) S °या मही — After 3, K4 Ñ2 Dn ins

1034* एव नि क्षत्रिये लोके कृते तेन महर्षिणा ।

4 *a*) D5 सभूय साध्वीभि, S सभूय सभूय (M6–8 च वर्धित क्षत्र) — *b*) Ś1 K D5 ततस्तत (for सम°) — *d*) Ñ2 B D (except D5) °र्वेदपारगै ; S °णेभ्य इति श्रुति

5 *ab*) B5 Da1 D1. 5 G1–5 Cd पाणिग्रहस्य Ko T2 G2 4 5 तनया Ko निश्चय, Ñ3 °श्चय, T2 G3 4 5 °ता: M पाणौ गृहीतु पुत्रेति वेदे विकथित भृश — *d*) B1 m 8 Da2 G1 8 M6–8 ब्राह्मणास्ता — Ñ1. 8 om 5*ef*, N (except Ñ1. 8) M6–8 read 5*ef* after 1, Dn M6–8 repeat it here. — *e*) M5 लोकेप्वाच° N (except Ñ1. 8, but incl Cd) M6–8 (the three latter with Dn for the first time) लोकस्य (K2–4 Da1 Dn °स्या°; D4 लोक आ) चरितो धर्म, T1 लोकोप्याचरता दृष्ट — *f*) Ñ2 B1 m 8 5 Da पुनर्भुवि Dn D1 4 M6–8 (with Dn for the first time) तेनाति किल दुश्चर — After 5, K3 4 Ñ2 B D T2 ins

1035* तत पुन समुदित क्षत्र समभवत्तदा ।
इम चैवात्र वक्ष्येऽहमितिहास पुरातनम् ।

[(L 1) K4 °भवन्महत् — (L. 2) K4 D1 इदं K3 4 चैव तु (K3 चैवात्र) वक्ष्यामि इति°]

6 *a*) S अथोचथ्य (G2 °त्य) — *b*) Ś1 आसीदृषिश्च बुद्धिमान्, S °द्धीमान्महानृपि — *cd*) S भार्या च ममता नाम बभूवास्य महात्मन. Here and below G3 (several times) reads मरता for ममता

7 *a*) S उचथ्यस्य — *b*) S °धा यो दिवौ° — *d*) Ñ1 8 सोम्यप°, Ñ2 B D (except D5) अन्व°, S सोम्यमन्यत (T1 (before corr) G3 M3 (*sup lin*) °नदत) Cd cites अन्वपद्यत (as in text)

8 *b*) Ś1 K D2 5 वरवर्णिनी, B2. 6 °तां वरा. — After

C. 1. 4151
B. 1. 104. 11
K. 1. 110. 11

अन्तर्वत्नी अहं भ्रात्रा ज्येष्ठेनारम्यतामिति ॥ ८
अयं च मे महाभाग कुक्षावेव बृहस्पते ।
औतथ्यो वेदमत्रैव षडङ्गं प्रत्यधीयत ॥ ९
अमोघरेतास्त्वं चापि नूनं भवितुमर्हसि ।
तस्मादेवंगतेऽद्य त्वमुपारमितुमर्हसि ॥ १०
एवमुक्तस्तया सम्यग्बृहत्तेजा बृहस्पतिः ।
कामात्मानं तदात्मानं न शशाक नियच्छितुम् ॥ ११
संबभूव ततः कामी तया सार्धमकामया ।
उत्सृजन्तं तु तं रेतः स गर्भस्थोऽभ्यभाषत ॥ १२
भोस्तात कन्यस वदे द्वयोर्नास्त्यत्र संभवः ।
अमोघशुक्रश्च भवान्पूर्वं चाहमिहागतः ॥ १३
शशाप तं ततः क्रुद्ध एवमुक्तो बृहस्पतिः ।
उतथ्यपुत्रं गर्भस्थं निर्भर्त्स्य भगवानृषिः ॥ १४
यस्मात्त्वमीदृशे काले सर्वभूतेप्सिते सति ।
एवमात्थ वचस्तस्मात्तमो दीर्घं प्रवेक्ष्यसि ॥ १५
स वै दीर्घतमा नाम शापादृषिरजायत ।

8ab, G1 6 M3 ins ममता — c) Ś1 K1 2 °र्वत्नीत्यह, K0 4 Ñ2 B D °र्त्नी त्वह, K3 °त्नी ह्यह; Ñ °र्वत्न्यह; S °र्वत्न्यस्मि ते (G3 त्वह). Ñ1 3 भ्रात्रा, Ñ3 भ्रात, B3 भ्रातु — d) M मिथ (for इति) B3 तव ज्येष्ठस्य धीमत ; D3 °नान्यत्र रम्यता, T1 G1-3 °न रमता मयि

9 a) K0 स्वयमेव (for अयं च मे) Ś1 Ñ1 3 महाभाग ; D3 M6-8 महान्गर्भ — b) Ś1 च मे (for एव) — After 9ab, M6-8 read 12ab — cd) K0 एव; Ñ3 B D (except D3) अपि (for एव) S औतथ्यो गर्भ आधत्ते षडङ्ग वेदमुत्तम

10 b) Ñ3 B D (except D3) द्वयोर्नास्त्यत्र (B1 orig 3 °स्त्येव) संभव (=13b) — c) K4 Ñ1.2 D (except D2 3) °गते त्वद्य (D2 काले); S °गते कार्ये (M6-8 °विधे काले) — d) D2 corrupt, S यथा युक्त तथा कुरु.

11 Before 11, S ins वैश° (M3 भीष्म) — a) Ñ B3 T1 G1 3 M3 तदा; T2 G2 4-6 M6-8 °धा (for °या) — b) Dn D1 बृहस्पतिरुदारधी (=1 71 8d) — c) K3 4 G4 कामात्मा स; Cd as in text S महात्मापि (M3 °न) (for तदा°) — d) D3 निगृहितु S ना(G2.4 5 स्वा; M3 सो)त्मान मो(G3 4 5 M3 ना)भ्यधारयत्

12 a) K3 Ñ Dn D2 स (for सं) M स(M3 5 स)बभूवेव धर्मात्मा — b) Ñ3 सपामया; M बृहस्पति — c) Ñ1.3 T G M3 4 सतेज ; B2.3 6 D1 M6-8 तद्रेत — d) B3 M स गर्भं प्रत्य(M सम)भाषत; D2 स च गर्भोऽभ्यभा°; G3 गर्भस्थो ह्यभ्यभा°

13 Before 13, M ins गर्भ — a) Ś1 K3 4 D2 भो तात Ś1 कन्यसवादे; K1 कनह वदे; K2 एवधा म वदे; K3 4 Ñ3 B D मा गम काम; Ñ1 3 कन्यस मृहि S कनीयसात मैवेह — b) Ñ1 2 D1 Dn D1 इह; K3 एव (for अत्र) K3 B D3 4 5 नास्त्यन्तरमिह द्वयो ; S नभयो विद्यते द्वयो — c) K2.4 Ñ3 B D अल्प(B3 6 D5 °ल्पो)वकाशो भगवन् (K4 गर्भोऽय; D5 स्थानमत); S अमोघशुक्रस्य चापि(G3 चापि) K4 transp 13d and the second half of line 1 of 1036* — d) K4 °स्थित° (for °गत) — After 13, K3 4 Ñ3 B D ins

1036* अमोघरेताश्च भवान्न पीडां कर्तुमर्हति ।
अश्रुत्वैव तु तद्वाक्यं गर्भस्थस्य बृहस्पति ।
जगाम मैथुनायैव ममतां चारुलोचनाम् ।
शुक्रोत्सर्गं ततो बुद्ध्वा तस्या गर्भगतो मुनि ।
पद्भ्यामारोधयन्मार्गं शुक्रस्य च बृहस्पते । [5]
स्थानमप्राप्तमथ तच्छुक्रं प्रतिहतं तदा ।
पपात सहसा भूमौ ततः क्रुद्धो बृहस्पति ।

[(L 1) K4 D5 °शुक्रश्च Dn D1 2 °मर्हसि K3 B (except B1) Dn D4 पीडां कर्तुं न मेऽर्हसि; K4 मा पीडां कुरु मो विभो D3 repeats 13d for the second half — (L 4) K4 स गर्भस्थो महामुनि — (L. 5) K3 4 Ñ3 B D4 5 °न(B1 3 6 °मा)वारय°; Dn °मरोधय°; D3 °मपास्य त° Ñ3 स शुक्रस्य; B3 5 6 D3 4 5 शुक्रस्य स — (L. 6) D3 reads this line in marg sec m K4 अपतद् (for अथ तत्) Dn D1 2 रेत (for शुक्र) B1 3 6 D1 3 तत (for तदा) — (L 7) K3 4 B D3 ततोऽकुप्यद्बृह°]

14 Before 14, T G1 3 6 M6-8 ins वैश° — D3 transp 14ab and 14cd, ins the line स दृष्ट्वा etc between them (see below) — ab) K1 स शशाप. K4 पुन, T2 G3 6 च (for स) K3 Ñ3 B D (for D3 see above) स (K3 Dn1 Dn2 तद्) दृष्ट्वा पतितं शुक्र (K3 भूमौ) शशाप स (K3 by transp स शशाप) रुषान्वित — cd) T G उचथ्य° M पुत्रं भ्रातुरुचथ्यस्य गर्भस्थं भग°

15 Before 15, T1 G1 6 M ins बृहस्पति B3 transp 15 and 16 — a) Ñ3 3 B D (except Dn D5) यस्मात्त्व — b) K1 शुभे (for सति) Ś1 K0 2-4 Ñ1 3 D1.2 5 °भूतहितेप्सिते — c) G3 च तस्मात्त्व; G6 यथा तस्मात — d) K0 3 D3 प्रपत्स्यसे (K0 °से); Ñ1 भवे°; Cd as in text.

16 B3 transp 15 and 16, and transp 16ab and

बृहस्पतेर्बृहत्कीर्तेर्बृहस्पतिरिवौजसा ॥ १६
स पुत्राञ्जनयामास गौतमादीन्महायशाः ।
ऋषेरुतथ्यस्य तदा संतानकुलवृद्धये ॥ १७
लोभमोहाभिभूतास्ते पुत्रास्तं गौतमादयः ।
काष्ठे समुद्गे प्रक्षिप्य गङ्गायां समवासृजन् ॥ १८
न स्यादन्धश्च वृद्धश्च भर्तव्योऽयमिति स्म ते ।
चिन्तयित्वा ततः क्रूराः प्रतिजग्मुरथो गृहान् ॥ १९
सोऽनुस्रोतस्तदा राजन्प्लवमान ऋषिस्ततः ।
जगाम सुबहून्देशानन्धस्तेनोडुपेन ह ॥ २०
तं तु राजा बलिर्नाम सर्वधर्मविशारदः ।
अपश्यन्मज्जनगतः स्रोतसाभ्याशमागतम् ॥ २१
जग्राह चैनं धर्मात्मा बलिः सत्यपराक्रमः ।
ज्ञात्वा चैनं स वव्रेऽथ पुत्रार्थं मनुजर्षभ ॥ २२
संतानार्थं महाभाग भार्यासु मम मानद ।
पुत्रान्धर्मार्थकुशलानुत्पादयितुमर्हसि ॥ २३
एवमुक्तः स तेजस्वी तं तथेत्युक्तवानृषिः ।
तस्मै स राजा स्वां भार्यां सुदेष्णां प्राहिणोत्तदा ॥ २४
अन्धं वृद्धं च तं मत्वा न सा देवी जगाम ह । C 1 4212 B 1 104 46 K 1 113 46

16^{cd} also — ^{a}) S ततो दीर्घं° — B3 om 16^{c}–17^{d} — ^{c}) K (except K1) B5 D2 °त्कीर्तिर्, M °स्तेजा — After 16, Dn D4 (marg) S ins

1037* जात्यन्धो वेदवित्प्राज्ञः पत्नीं लेभे स्वविद्यया ।
तरुणीं रूपसंपन्नां प्रद्वेषीं नाम ब्राह्मणीम् ।;

while K3 ins lines 1–3 of 1038*

17 B3 om 17 (cf v 1 16) S transp 17^{ab} and 17^{cd} — ^{b}) Ś1 सहस्रश (for महा°) — ^{c}) S °रुचथ्यस्य महान् — K3 ins lines 1–3 of the foll passage after 16 and lines 4–8 after 18^{ab} Ñ2 B3 Dn D1.4 ins the passage after 17 K4 B1.5 6 Da D2 5 (om line 4), after 18^{ab}

1038* धर्मात्मा च महात्मा च वेदवेदाङ्गपारग ।
गोधर्मं सौरभेयाच्च सोऽधीत्य निखिलं मुनि ।
प्रावर्तत तथा कर्तुं श्रद्धावांस्तमशङ्कया ।
ततो वितथमर्याद तं दृष्ट्वा मुनिसत्तमा ।
क्रुद्धा मोहाभिभूतास्ते सर्वे तत्राश्रमौकस. । [5]
अहोऽयं भिन्नमर्यादो नाश्रमे वस्तुमर्हति ।
तस्मादेन वयं सर्वे पापात्मान त्यजामहे ।
इत्यन्योन्यं समाभाष्य ते दीर्घतमस मुनिम् ।

[(L 1) After line 1, D4 (suppl fol *sec m*) ins passage No 56 of App I. — (L 4) K4 दृष्ट्वा, B (except B6) D2.4 तथा (for ततो) K4 तमृषिं शसितमतं — (L. 5) K3 क्रोधात्तमोभि°, K4 क्रुद्धात्मानो हि D1 ऋषि मध वनौकस D5 क्रुद्धा धर्ममजानत सूक्ष्म नैश्रेयस पर]
— A passage of 19 lines given in App I (No 56) is ins in Dn (Dn2 om lines 18–19) after 1038*, in D4 (suppl fol *sec m*), after line 1 of the latter interpolation, in S, after 17

18 ^{a}) K1 च, K2 वै, K4 त, B D4 T1 G3 तु (for ते) G2 4.5 °मोहपरीतास्ते — ^{b}) Ś1 K1 2 4 Da2 T1 G3 ते; K0 3 वै (for त) — After 18^{ab}, K4 B1.5 6 Da D2 5 ins 1038*, K3 lines 4–8 of that passage (cf. v. 1 17) — ^{c}) K0–2 समुद्रे, D5 समूहे, S समुद्गे T2 सक्षिप्य K3 4 Ñ2 B D (except D5) वद्धोडुपे परि(B5 विनि)क्षिप्य — ^{d}) K1 तमवा°, G3 समुपा°

19 ^{a}) K0 Dn1 G3 तस्मादधश्च, K2.3 B D2 5 यस्मा°; K4 Ñ2 Da Dn2 n3 D1 4 कस्मा° — ^{b}) B5 Da स्म ह, D6 स्मृते°; T G स्म वै — After 19^{ab}, S ins.

1039* कर्मण्यथ तत क्रूरे तेषा बुद्धिरजायत ।

— ^{c}) Ś1 Da क्रुद्धाः (for क्रूरा) — ^{d}) G3 M6–8 ततो; G6 यथा (for अथो) K0 Da M5 गृह

20 ^{a}) K0 सोमापत तदा Ñ2 B D (except D5) विप्र (for राजन्) — ^{b}) K4 प्लवमान्स K3 ऋषिस्तदा, Ñ2 B D (except D5) यदृच्छया; S मुनिस्तदा — ^{c}) K0. 3 4 D4 स, T2 G (except G3 6) च (for सु) — ^{d}) D5 वहन् (for अन्धस्) K2 तेन प्लवेन; Ñ1 तेनोद्भवेन

21 ^{a}) T2 G (except G1 3) बली — ^{b}) K0 सर्वशास्त्र°, K3 B Dn D1 4 °विदा वर, K4 D2 °भृतां वर° — ^{d}) K0 2 D2 T1 G1.2 6 स्रोतसो° A few MSS °भ्यास°.

22 ^{b}) T2 G (except G1.3) बली — ^{c}) Ś1 चैव; Ñ B1 3 Da2 Dn1.n2 D1 5 चैव. S वर धर्मे — ^{d}) Dn D1 पुत्रार्थी, M °र्थी K3 B1 3 5 D2.4 T1 G3 M (except M5) °जर्षभ , Ñ2 Da °जाधिप (Ñ2 °प), B6 °जेश्वर ; Dn D1 भरतर्षभ (D1 °भ.), G1 3 4–6 °जर्षभं — After 22, D4 (marg) S ins

1040* त पूजयित्वा राजर्षिर्विश्रान्त मुनिमब्रवीत् ।

23 Before 23, D4 (marg) S ins. राजा; D4 cont. उवाच — ^{b}) K2 Ñ3 D5 S (except M6–8) भार्यायां

24 Before 24, D4 (marg) T1 G1 M (except M3) ins भीष्म°; D4 cont उवाच — ^{a}) G1.2 तु (for स). S (except G6) तेनर्षि° (for तेज°) — ^{b}) Ñ तत् (for

स्वां तु धात्रेयिकां तस्मै वृद्धाय प्राहिणोत्तदा ॥ २५
तस्यां काक्षीवदादीन्स शूद्रयोनावृषिर्वशी ।
जनयामास धर्मात्मा पुत्रानेकादशैव तु ॥ २६
काक्षीवदादीन्पुत्रांस्तान्दृष्ट्वा सर्वानधीयतः ।
उवाच तमृषिं राजा ममैत इति वीर्यवान् ॥ २७
नेत्युवाच महर्षिस्तं ममैवैत इति ब्रुवन् ।
शूद्रयोनौ मया हीमे जाताः काक्षीवदादयः ॥ २८
अन्धं वृद्धं च मां मत्वा सुदेष्णा महिषी तव ।
अवमन्य ददौ मूढा शूद्रां धात्रेयिकां हि मे ॥ २९
ततः प्रसादयामास पुनस्तमृषिसत्तमम् ।
बलिः सुदेष्णां भार्यां च तस्मै तां प्राहिणोत्पुनः ॥३०
तां स दीर्घतमाङ्गेषु स्पृष्ट्वा देवीमथाब्रवीत् ।
भविष्यति कुमारस्ते तेजस्वी सत्यवागिति ॥ ३१
तत्राङ्गो नाम राजर्षिः सुदेष्णायामजायत ।
एवमन्ये महेष्वासा ब्राह्मणैः क्षत्रिया भुवि ॥ ३२
जाताः परमधर्मज्ञा वीर्यवन्तो महाबलाः ।
एतच्छ्रुत्वा त्वमप्यत्र मातः कुरु यथेप्सितम् ॥ ३३

इति श्रीमहाभारते आदिपर्वणि अष्टनवतितमोऽध्यायः ॥ ९८ ॥

स) T1 G3-6 तथा; T2 G1 M तदा (for ऋषि) — c) Ñ3 तस्मै स त्वा तदा भार्या

25 Ko 2 (hapl) om 25 — a) G2 विप्र (for वृद्ध) Ś1 K1 G6 तु (for च) S (except G6) त दृष्ट्वा — d) S (except G1 6 M8) तत (M8 sup lin as in text)

26 a) K1 S (except G1) कक्षी°; B1 6 Da1 D1 5 कांक्षी° Ko 2 D2 च (for स) — b) Dn D1 तदा; D2 यशी (for वशी)

27 a) K1 यक्षी°; K4 B2 6 Da1 D1 2 4 5 काक्षी°; S (except M6-8) कक्षी° D4 G6 सर्वांस्तान् — b) D4 दृष्ट्वा पुत्रान्, S सांगान्वेदान् (G2 सांग वेद) Ś1 K1 अधीतिन ; Ko 2 4 D2 S (except G6) अधीयत — After 27cd, S (except G6) ins

1011* श्रुत्वा च तान्वली राजा दृष्ट्वा कक्षीवदादिकान् ।
— c) Ñ1 3 °च वचन — d) Ñ B D (except D2 5) इमे (for एते) Ñ1 2 B1 3 D (except D2 4) इति भारत

28 G3 om 28ab — b) K3 Ñ3 B D4 इमे; K4 पुत्रान् (for एते) K2 D5 ध्रुव (for ब्रुवन्) Ko Ñ1 2 Da Dn D1 2 S (G3 om) ममेम (Ko S °मेत) इति चाब्रवीत् — c) S (except T1) हि मे पुत्रा (for मया हीमे) — d) K3 4 S (except G1) कक्षी°; Da1 D1 2 4 काक्षी°

29 a) K3 B D2, 4 ज्ञात्वा; Ñ Da Dn D1 S दृष्ट्वा (for मत्वा) — c) S (except G6) प्राहिणोदवमानान्मे — d) Ś1 D (except D2 4, 5) मम; T G1-3 M नृप (for हि मे)

30 b) Ś1 transp पुन and स; B (except B1) D2 4 राजा स K5 D1 ऋषिसुत्तम — c) T2 G2 4 5 वशी Ñ2, 3 B1 Da Dn D1 5 स्वां भार्यां; B2, 3 6 D2 4 भार्यां तां (D4 स्वां) — d) Ko Ñ1 3 B (except B1) Dn D1 2 4 तस्मै स; K3 (by transp) तां तस्मै Ko Ñ3 B2, 3 6 T G (except G6) M6-8 तत , B1 Da M8 तदा (for पुन)

31 a) S (except G6) अंगे (T2 G3-6 °ग) दीर्घतमास्तां स (T2 G1 2 4 5 °मास्तस्या) — After 31ab, T G (except G6) M6 ins दीर्घतमा (T1 ऋषि) D4 repeats 31cd (with v l) after 32ab (q v) — c) B1 D (except D3 5) °ष्यति कुमारास्ते — d) B1 D (except D2 4 5) तेजसादित्यवर्चस (see below)

32 Before 32, T2 ins भीष्म — B1 Dn D1, 5 om 32 — a) K2 तस्य; D2 °दा; T G2-5 M °तो (for °त्र) G1 ततोऽगनामा — D4 repeats 31cd after 32ab (v l °ष्यति कुमारास्ते तेजसादित्यवर्चस) — K3 4 B (except B5) D ins after 32ab (D4, after the repetition of 31cd)

1012* अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः ।
तेषां देशाः समाख्याताः स्वनामकथिता भुवि ।
अङ्गस्याङ्गोऽभवद्देशो वङ्गो वङ्गस्य च स्मृतः ।
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः ।
पुण्ड्रस्य पुण्ड्राः प्रख्याताः सुह्माः सुह्मस्य च स्मृताः ॥[5]
एवं वंशः पुरा ख्यातो बलेर्वै महर्षिजः ।

[(L 1) K4 B2 अंगवंगकलिंगाश्च D4 पुंड्रसुह्मौ तथा सुता K2, 4 D2 च तत्सु°; B2 तत सु° — K3 (hapl) om from स्वनाम° (line 2) up to प्रख्याता (line 5) — (L 3) K4 B2 4 अंगस्यांगा समाख्याता वंगा—स्मृता — (L 4) K4 B2 6 °विषयाश्चैव कलिंगे च निवेशिता D2 4 विश्रुत (for स स्मृ°) — (L 5) K4 B2 6 Da D2 4 विख्याता — (L 6) K2, 4 B2 6 D4 पुरा वंशोऽयं (by transp) K2 4 D2, 4 D4 प्रथित परमर्षिज]

33 b) Ñ2 Da महारथा — After 33ab, S (except G6) read 1 99 1-2 — G4 5 M8 om 33cd — d) Ñ2

९९

भीष्म उवाच ।
पुनर्भरतवंशस्य हेतुं संतानवृद्धये ।
वक्ष्यामि नियतं मातस्तन्मे निगदतः शृणु ॥ १
ब्राह्मणो गुणवान्कश्चिद्धनेनोपनिमन्त्र्यताम् ।
विचित्रवीर्यक्षेत्रेषु यः समुत्पादयेत्प्रजाः ॥ २
वैशंपायन उवाच ।
ततः सत्यवती भीष्मं वाचा संसज्जमानया ।
विहसन्तीव सव्रीडमिदं वचनमब्रवीत् ॥ ३
सत्यमेतन्महाबाहो यथा वदसि भारत ।
विश्वासात्ते प्रवक्ष्यामि संतानाय कुलस्य च ।
न ते शक्यमनाख्यातुमापद्धीयं तथाविधा ॥ ४
त्वमेव नः कुले धर्मस्त्वं सत्यं त्वं परा गतिः ।
तस्मान्निशम्य वाक्यं मे कुरुष्व यदनन्तरम् ॥ ५
धर्मयुक्तस्य धर्मात्मन्पितुरासीत्तरी मम । C. 1 4228 B. 1 105 6 K. 1 114 23

कुरु मातर् (by transp)

Colophon — *Major parvan* T2 G M सभव° (for आदि°) — *Sub-parvan* Ko 2-4 Ñ1 2 V1 T1 सभव — *Adhy. name* K3 भीष्मवाक्यं, K4 दीर्घतमोपाख्यान, Ñ1 2 V1 भीष्मसत्यवतीसवाद, G1 अगोत्पत्ति — *Adhy no.* (figures, words or both) Ko 100, B1 D4 102, Da1 101, Dn3 103, T1 100, T2 50, G M 51 (G5 52) — *S'loka no* Da1 46, Dn 52, M3 53 — *Aggregate s'loka no* Dn2 4231.

99

1 S read 1-2 after 1 98 33[ab] (G6 om. 1-2) — Ś1 K1 om उवाच, S om the ref — [a]) S (G6 om) तस्मात् (for पुन) B5 G1 भारतवशस्य — [b]) S (G6 om) पुन (for हेतुं) — [cd]) S (G6 om) हेतु वक्ष्याम्यह सम्यग्द्विर्दोप नात्र सशय

2 For S of v 1. 1 — [b]) S (G6 om) धनेना(G5 °मेणा·; M6-8 °र्मो वा)प्युपमन्त्र्यतां — [cd]) S (G6 om) °वीर्यभार्यायां योस्मासु°

3 Ś1 K1 D5 S om उवाच — After वैश°, S ins a passage of 36 lines given in App I (No 57) — [b]) S वै (T2 सा) (for स) — [c]) G1-3 सव्रीळा

4 Before 4, S ins सत्यवती — [b]) S यदात्थ प्रमदां (T1 M6-8 °दा) प्रति — After 4[ab], D2 marg (*sec m*) ins 1045* (of v 1 5) — [d])=32[b]. Ñ1 2 D (except D2 4 5) न·; G6 ते (for च) — After 4[cd], S reads an additional colophon (*adhy no* T1 101, T2 51, G M 52 (G5 53)) and then ins

1043* वैशपायन ।
एवमुक्त्वा ततो भीष्म त माता प्रत्यभापत ।
रोचते मे वचस्तुभ्यं ममापि वचनं शृणु ।

— [e]) Ñ2 Da मयाख्यातुम् — [f]) K4 Ñ3 B1 5 D (except D2 4 5) आपद्धर्मे तथाविध

5 [a]) K (except K1) Da त्व ह्येव — [b]) Da D5 सत्य Ś1 K Ñ1 3 Da D5 तपो महत्, S गति प्रभो (G3 च मे) (for परा गति) — After 5[ab], S ins

1044* यत्त्व वक्ष्यसि तत्कार्यमस्माभिरिति मे मति ।

— [c]) Ñ2 B D (except D5) सत्य मे G3 4 °निशम्यतां वाक्य — [d]) Ñ1 3 विधत्स्व, G6 वद त्व (for कुरु°). — Ko 3 4 Da1 D1 4 (marg) ins. after 5 D2 marg *sec m*, after 4[ab]

1045* यन्मे वाल्ये पुरा वृत्त कुमार्यास्तच्छृणुष्व मे ।

— S ins after 5 D2 (marg *sec m*) 4 (marg) cont after the above

1046* शृणु भीष्म वचो मह्य धर्मार्थसहित हितम् ।
न च विस्रम्भकथित भवान्सूचितुमर्हति ।
यस्तु राजा वसुर्नाम श्रुतस्ते भरतर्षभ ।
तस्य शुक्राद्दह मत्स्या धृता कुक्षौ पुरा किल ।
मातर मे जलाद्धृत्वा दाश परमधर्मवित् । [5]
मा तु स्वगृहमानीय दुहितृत्वे ह्यकल्पयत् ।

[(L 1) G3 धर्मार्थकुशल — (L 3) T2 G3-6 भरतर्षभ — (L. 4) D2 4 तस्य शुक्र धृतवती मत्सी कुक्षौ पुरा किल — (L. 6) T °त्वेभ्यकल्पयत्, M6-8 °त्वेप्यक°]

6 [a]) G °युक्त स (G6 स्व) Ñ1 2 B1 6 D (except D5) धर्मार्थे; S धर्मेण — [b]) Ko 2 3 M तरो (M3 °रा), B3 Da1 D5 तरिर्; T1 तदा Ñ1 °रासीत्तरोत्तम, Ñ3 °राशीर्वरो मम; B6 यमुनायां कुरूद्वह, T2 G पिता चासीत्ततो (G2 4. 5 °स्तदा) मम — [c]) K1 D1 ता; D5 G2 स (for सा) D3 m (*sec m*) तरौ (for अह) Ñ1 2 T2 G4 6 °यौवन, G5 °यौवना — B6 ins after 6 B5, after 7

1047* अतारय जन तत्र पारगामिनमञ्जसा ।
[B5 अवतार्य जल धीर पार°]

C. 1. 4227 B. 1. 105. 7 K. 1. 114. 23

सा कदाचिदहं तत्र गता प्रथमयौवने ॥ ६
अथ धर्मभृतां श्रेष्ठः परमर्षिः पराशरः ।
आजगाम तरीं धीमांस्तरिष्यन्यमुनां नदीम् ॥ ७
स तार्यमाणो यमुना मामुपेत्याब्रवीत्तदा ।
सान्त्वपूर्वं मुनिश्रेष्ठः कामार्तो मधुरं बहु ॥ ८
तमहं शापभीता च पितुर्भीता च भारत ।
वरैरसुलभैरुक्ता न प्रत्याख्यातुमुत्सहे ॥ ९
अभिभूय स मां बालां तेजसा वशमानयत् ।
तमसा लोकमावृत्य नौगतामेव भारत ॥ १०
मत्स्यगन्धो महानासीत्पुरा मम जुगुप्सितः ।
तमपास्य शुभं गन्धमिमं प्रादात्स मे मुनिः ॥ ११
ततो मामाह स मुनिर्गर्भमुत्सृज्य मामकम् ।
द्वीपेऽस्या एव सरितः कन्यैव त्वं भविष्यसि ॥ १२
पाराशर्यो महायोगी स बभूव महानृषिः ।
कन्यापुत्रो मम पुरा द्वैपायन इति स्मृतः ॥ १३
यो व्यस्य वेदांश्चतुरस्तपसा भगवानृषिः ।
लोके व्यासत्वमापेदे कार्ष्ण्यात्कृष्णत्वमेव च ॥ १४
सत्यवादी शमपरस्तपस्वी दग्धकिल्बिषः ।

---

7 ^{a}) Ś1 धर्मवतां; Ñ1 2 D (except D2 5) °विदां — ^{c}) K0 3 D2 M5 तत , K4 B1 3 6 M6-8 तर, Ñ1 G2 तदा; B2 am Dn1 D1 5 तरिं, T1 तट S तात (for धीमान्) — After 7, B4 ins 1047* (cf v 1 6)

8 ^{b}) K0 T2 G2 4 5 वच ; T1 G1.3 M (except M5) मुनि (for तदा) D2 मामुत्यायाब्रवी°, M6 स्वम मामब्रवी° — ^{c}) Ś1 K1 सांत्वमानो G6 M5 महाभाग (for मुनि°) — ^{d}) Ś1 विदुर; K1 विधु° (for मधु°) K4 D (except D2 4 5) S (except G6) वच (for बहु) — After 8, D4 (marg) S ins

1048* उक्तया जन्मकुलं मह्यं नास्ति दाशसुतेति च ।

[D4 श्रुत्वा, M4.5 उक्त G1 6 °कुले G6 चैव (for मह्यं) D4 नैव, T1 G1 नामीत् G1.2 4 5 °कुलेति च; G6 °सुता इति]

9 ^{a}) Ñ2 मुक्ता; T1 G3 M6-8 चाह; G2 त्वाह (for उक्ता) T2 G1 3 4 5 आलोक्य च दिशश्चाह (G2 °श्चोग); M5 वरं सुदुर्लभं(sup lin असुलभे)श्रोक्तवा (sup lin °श्चाह) — ^{d}) S प्रत्याख्यातुं प्रचक्रमे — T G2 4 5 M ins after 9 D4 marg, after 10^{ab} G1, after 10

1049* प्रेक्ष्य तीरेषु महाभागान्परे पारे ऋषीन्स्थितान् ।
यमुनातीरविन्यस्तान्प्रदीप्तानिव पावकान् ।
पुरस्तादपराधेन सदृशं समकाशते ।
येनेषा ताम्रवर्णेव पां कृता प्रविजृम्भिता ।
उत्तमाणो मया तत्र नीहारमसृजत्प्रभुः ।[5]
पराशरः सम्परिष्टिन्द्वीपे च यमुनाम्भसि ।

[(L 4) G1 2 चोभूं G1m °भूं)ता — (L 5) D4 T1 G1 उत्तमाणे]

10 T M om 10 — D4 marg ins 1049* after 10^{ab} (cf v. l. 9). — ^{c}) K3 लोकमावार्य D3 तमसावृत्य माच्छाद्य — After 10, G1 ins 1049*

11 ^{b}) M5 मम महाभाग — ^{cd}) K0 transp. शुभ and इम S (except G6) °स्स वै तदा (M4.5 °स्महामुनि) — D4 (marg) T (T1 om. lines 4-5) G2 M4.5 ins after 11 G1 3 4.5 M6-8, after 12

1050* कन्यात्व च ददौ प्रीतः पुनर्विद्वांस्तपोधन ।
तस्य वीर्यमहं दृष्ट्वा तथा युक्त महात्मन ।
विस्मिता व्यथिता चैव प्रादामात्मानमेव च ।
वसिष्ठेन समानीता याज्ञवल्क्यादयो द्विजा ।
कृत्वा विवाहं मे सर्वे प्रतिजग्मुर्यथागतम् ।[5]
ततस्तदा महात्मा स कन्यायां मयि भारत ।
प्रहृष्टोऽजनयत्पुत्रं द्वीप एव पराशरः ।

[(L. 1) M पुन (M4.5 तत) प्रीतो ददौ वि° — G1.2 4.5 transp lines 2-3 and 4-5 — After line 1, M ins

1051* हिम चैवासृजद्धीमान्द्वीपं च यमुनाम्भसि ।;

and after line 3

1052* तत पिता वसुश्चैव पितरश्च तपोधना ।]

12 T G1 M om 12 — ^{a}) K2 Ñ1.3 G (G3 om.) गर्भं उ(K2 Ñ3 G2 मु)त्सृज्य तामय — Dn3 om 12^{c}–13^{b} — After 12, G1 3 4 5 M6-8 ins 1050* (cf v 1 11), while K0 2.4 Dn1 D4 (marg) ins

1053* एवमुक्त्वा गतः सोऽथ ऋषि परमधर्मवित् ।
ममापि प्रसवो जातस्तत्क्षणादेव भारत ।

13 Dn3 om. 13^{ab} (cf v 1 12). — ^{b}) Ś1 K1.2.4 G1 बभूव स (by transp), K0 G2 स बभूव Ś1 K1 2 4 D4 महामुनि ; G6 °मति — After 13^{ab}, Ś1 K1 read 14^{cd}, G6 1054* (cf v 1 15) — ^{cd}) T1 G1 repeat and G2 4 read 13^{cd} after 1054* (cf v 1 15) M6-8 कन्यागर्भो Ñ1 ममोत्पन्नो (for मम पुरा) Ñ B D (except D4) G6 M5 श्रुत ; G1 स्मृति (for स्मृत)

14 G2(hapl) om 14–15^{ab} — ^{b}) K4 भगवान्मुनि — Ś1 K1 read 14^{cd} after 13^{ab}. — ^{d}) D4 कृष्णत्वमाप च; G6 °भागत .

स नियुक्तो मया व्यक्तं त्वया च *अमितद्युते ।
भ्रातुः क्षेत्रेषु कल्याणमपत्यं जनयिष्यति ॥ १५
स हि मामुक्तवांस्तत्र स्मरेः कृत्येषु मामिति ।
तं स्मरिष्ये महाबाहो यदि भीष्म त्वमिच्छसि ॥ १६
तव ह्यनुमते भीष्म नियतं स महातपाः ।
विचित्रवीर्यक्षेत्रेषु पुत्रानुत्पादयिष्यति ॥ १७
महर्षेः कीर्तने तस्य भीष्मः प्राञ्जलिरब्रवीत् ।
धर्ममर्थं च कामं च त्रीनेतान्योऽनुपश्यति ॥ १८
अर्थमर्थानुबन्धं च धर्मं धर्मानुबन्धनम् ।
कामं कामानुबन्धं च विपरीतान्पृथक्पृथक् ।
यो विचिन्त्य धिया सम्यग्व्यवस्यति स बुद्धिमान् ॥ १९
तदिदं धर्मयुक्तं च हितं चैव कुलस्य नः ।
उक्तं भवत्या यच्छ्रेयः परमं रोचते मम ॥ २०
ततस्तस्मिन्प्रतिज्ञाते भीष्मेण कुरुनन्दन ।
कृष्णद्वैपायनं काली चिन्तयामास वै मुनिम् ॥ २१
स वेदान्विब्रुवन्धीमान्मातुर्विज्ञाय चिन्तितम् ।
प्रादुर्बभूवाविदितः क्षणेन कुरुनन्दन ॥ २२
तस्मै पूजां तदा दत्त्वा सुताय विधिपूर्वकम् ।

C. 1 4246
B. 1 105. 23
K. 1 114 46

---

15 G_3 om 15^{ab} (cf. v. l. 14) — ^{b}) K (except K_1) B $D_{2\,4\,5}$ G_6 तपसा; M_7 तेजस्वी — Dn T $G_{1.2\,4\,5}$ M ins after 15^{ab}, G_6, after 13^{ab}

1054* सद्योत्पन्न स तु महान्सह पित्रा ततो गत ।
[M_8 स सद्य एव चोत्पन्न स° $G_{2\,4\,5}$ वन, G_6 यतो (for ततो)]
— After the above line, T_1 G_1 repeat and $G_{2\,4}$ read 13^{cd} — ^{c}) G_3 स्नेहयुक्ते मयाप्युक्त — ^{d}) Ś$_1$ K Ñ$_3$ चाप्यमितद्युते ($K_{0\,4}$ °ति); Ñ$_{1.2}$ B Dn $D_{2\,4}$ चाप्रतिमद्युते (Dn D_2m °ति), Da वा प्रतिपद्यते, D_5 M_8 चाप्य(M_8 चैवा)मरद्युते; T G M_{5-8} चैवामितद्युते — ^{e}) M_{6-8} भ्रातृक्षेत्रेषु D_4 क्षेत्रे सु°; T G $M_{3\,5}$ क्षेत्रे च (G_6 तु)

16 ^{a}) K_1 तस्य, K_4 तात (for तत्र) G_3 स तु माममब्रवीत्तत्र — ^{b}) K_4 Dn D_5 कृच्छ्रेषु, G_6 M_5 कार्येषु — ^{c}) S (except G_6 M_5) महाभाग ($G_{2\,3}$ °ग) — After 16, M_5 ins

1055* तव चानुमते काममाम्यामुत्पादयेत्प्रजा ।

17 ^{a}) $K_{0\,2}$ तवाप्यनु° Ś$_1$ K_{0-2} वीर (for भीष्म) — ^{b}) K_2 S (except G_6 $M_{3\,5}$) नियत $K_{2\,4}$ सुमहा°, B_5 स महायशा (m as in text) — ^{c}) T_2 $G_{2\,4\,5}$ वैचित्रवीर्ये S (except M_5) क्षेत्रे वै (G_6 तु) — ^{d}) M_5 यदा त्व पुत्र मन्यसे

18 Before 18, K_4 B_1 D (except $D_{2\,4}$) ins वैश° उ°; B_5 भीष्म उ°, S (except G_3) वैश° — After वैश°, S ins

1056* इत्युक्तमात्रे भीष्मस्तु मूर्ध्न्यञ्जलिकृतोऽब्रुवत् ।
[$G_{1.2\,4\,5}$ °जलिमतो (G_1 °था-) वहन्, M_8 कृताजलिपुटोद्ब°]
— G_3 ins. after 19^{cd} $G_{1\,2\,6}$, after 19 $M_{3\,5}$, after 1056*

1057* सर्वविस्सर्वकर्ता च यद्येतत्तत्करोति च ।
— ^{a}) G_6 M कीर्तनात् (M_3 *sup lin* as in text) G_3 तस्मिन् (for तस्य) — ^{b}) S (except G_6) वद्य मातुस्तथा(T_2 वर्धमानस्तदा°; $G_{3\,4}$ मातुस्तदा)ब्रवीत् — After 18^{ab}, D_4 (marg) S ins.

1058* देशकालौ तु जानामि क्रियतामर्थसिद्धये ।
[T_2 राजाना, G (except G_3) जानासि G_6 °तामिह सि°]
— Before 18^{cd}, Ñ$_{1.3}$ ins भीष्म उ° K_3 (? hapl) om 18^{d}–19^{e} — ^{d}) $B_{1\,6}$ D_4 °नेतानुपश्यसि (D_4 °ति)

19 K_3 om 19^{abc} (cf v l 18) — ^{ab}) $K_{0\,2}$ अर्थं चार्थौ° G_2 धर्मार्थं चानुवधनं $M_{3\,5}$ धर्मं धर्मानुवध चाप्यर्थमर्थानु° — ^{c}) Ś$_1$ $K_{1\,2}$ हि (for च) — G_3 ins 1057* after 19^{cd} (cf. v l 18) — D_4 (marg) S (except G_6) ins after 19^{cd} (G_3, after 1057*)

1059* शुभ शुभानुबंध च ताश्चैव त्रिविधान्पुन ।
[T_2 शुभस्य भावानुबधास्तांश्चैव, G_3 अशुभाशुभानु°]
— ^{e}) Ñ$_2$ B D (except D_5) धिया धीरो — ^{f}) G_6 स युक्तिमान् — For 19^{ef}, T_2 $G_{4\,5}$ subst

1060* पुन पुनर्यो विचिन्त्य धिया सम्यग्व्यवस्यति ।
स बुद्धिमान्मनुष्येषु स नर कृत्स्नकर्मकृत् ।
$G_{1\,2\,6}$ ins 1057* after 19 (cf v l 18)

20 ^{a}) Ś$_1$ $D_{2\,4}$ धर्मसंयुक्त; M_8 °काम च — ^{b}) G_1 शुभ चैव — ^{d}) K_3 transp रोच° and मम Ñ$_2$ B D (except D_5) तन्मह्य रोचते भृश

21 Before 21, B_1 D ins वैश° उ°, S (except G_6) वैश° — ^{b}) $M_{3.5}$ कुरुससदि — ^{c}) $M_{3\,5}$ माता (M_3 *sup lin* काली as in text) — ^{d}) $K_{0\,1}$ त (K_1 वै) द्विजं M_3(*sup lin*)$_5$ मनसा समचिंतयत् — After 21, S (except $G_{5\,6}$, M_3 marg) ins

1061* तस्या स चिन्तित ज्ञात्वा सत्यवत्या महातपा ।

22 ^{ab}) G_6 विब्रुवाणोय (for विब्रुवन्धी°) T G_{1-5} M स वेदान्प्र(G_1 वेदान्प्रति-; G_3 समेतान्प्र)ब्रुवन्सर्वान्कृष्ण द्वैपायन प्रभु (G_3 तदा) — ^{c}) Ś$_1$ Ñ Da S °बभूव विदित

परिष्वज्य च बाहुभ्यां प्रस्रवैरभिषिच्य च ।
मुमोच बाष्पं दाशेयी पुत्रं दृष्ट्वा चिरस्य तम् ॥ २३
तामद्भिः परिषिच्यार्तां महर्षिरभिवाद्य च ।
मातरं पूर्वजः पुत्रो व्यासो वचनमब्रवीत् ॥ २४
भवत्या यदभिप्रेतं तदहं कर्तुमागतः ।
शाधि मां धर्मतत्त्वज्ञे करवाणि प्रियं तव ॥ २५
तस्मै पूजां ततोऽकार्षीत्पुरोधाः परमर्षये ।
स च तां प्रतिजग्राह विधिवन्मन्त्रपूर्वकम् ॥ २६
तमासनगतं माता पृष्ट्वा कुशलमव्ययम् ।
सत्यवत्यभिवीक्ष्यैनमुवाचेदमनन्तरम् ॥ २७
मातापित्रोः प्रजायन्ते पुत्राः साधारणाः कवे ।
तेषां पिता यथा स्वामी तथा माता न संशयः ॥ २८
विधातृविहितः स त्वं यथा मे प्रथमः सुतः ।
विचित्रवीर्यो ब्रह्मर्षे तथा मेऽवरजः सुतः ॥ २९
यथैव पितृतो भीष्मस्तथा त्वमपि मातृतः ।
भ्राता विचित्रवीर्यस्य यथा वा पुत्र मन्यसे ॥ ३०
अयं शांतनवः सत्यं पालयन्सत्यविक्रमः ।
बुद्धिं न कुरुतेऽपत्ये तथा राज्यानुशासने ॥ ३१
स त्वं व्यपेक्षया भ्रातुः संतानाय कुलस्य च ।
भीष्मस्य चास्य वचनान्नियोगाच्च ममानघ ॥ ३२
अनुक्रोशाच्च भूतानां सर्वेषां रक्षणाय च ।
आनृशंस्येन यद्ब्रूयां तच्छ्रुत्वा कर्तुमर्हसि ॥ ३३

(G3 °मायासमन्यवती, M1. 2 as in text), K3 °बभूव प्रकटः, D1 °बभूव स ऋषि — d) B2. 3 D3 कुरुसत्तम, S (except G1 c) °सम्हि

23 a) K0. 2 Ñ1 B2 D (except D1. 4. 5) S तत (for तदा) K (except K1) Ñ2. 3 B D (except D1) कृत्वा; M2. 3 [ऽ]कार्षीत् (M1 sup lin as in text) — b) K0 पुत्राय — c) M1 त परिष्वज्य (for परि° च) M1. 2 मातातौ (M1 sup lin बाहुभ्यां as in text) — d) N (except Dn1 n3) T2 G1-3 प्रस्र(Ś1 °स्रा)वैर् Ś1 अभि निन्द्य च, K1 °नद्य त, K3 °चित्य त, K4 Ñ D2 c D (except D1. 4. 5) T2 G (except G3) M1-3 अभ्यषिचत, T1 अभिषिषेचयत् K0 त (for च) — f) D1 चिरेण D (except D1. 4. 5) सु, G3 पं (for तम्)

24 a) T M अभि (for परि) K1 अभिशिस्नाता (sic), K2. 4 G2. 4. 5 अभिषिचतीं; D1 G3 °षिच्यार्तौ (G3 °र्तां); G1 अभ्यषिचत्तां — b) Ś1 अभ्यमापन्न (sup lin °पाद्य च), G6 अभिगम्य च — d) Ś1 K D2 G6 M2 व्यासो (G2 कृष्ण) द्वैपायनोऽब्रवीत्

25 Before 25, D1 marg ins व्यास उ° S repeats 25ab after 27 — a) Ñ1 यद् त्व (for भव°) — d) K0. 1 तव प्रिय (by transp)

26 Before 26, D2. 4 (marg) ins वैश उ° — a) K0. 1 I1 तदा (for ततो) — b) G2 पुरोधाय परतप — d) M2 मन्त्रपूर्वं यथाविधि — After 26, Dn S ins

1062* पूजितो मन्त्रपूर्वं तु विधिवद्धर्मवित्तदा स ।
[T1 G1 पूजितां मन्त्रपूर्वेण विधिना प्रीतमानस]

27 cd) Ñ1 B2. 3 D (except D1. 4) अथ (for अभि) D1 T1 एनत् (for एनम्) D1 T1 G1 एनम् (for इदम्) — M2 ins before 27cd M1 subst for it

1063* आचचक्षे क्रमेणास्मै तदर्थमभिचिन्तितम् ।

28 Before 28, S ins सत्यवती — a) S (except G5 M1. 2) मातापितृभ्यां जायते — b) G6 कुले (for कवे) — c) B1. 6 D1. 4 यथा पिता (by transp)

29 ab) N (except Ś1) G1. 4 Cd विधान° (G1 °त्रा) Ñ1. 3 B1. 3 D5 G3 M3 सत्य; Ñ3 सर्व (for स त्व) K3. 4 पूर्वज, B3 विहित (for प्रथ°) T1 मे प्रियपुत्रक M6 स यथासि पितुस्तात तथासि मम धर्मत — T2 om 29cd–30 — cd) G2. 3. 5 (haplography) om 29cd — Ś1 K1. 3. 4 विप्रर्षे, Da महर्षे B1 G3 सुत, Da स्मृत M6 विचित्रवीर्यभ्रात्येव यथा त्वमसि मे सुत — M6 repeats 29 with v l of M1

30 T2 om 30 (cf v l 29) — a) K0 B1 G1 तथैव; G6 यथा चै — b) Ś1 K1 Dn1 M1. 4 त्वमसि — c) Ñ2. 3 G1 भ्रातुर्विचित्र° — T1 G M6-8 read 34 after 30, the same MSS except G6 repeating it in its proper place

31 a) Ñ1 स्वय (for अय) — c) Ñ3 न बुद्धिं (by transp) — d) Ñ3 राज्यानुपालने

32 M6 om 32-33 — a) Ś1 राजव्यपे°; Ś1 (sup lin) K1. 4 सत्यव्यपे°, S (M6 om) सत्य चापे° (G2 स त्व चापे°) — b)-4c K4 G3 तु; G1 न ; G3 पं (for च) — c) D1 S (except G6, M6 om) °स्य यथार्थेव — d) B1. 3 D1 त्व (for च) K1. 3. 4 T1 G1-4 M (M6 om) °गान्मम चानघ, T2 विनियोगान्ममानघ; G6 °गाद्वचनान्मम

33 M6 om 33 (cf v l 32) — a) Ś1 K1 भीतानां G3 भ्रातृणां — Ñ3 om 33c–36b — c) Ñ3 B D (except D1) M3 °शस्याद Da1 भूतानां (for यद्ब्रू°)

34 Ñ3 om 34 (cf v l 33) G6 reads 34 after

यवीयसस्तव भ्रातुर्भार्ये सुरसुतोपमे ।
रूपयौवनसंपन्ने पुत्रकामे च धर्मतः ॥ ३४
तयोरुत्पादयापत्यं समर्थो ह्यसि पुत्रक ।
अनुरूपं कुलस्यास्य संतत्याः प्रसवस्य च ॥ ३५
व्यास उवाच ।
वेत्थ धर्मं सत्यवति परं चापरमेव च ।
यथा च तव धर्मज्ञे धर्मे प्रणिहिता मतिः ॥ ३६
तस्मादहं त्वन्नियोगाद्धर्ममुद्दिश्य कारणम् ।
ईप्सितं ते करिष्यामि दृष्टं ह्येतत्पुरातनम् ॥ ३७
भ्रातुः पुत्रान्प्रदास्यामि मित्रावरुणयोः समान् ।
व्रतं चरेतां ते देव्यौ निर्दिष्टमिह यन्मया ॥ ३८
संवत्सरं यथान्यायं ततः शुद्धे भविष्यतः ।
न हि मामव्रतोपेता उपेयात्काचिदङ्गना ॥ ३९
सत्यवत्युवाच ।
यथा सद्यः प्रपद्येत देवी गर्भं तथा कुरु ।
अराजकेषु राष्ट्रेषु नास्ति वृष्टिर्न देवताः ॥ ४०
कथमराजकं राष्ट्रं शक्यं धारयितुं प्रभो ।
तस्माद्गर्भं समाधत्स्व भीष्मस्तं वर्धयिष्यति ॥ ४१
व्यास उवाच ।
यदि पुत्रः प्रदातव्यो मया क्षिप्रमकालिकम् ।
विरूपतां मे सहतामेतदस्याः परं व्रतम् ॥ ४२
यदि मे सहते गन्धं रूपं वेषं तथा वपुः ।

C 1 4266
B 1 105. 47
K 1 114 68

30, T1 G1-5 M6-8 repeat 34 here — [b]) T1 (second time) 2 G1-5 (all five second time) M3, 6-8 (the last three second time) भार्ये परमसमते — [d]) B6 M5 6-8 (the last three second time) भारत (M6 first time *inf lin* as in text), G3 (second time) पुत्रक (for धर्म°)

35 Ñ3 om 35 (cf v 1 33) — [a]) S (except G6) तयो प्रयच्छ पुत्रांस्त्व — [c]) S (except G6) अनुरूपान् — [d]) D5 शतनो°, Cd सतत्या (as in text) K2 संभूत्या. प्रभवस्य च, S तेज प्रशम (G2 4 5 °श्रय) सयुतान्

36 K1 S om उवाच (G5 6 om the ref) Ñ3 om 36[ab] (cf v 1 33) — [a]) Da G3 सर्वं (for धर्मं) S स्वमे (M6-8 यथै) वेह (for सत्य°) — [b]) S (except G6) पर तत्व प्रजासु च (G2 4. 5 परावय) — Before 36[cd], G6 ins व्यास° — [c]) K1 Ñ1. 2 B D (except D5) S तथा K0 2 Ñ B D (except D5) तव महाप्रा (a few MSS. °प्र) ज्ञे, S हि (T2 G2 4. 5 पि) ते वि (G1 सुवि, G2, 4 5 तव) निश्चिस्य — [d]) Ś1 K1 धर्मेण प्रहि (K1 °ति) ता मति

37 [ab]) Ś1 तस्मात्त्वह, K1 तस्यात्त्वह (sic) S नियोगात्तव चैवाहमेतैरपि च कारणै — [c]) S (except M3, 5) तत् (for ते) — [d]) Ś1 K1 दिष्ट, Ñ1 दृष्ट्वा Ś1 K0 2 4 पुरातने, D (except D2 4 5) सनातन; S पुरा मया — After 37, S repeats 25[ab]

60 b) G1 मस्तकीकृत°; G5 °कृत्य कार्मुकं — G1 om 60cd — 60cd = (var) 50cd — c) K3 Ñ B D T1 G3.6 M भास (for लक्ष्य) — d) = 50d K0 3 G3 6 M (except M8) °समाहित , K2 4 D5 °प्रणोदित , T1 उवाच च समाहित , T2 G2 4.5 गुरोर्वाक्यसमाहित

61 a) T2 G4 5 मुहूर्तम् D4 5 एव (for इव) — b) Dn1 परिभा°, Dn3 T2 G4 5 प्रत्यभा° — c) B (except B6) D2 इम (for एन) — d) K0 D5 मा चापि K0 D5 वै सुत, K2 4 चेत्पुन , K3 Ñ1 3 B4 D2 T1 G1–3 6 M चेत्युत, Ñ2 B6 Dn D4 चार्जुन, D1 त्वर्जुन, T2 G5 चेत्यथ ; G4 चेत्यथ

62 a) Ñ2 3 B D T1 G2 3 6 °म्येक K2 4 स्थित, D5 T1 G2 अह (for भास) K2 4 D5 T1 G2 भास, D3 इम (for इति) T2 G4 5 पश्यामि भासमेवाह — b) T2 G4 5 इति त प्रत्यभा° — Before 62cd, D5 ins अर्जुन उ° — c) K2 4 च, T2 G4.5 हि (for तु) — d) T1 G4 °मि भरतर्षभ, T2 G5 °मि न च किंचन

63 b) G3 अथ (for इव) — c) D5 S दुर्धर्षे — d) Ś1 पार्थिवानां K0 D5 यशस्कर; K3 4 Ñ3 T2 G3 5 नरर्षभ, Ñ1 2 B Dam Dn D1, 2 4 महारथ (D1 °थ); D3 महात्मना, G1 2 4 अथर्ष° K2 पाडव भरतर्षभ

64 b) T2 G4 5 नरर्षभ (for पुन°) — d) D5 तु गात्राणि (for गात्रम्) Ś1 K (except K3) B6 D3 T2 G4 5 च (for स) T1 [ऽ]वदत

65 a) T2 G4 5 तथा (for एवम्) — c) G1 द्रोण°; G5 वाच (for पार्थं)

66 b) Ś1 K0 शरेण K3 G1–3 6 M स , B5 6 Dn D1 T1 च, D5 हि N3 क्षुरप्रेण शितेन स , T2 G4 5 क्षुरेणा प्रवता प्रभु — c) K2 4 D5 सहसा, T2 G4 5 तीक्ष्णेन (for तर°).

67 a) T2 G4 5 निर्वृत्ते, G3 वीर्येण (for तस्मि°) — b) T2 G1.2 4–6 M परिष्वज्य च Ś1 K1 फल्गुण, K0 3 Ñ B D3 D2 5 M7 3 फा°; K2 4 Dn D1 G1.2 6 पाडव T1 °ष्वज्येदमब्रवीत्, G3 लक्ष्ये च विनिपातिते — c) T2 स मेने द्रु° — After 67, T1 reads 44

68 b) G1 °रस सुत — c) K0 D5 T2 G4 5 गगा भिमुखो; T1 G2 3 गगासलिले — d) Ś1 K3 पुरुषर्षभ T2

C. 1. 5279 B. 1. 132. 11 K. 1. 143. 11

कस्यचित्त्वथ कालस्य सशिष्योऽङ्गिरसां वरः ।
जगाम गङ्गामभितो मज्जितुं भरतर्षभ ॥ ६८
अवगाढमथो द्रोणं सलिले सलिलेचरः ।
ग्राहो जग्राह बलवाञ्जङ्घान्ते कालचोदितः ॥ ६९
स समर्थोऽपि मोक्षाय शिष्यान्सर्वानचोदयत् ।
ग्राहं हत्वा मोक्षयध्वं मामिति त्वरयन्निव ॥ ७०
तद्वाक्यसमकालं तु बीभत्सुर्निशितैः शरैः ।
आवापैः पञ्चभिर्ग्राहं मग्नमम्भस्यताडयत् ।
इतरे तु विसंमूढास्तत्र तत्र प्रपेदिरे ॥ ७१
तं च दृष्ट्वा क्रियोपेतं द्रोणोऽमन्यत पाण्डवम् ।
विशिष्टं सर्वशिष्येभ्यः प्रीतिमांश्चाभवत्तदा ॥ ७२
स पार्थबाणैर्बहुधा खण्डशः परिकल्पितः ।
ग्राहः पञ्चत्वमापेदे जङ्घां त्यक्त्वा महात्मनः ॥ ७३
अथाब्रवीन्महात्मानं भारद्वाजो महारथम् ।
गृहाणेदं महाबाहो विशिष्टमतिदुर्धरम् ।
अस्त्रं ब्रह्मशिरो नाम सप्रयोगनिवर्तनम् ॥ ७४
न च ते मानुषेष्वेतत्प्रयोक्तव्यं कथंचन ।
जगद्विनिर्दहेदेतदल्पतेजसि पातितम् ॥ ७५
असामान्यमिदं तात लोकेष्वस्त्रं निगद्यते ।
तद्धारयेथाः प्रयतः शृणु चेदं वचो मम ॥ ७६
बाधेतामानुषः शत्रुर्यदा त्वां वीर कश्चन ।
तद्वधाय प्रयुञ्जीथास्तदास्त्रमिदमाहवे ॥ ७७
तथेति तत्प्रतिश्रुत्य बीभत्सुः स कृताञ्जलिः ।
जग्राह परमास्त्रं तदाह चैनं पुनर्गुरुः ।
भविता त्वत्समो नान्यः पुमाँल्लोके धनुर्धरः ॥ ७८

इति श्रीमहाभारते आदिपर्वणि त्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥ समाप्तं संभवपर्व ॥

G4 मज्जनार्थमरिंदम

69 a) Ś1 K2-4 G1 अथ; Ñ1 ततो B3 (hypermetric!) अवगाह्यमान स द्रोणं — b) T2 सहसा, G4 सलिल — c) T2 G4 ह सुमहान् — d) Ś1 K1 M2 जघायां; T2 G4 जघयो K3 चोद्दित; Ñ1 चल°

70 a) K3.4 T1 G3 M (except M5) पि (for ऽपि) G4 समर्थस्त्वथ मो — b) K0 transp शिष्यान् and सर्वान् K0 D3 अनोदयत्; G3 अभाषत T2 G4 °स्वांस्तान्समचो° — c) Ñ B3 Dn D1 °त्वा तु मोक्षय(Dn °क्ष)ध्व — d) T2 G4 इति तान्सत्वयन(T2 °न्सत्वर; G4 °न्सत्वर)न्निव

71 ab) K3 स्पुर ; Ñ2 कृतामि (for निशि°) T2 G4 वचनादेव बीभत्सुरावर्पैर्दशभिः शरैः — c) K2.4 D2 G2 आपसै ; K3 Ñ B1.3.4 D1 अवार्यै ; B5 Da आचार्य; D4 नाराचै T1 G1-3 निशितै ; M दशभि (for पञ्चभि) T2 G4 निरभिद्यन्त दशधा — d) Ñ1 D1.4 अमग्ने नममाट ; T2 G4 मग्न ग्राहमपांमणि — Ś1 om 71c–72b, K1 om 71c–72d — e) K0.4 D4 °रेपि तु; Ñ2 °रे तु च, Ñ3 °रे त्वपि (sic), Ñ3 °रे सुवि; B4 °रेषु वि ; Dn D1 °रे त्वय; M4 °रे स्म हि

72 Ś1 om 72ab, K1 om 72 (cf v l 71) — a) Ñ B D G3 M2 तु (for च) K2.4 दृष्ट्वा कृपयोपेत; T2 G4 तादृक्स्थं क्रियोपेतान् — b) Ñ1 °णो मेने तु पां°

73 a) K4 पहुशा ; Ñ1 बहुशि M6-8 बाणाभिहत B3 (m as in text) तस्य बाणै स ब° — b) T2 G4 खड खड कृतस्तदा — c) T1 प्रपेदे (for पञ्चत्व) K0 अगमत्; T1 पञ्चत्व (for आपेदे) — d) K0 transp जङ्घां and त्यक्त्वा B6 मुक्त्वा T2 G4 त्यक्त्वा जघे महात्मन

74 T2 G4 om 74–78 — b) Ñ2 (sup lin sec m as in text) महाबल — c) Ś1 K1.2.4 Dn1 D1 इम; K0 एम; D4 एतत् (for इद) — d) K0 D1 °मरिमर्दन; K3 °मपि दु°; Ñ1 °मिति दु°; B3 (m as in text) °मतिदुर्जय; Da °मेति दु° (sic) — e) K3 Ñ3 G1.3.6 M धीर (for नाम)

75 T2 G4 om 75 (cf v l 74). — a) Ñ1 पुरुषेष्वेतत् — c) M6-8 द्वि (for वि) Ñ1.3 सर्व; Dn D1 सर्वम् (for एतद्) — d) Ñ1.3 स्वल्प°.

76 T2 G4 om 76 (cf v l 71) — a) G3 असमानम् — c) G2 °रय रय Dn सतत; Arjp प्रयत — d) Ś1 K1 शृणु चैतद्; M2.4 शृणुष्वैतद्

77 T2 G4 om 77 (cf v l 71) — a) K (except K3) B1.6 D2.4 बाधिता; T1 G1-3 बाधते S (T2 G4 om) यश्चिद् (for शत्रुर्) — b) Ñ2 B2.3 Dn D1.4 यदि G3 यथा Ś1 K1 च; K2 T1 M त्वा; K4 G2 ते K1 मनुजे; T1 वीटव; M कुत्रचित् (for कश्च°) — c) K1.4 तद्वधार्थं — d) Ñ2 B (except B3) Dn D1 G1 तद्; G3 तथा

78 T2 G4 om 78 (cf v l 74) — a) Ś1 तान्;

१२४

वैशंपायन उवाच ।
कृतास्त्रान्धार्तराष्ट्रांश्च पाण्डुपुत्रांश्च भारत ।
दृष्ट्वा द्रोणोऽब्रवीद्राजन्धृतराष्ट्रं जनेश्वरम् ॥ १
कृपस्य सोमदत्तस्य बाह्लीकस्य च धीमतः ।
गाङ्गेयस्य च सांनिध्ये व्यासस्य विदुरस्य च ॥ २
राजन्संप्राप्तविद्यास्ते कुमाराः कुरुसत्तम ।
ते दर्शयेयुः स्वां शिक्षां राजन्ननुमते तव ॥ ३
ततोऽब्रवीन्महाराजः प्रहृष्टेनान्तरात्मना ।
भारद्वाज महत्कर्म कृतं ते द्विजसत्तम ॥ ४
यदा तु मन्यसे कालं यस्मिन्देशे यथा यथा ।
तथा तथा विधानाय स्वयमाज्ञापयस्व माम् ॥ ५
स्पृहयाम्यद्य निर्वेदात्पुरुषाणां सचक्षुषाम् ।
अस्त्रहेतोः पराक्रान्तान्ये मे द्रक्ष्यन्ति पुत्रकान् ॥ ६
क्षत्तर्यद्गुरुराचार्यो ब्रवीति कुरु तत्तथा ।
न हीदृशं प्रियं मन्ये भविता धर्मवत्सल ॥ ७
ततो राजानमामन्त्र्य विदुरानुगतो बहिः ।
भारद्वाजो महाप्राज्ञो मापयामास मेदिनीम् ।
समामवृक्षां निर्गुल्मामुदक्प्रवणसंस्थिताम् ॥ ८

C 1 5320
B 1 134 9
K 1 144 9

Dn1 n2 D1 स; D5 स, M8 च (for तत्) Dn3 M6-8 स तथेति प्र° — ^{b}) K4 च, Dn2 T1 G1-3, 6 M6-8 प्र (for स) Ñ1 B (except B5) Da D5 °स्तु सहता°. — ^{cd}) K4 च (for तद्) D1 स तदा (for तदाह)

Colophon om in T2 G4 5 — *Major parvan* G1-3 6 M संभव° (for आदि°) — *Sub-parvan* Ś1 K0-2 4 Ñ1 2 B Da Dn1 n2 D1 2 4 5 सभव, to it Ś1 K1 2 4 Ñ1 B1 Da D1, 2 4 Cd add समास (or °स) — *Adhy name* K0 अर्जुनस्यास्त्रप्राप्ति, K3 अर्जुनस्य ब्रह्मास्त्रोपदेश, Ñ1 2 द्रोणग्राहमोक्षण, Ñ3 अस्त्रशिक्षा, M लक्षनिपातन (M5 ब्रह्मास्त्रग्रहण) — *Adhy no* (figures, words or both) B1 130, Dn3 132, D4 m 134, T1 126, G1 6 77, G2 78, G3 M 76 — *S'loka no* Dn 23 (Dn1 22), M8 42 — *Aggregate s'loka no* Dn2 5312

124

1 Ś1 K0 1 3 D2 5 S om उवाच (T2 G4 5 om the ref) — ^{ab}) M6-8 transp धार्त° and पाण्डु° T1 पाण्डवांश्चैव (for पाण्डु) T2 G4 5 तास्तु सर्वास्त्रकुशलान्सर्वशास्त्रविशारदान् (G5 °शास्त्रभृतां वर) — ^{c}) T1 G1 2 6 M वाक्य (for राजन्) T2 G4 5 °ष्ट्वा द्रोणस्तु राजान — ^{d}) Ś1 K1 T1 नरेश्वर, G5 अचक्षुष

2 ^{b}) Ś1 K1 2 4 Da1 G2 बाह्लि° — ^{c}) T2 G4, 5 अपि (for च) — After 2, T2 G2 4 5 ins

1405* त्रयाणामिव लोकाना प्रजापतिमिव स्थितम् ।

3 Before 3, Ñ2 D4 (marg) ins द्रोण उ°, T1 G2 द्रोण — ^{a}) K1 राजन्विद्यास्त्रसप्राप्ते — ^{b}) K0 3 G2 °सत्तमा, M5 राज° — ^{c}) K0 निदेशयेयु, G1 दर्शयेयु स्वां D2 T1 G3 ता, G1 च (for स्वां) G4 दर्शयिष्यति शास्त्राणि — ^{d}) T1 राजञ्छिष्या मम प्रिया, T2 G4 5 तज्ज्ञवा (G4 तद्विद्वा) ननुमन्यतां

4 Before 4, Ñ2 ins वैश° उ° — ^{a}) G2 महातेजा°; M8 °राजा — Before 4^{cd}, Ñ2 B5 D (except Da D5) ins धृतराष्ट्र उ° — ^{d}) S कृतं द्विजवर त्वया

5 ^{a}) K0 Ñ B D (except D1 2 4) G1-3 6 M3, 5 यदातु (B3 यदत्र), T2 G4 5 यदाय T2 G4 5 मन्यते Ś1 K1 काले — ^{b}) G4 काले (for देशे) Ś1 K4 Da Dn2 D4 5 T1 G1 2 4 यथा तथा — ^{c}) Ś1 यथा तथा, T1 तत्र तस्य G2 विधायस्व, G3 4 °धाय त्व D4 तथा विधान तत्सर्वं — ^{d}) Ś1 K1 न, G6 M6-8 मा T2 G4 5 समाज्ञापय चैव मा

6 ^{a}) K0 °यामि सदा चाह — ^{c}) K समृद्धि(K1 समृद्धि)कान्, Ñ3 T1 G1-3 6 M समायुक्तान् T2 G4, 5 समुद्यतानस्त्रहेतो — ^{d}) Ñ1 2 न (for ये) Ś1 पश्यति

7 ^{a}) T2 G4 5 सत्कार्यं क्षत्त आचा° — ^{b}) T2 G4 5 ब्रवीमि D5 त, T2 G4 5 यत् — ^{c}) K2 4 प्रियो Ś1 मन्येत्, K0 1 D5 मेन्यत्, K2-4 S मेद्य (for मन्ये)

8 Before 8, Ñ2 ins वैश° उ° — ^{b}) Ñ1 2 Dn निर्गतो विदुरो, Ñ3 T2 G5 °नुमतो; B Da D1 4 विदुरो निर्गतो, T1 D5 विदुरोनु°, G3, 4 M °नुमते — ^{c}) G1 महाख्य (for °प्राज्ञो) — ^{d}) T1 कारयामास, G1 रूप°, G2 प्राप° — After 8^{cd}, B5 (marg) ins

1406* प्रेक्ष्यागार सुविपुल शास्त्रदृष्ट्या यथाविधि ।

(of 10) — ^{e}) G4 निर्जग्मु — ^{f}) Ñ B1 3m 5 Dn D1 °क्प्रस्रवणान्विता (Ñ3 °क्प्रस्रवसयुता), B3 D5 °क्प्रस्रवण

C. 1. 5099 B. 1. 135. 6 K. 1. 144. 9

तस्यां भूमौ बलिं चक्रे तिथौ नक्षत्रपूजिते ।
अवघुष्टं पुरे चापि तदर्थं वदतां वर ॥ ९
रङ्गभूमौ सुविपुलं शास्त्रदृष्टं यथाविधि ।
प्रेक्षागारं सुविहितं चक्रुस्तत्र च शिल्पिनः ।
राज्ञः सर्वायुधोपेतं स्त्रीणां चैव नरर्षभ ॥ १०
मञ्चांश्च कारयामासुस्तत्र जानपदा जनाः ।
विपुलानुच्छ्रयोपेताञ्शिबिकाश्च महाधनाः ॥ ११
तस्मिंस्ततोऽहनि प्राप्ते राजा ससचिवस्तदा ।
भीष्मं प्रमुखतः कृत्वा कृपं चाचार्यसत्तमम् ॥ १२
मुक्ताजालपरिक्षिप्तं वैडूर्यमणिभूषितम् ।
शातकुम्भमयं दिव्यं प्रेक्षागारमुपागमत् ॥ १३
गान्धारी च महाभागा कुन्ती च जयतां वर ।
स्त्रियश्च सर्वा या राज्ञः सप्रेष्याः सपरिच्छदाः ।
हर्षादारुरुहुर्मञ्चान्मेरुं देवस्त्रियो यथा ॥ १४
ब्राह्मणक्षत्रियाद्यं च चातुर्वर्ण्यं पुराद्द्रुतम् ।
दर्शनेप्सु समभ्यागात्कुमाराणां कृतास्त्रताम् ॥ १५
प्रवादितैश्च वादित्रैर्जनकौतूहलेन च ।
महार्णव इव क्षुब्धः समाजः सोऽभवत्तदा ॥ १६
ततः शुक्लाम्बरधरः शुक्लयज्ञोपवीतवान् ।
शुक्लकेशः सितश्मश्रुः शुक्लमाल्यानुलेपनः ॥ १७

स्थितां, T2 G1 3 प्रागुदक्प्रवणा शुभां, Cd उदक्प्लवन सहितां (sic)

9 a) Ś1 K1 Ñ1 2 B D (except D5) °घुष्टे; T2 G1.3 °घुष्य, Cd as in text Ñ1 B D (except D5) समाजे तु (Dn D1 च), Ñ3 पुर चापि — d) Ñ B Dn D 3 T2 G1 3 वर T1 G1-3 6 M °र्थं भरत(T1 G2 पुरुष)र्षभ

10 a) Ś1 K1 रक्ष्यां भू°, K3 Ñ1 3 B6 S रङ्गभूमिं K3 Ñ1 3 B3 G4-6 °विपुलां, T1 G1.3 M °विहिता — Ś1 K1 om 10b — b) K3 Ñ3 T1 G3 M °दृष्टां; Ñ1 शास्त्र दृष्ट्वा, B1 6 D1 °दृष्ट्वा T1 अकल्पयत्, G1 2. 6 M अकारयत् (for यथा°) T2 G2 4 5 अकरोद्दर्शनेप्सया — c) T2 G5 प्रेक्षा रङ्गं Ko 2 D3 T2 G3 सुविपुलं (of c), K3 4 °रुचिरं — d) Ko तत्राथ, K2 Ñ3 T2 G1 ते तत्र; Ñ2 B D ते तस्य (D2 तत्रापि) (for तत्र च) — e) D5 T1 G (except G1.3) राज्ञां Ś1 K1 T1 G3 पेतां; M1.2 सर्वगुणो° — f) Ś1 K1 B1 D5 नराधिप, K2 4 नरोत्तम; M6-8 द्विजर्षभ G2 4 भीष्मों च भरतर्षभ — After 10, T2 G1 3 ins

1407* मनस्यम ...न्विपुलानकरोद्दर्शनेप्सया ।
(see below)

11 T2 G2 om 11ab — a) K2 4 ते (for च) — b) B3 तत्र मत्र ततो ज° — cd) S महिमांश पुनर् (T2 G2 4 6 शिल्पिनश्च गृधून्) मञ्चान्कारयामासुरर्पितान्

12 a) T2 G2 4 5 तस्मिन्निन्दिने प्राप्ते — b) T1 G1 3 राजा सपत्न्याहन — After 12ab, D1 (marg sec m) 5 ins

1408* ... पुर महामात्यो व्यासगतानुमते तदा ।
[D1 G1 °मगमद्दा; M2 (sup lin) व्यास चैव नरर्षभ]
Thereafter T2 G1 ins 1407* — c) T2 G1 3 भीष्ममये पुरस्कृत्य — d) K2 4 ... D1 कृता; G4 द्रोणं (for कृप) T1 G 2 M om च Ś1 K1 2. 4 °पूजिता — S ins after 12 (T2 G5, after 1408*) D1 (marg sec m), after 13

1409* बाह्लीक सोमदत्त च भूरिश्रवसमेव च ।
कुरूनन्यांश्च सचिवानादाय नगराद्बहि ।
रङ्गभूमिं समासाद्य ब्राह्मणै सहितो नृप ।
Thereafter T2 G5 read 12cd

13 a) G1 °प्रतिच्छन्न; T2 G5 मुक्तामाला° — b) Ko Ñ3 D2 5 T2 G (except G1 2) M7 8 वैदूर्य ; Ñ1 2 B Dn D1 वैडूर्यमणिशोभित, Dn D1 °शोभित — c) T2 G1 3 °कुम्भपरिक्षिप्त — d) T1 G2 3 6 M °पारुहत्; T2 G1 3 °पाविशत्

14 a) Ś1 K3 G1 3 °भाग — c) Ko 3 Ñ1 2 B D (except D5) °श्च राज्ञ सर्वास्ता ; M6-8 °श्च सर्वा राज्ञस्ता — d) Ñ2 ता सप्रेक्षपरि°; T1 G1.3 6 तासां च परिचारिका ; T2 G2 4 5 तेषामत पुराणि च (G2 °पुरस्त्रिय); M तेषां प्रेक्ष्य परिच्छदान् (M8 4 °दा) — e) Ko 2 B. D1 5 G3 मञ्च, G1 3 6 कात — f) Ko दिव्यस्त्रि°; D3 दिव्या स्त्रि°

15 a) Ñ1 B 6 Dn D1 °णा क्षत्रिया वैश्या ; S °क्षत्रविट्शूद्र — b) S सर्वं तत्र समागत (G1 °गमत्) — After 15ab, T2 G1 3 (which om 15cd) ins 1410* — c) Some MSS °नेप्सु Ś1 K1 4 समाम्या° — d) Ñ1.2 B Dn D2 4 विचेष्टित (for कृता°) — Ñ1 2 B D ins after 15 T2 G4 5, after 15ab

1410* क्षणेनैकस्थता तत्र दर्शनेप्सु जगाम ह ।
[T2 G1 3 °नैकस्थया]

16 Ś1 K (except K4) om 16ab — a) T1 M6-8 प्रवादितश्च; G1 °दित च — b) B1 m 2 S जन(G1.6 यूनां) कोलाह° — c) T2 G5 °र्णवोपरिक्षु° — d) Ś1 K1. 2 4 transp समा° and तु T2 G2 °ज प्रत्यपद्यत (G5 °गुप्यत).

17 c) M (except M8) °केश

18 a) Ko D मध्ये T G1 3 तथा° — b) Ñ2

रङ्गमध्यं तदाचार्यः सपुत्रः प्रविवेश ह ।
नभो जलधरैर्हीनं साङ्गारक इवांशुमान् ॥ १८
स यथासमयं चक्रे बलिं बलवतां वरः ।
ब्राह्मणांश्चात्र मन्त्रज्ञान्वाचयामास मङ्गलम् ॥ १९
अथ पुण्याहघोषस्य पुण्यस्य तदनन्तरम् ।
विविशुर्विविधं गृह्य शस्त्रोपकरणं नराः ॥ २०
ततो बद्धतनुत्राणा बद्धकक्ष्या महाबलाः ।
बद्धतूणाः सधनुषो विविशुर्भरतर्षभाः ॥ २१
अनुज्येष्ठं च ते तत्र युधिष्ठिरपुरोगमाः ।
चक्रुरस्त्रं महावीर्याः कुमाराः परमाद्भुतम् ॥ २२
केचिच्छराक्षेपभयाच्छिरांस्यवननामिरे ।
मनुजा धृष्टमपरे वीक्षांचक्रुः सविस्मयाः ॥ २३
ते स्म लक्ष्याणि विविधुर्बाणैर्नामाङ्कशोभितैः ।
विविधैर्लाघवोत्सृष्टैरुह्यन्तो वाजिभिर्द्रुतम् ॥ २४

C 1 5337
B 1 134 26
K 1 144 37

सचिवै सह, G1 6 स वि°, M5 सवि° — c) T1 G2 3 6 वीत, G1 युक्त (for हीन) — d) T G5 सांगार इव चांशु°; G3 4 सागराग इ°, G6 सागारुरिव (sic) चांशु° Cd cites साङ्गारक (as in text)

19 a) S (except G4) व्यासस्यानुमते चक्रे — c) Ñ1 T1 G1–3.6 M अपि, B5 आह (for अत्र) T1 G1–3.6 M शास्त्रज्ञान् Dn °णास्तु सुम°, D1 °श्चानुम°, D2 °श्चास्रम°, T2 G4 5 °णान्सर्वेशास्त्रज्ञा° — d) Ñ2 B1 Dn D1 कारया° S (except T2 G4 5) मगलै — D4 (marg sec m) S ins after 19 (T2 G5, after 20^{ab})

1411* सुवर्णमणिरत्नानि वस्त्राणि विविधानि च ।
प्रददौ दक्षिणा राजा द्रोणस्य च कृपस्य च ।

[(L 1) D4 M °मणिमुक्तानि G3.6 वसूनि (for वस्त्राणि) G2 4 °स्त्राण्याभरणानि च]

20 a) G2 तत, Dn1 n2 सुख (for अथ) D5 °घोषेण — b) Ś1 K1 मुख्यस्य, T1 G (except G4 5) नाद°, M दान° (for पुण्य°) K2 Ñ1.2 B1 3 Dn D1.2 S समन° — After 20^{ab}, T2 G5 ins 1411* — c) Ś1 K1 °शुश्चि त्रमादाय, T2 G2 4.5 गृहीत्वोपविशु सर्वे — d) Ko 2 4 D5 सर्वोप°, G2 4 रणोप° D1 G6 नृपा

21 a) Ko 3 Ñ3 बद्धतल°, Ñ1.2 B D बद्धागुलि° — b) N (except Ś1 K1 B1) °कक्षा Ñ2 B D T2 G4 5 महारथा — c) G1 बद्धपत्रा, G2 °त्राणा T2 G4 5 °णाश्च सनद्धा

22 a) Ñ B D तु (for च) T1 सर्वे (for तत्र) T2 G4.5 यथाज्येष्ठक्रम तत्र — After 22^{ab}, D4 (marg sec m) S ins

1412* रङ्गमध्ये स्थित द्रोणमभिवाद्य नरर्षभा ।
चक्रु पूजा यथान्याय द्रोणस्य च कृपस्य च ।
आशीर्भिश्च प्रयुक्ताभि सर्वे सहृष्टमानसा ।
अभिवाद्य पुन शस्त्रान्बलिपुष्पै समर्चितान् ।
रक्तचन्दनसमिश्रै स्वयमर्चन्त कौरवा । [5]
रक्तचन्दनदिग्धाश्च रक्तमाल्यानुधारिण ।
सर्वे रक्तपताकाश्च सर्वे रक्तान्तलोचना ।
द्रोणेन समनुज्ञाता गृह्य शस्त्र परतपा ।
धनूषि पूर्वं सगृह्य तप्तकाञ्चनभूषिता ।
सज्जानि विविधाकारा शरै सधाय कौरवा । [10]
ज्याघोषतलघोष च कृत्वा भूतान्यपूजयन् ।

[(L 2) M6–8 transp चक्रु and पूजा — (L 3) D4 स-; M सु (for च) — (L 4) T1 G1 2 4 6 समन्वि°; T2 G4 समन्वित — (L 5) D4 T1 M3 5 °र्चति — (L 6) T1 रक्तचदनधारिण — After line 8, G4 (marg sec m) ins

1413* शस्त्रमार्गान्यथोत्सृष्टाश्चेरु सर्वे नरर्षभा ।

— (L 10) M6–8 °कारै शस्त्रै — (L 11) T1 G4 सर्वभू°; G3 6 °त्वा पूज्याणि D4 M अमोहयन्]

— c) Ś1 °रस्त्रैर् Ś1 Ko T1 °वीरा — d) Ś1 K1 °द्भुता M कुमाराद्भुतदर्शन (M3 sup lin °ना, M5 °राश्चारुदर्शना) — After 22, D4 (marg sec m) S ins

1414* केषांचित्तरुमूलेषु शरा निपतिता नृप ।
केषाचित्पुष्पमकुटे निपतन्ति स्म सायका ।
केचिल्लक्ष्याणि विविधैर्बाणैराहतलक्षणै ।
विव्यधुर्लाघवोत्सृष्टैर्गुरूणि च लघूनि च ।

[(L 1) T2 G4.5 तत्र माल्ये°; G1 तरुमुख्ये°; G3 M3 5 तत्र मू°, M6–8 तत्र या M6–8 रणे (for नृप) T1 शराग्निनिपतिताग्र° (sic) — (L 2) T2 G4.5 टेप्वासक्ता बाणपक्तय — (L 3) D4 °णैरात्तशरासनै, T1 G2 3 M3 5 °राहि° (M3 sup lin °राह°), T2 G4.5 णैर(T2 °रा)हित लक्षणा — (L 4) T1 G1 2 6 M3.5 बिभिदुर् (for विव्यधुर्)]

23 T1 G1 om 23^{a}–24^{b} — a) K3 T2 G5 °च्छिर.क्षे° — c) Ś1 K D5 मनुष्या — d) Ś1 K1 Dn D1 M3 सुविस्मिता, Ñ1 2 B3 6 सुवि°

24 T1 G1 om 24^{ab} (cf v l 23) — a) K3 ततो (for ते स्म) K Ñ B1 Dn D5 T2 G (G1 om) M3 5 बिभिदुर् (K2 बहुभिर्) — b) Ñ2 °शोभनै — c) M6–8 विविधुर् K3 °वोपेतै T1 G1 °धैर्बाणसवर्षै; G3 केचि द्भुज्ञायुधोत्सृष्टै (sic) — d) T G (except G2 6) °ह्यते

तत्कुमारबलं तत्र गृहीतशरकार्मुकम् ।
गन्धर्वनगराकारं प्रेक्ष्य ते विस्मिताभवन् ॥ २५
सहसा चुक्रुशुस्तत्र नराः शतसहस्रशः ।
विस्मयोत्फुल्लनयनाः साधु साध्विति भारत ॥ २६
कृत्वा धनुषि ते मार्गान्रथचर्यासु चासकृत् ।
गजपृष्ठेऽश्वपृष्ठे च नियुद्धे च महाबलाः ॥ २७
गृहीतखड्गचर्माणस्ततो भूयः प्रहारिणः ।
त्सरुमार्गान्यथोद्दिष्टांश्चेरुः सर्वासु भूमिषु ॥ २८
लाघवं सौष्ठवं शोभां स्थिरत्वं दृढमुष्टिताम् ।
ददृशुस्तत्र सर्वेषां प्रयोगे खड्गचर्मणाम् ॥ २९
अथ तौ नित्यसंहृष्टौ सुयोधनवृकोदरौ ।
अवतीर्णौ गदाहस्तावेकशृङ्गाविवाचलौ ॥ ३०
बद्धकक्ष्यौ महाबाहू पौरुषे पर्यवस्थितौ ।
बृंहन्तौ वाशिताहेतोः समदाविव कुञ्जरौ ॥ ३१
तौ प्रदक्षिणसव्यानि मण्डलानि महाबलौ ।
चेरतुर्निर्मलगदौ समदाविव गोवृषौ ॥ ३२
विदुरो धृतराष्ट्राय गान्धार्यै पाण्डवारणिः ।
न्यवेदयेतां तत्सर्वं कुमाराणां विचेष्टितम् ॥ ३३

इति श्रीमहाभारते आदिपर्वणि चतुर्विंशत्यधिकशततमोऽध्यायः ॥ १२४ ॥

---

25 d) T1 G1 प्रेक्षिता, G2 3 6 M प्रेक्षका Ś1 K1 विस्मय युतु, D1 °ताभवा T2 G4 5 प्रेक्ष्य सर्वे सविस्मया

26 a) Ñ B D °शुश्चान्ये (D4 °त्र) G3 नागरा विविशुस्त° — b) S (except M3) शतशोथ सह° — d) T2 G4 नागरा ; M प्रेक्षका (for भार°) T1 G1-3 6 प्रेक्षका साधु साध्विति (G3 विस्मिता)

27 G2 om 27^{bc}, D1 om 27^{b}–28^{a} — b) M6-8 वा (for च) T2 G4 5 यथाचार्यानुशासनं

28 D1 om 28^{abc} (cf v 1 27) — a) T2 G (except G2 6) गृहीत्वा K3 °चापधरा°, T G (except G3) माणि (T1 °माण) — c) T G1-3 5 6 खड्गमार्गान् G4 सहसा मार्गणोत्सृष्टा — d) T2 G4 5 °रु सर्वे नरर्षभा

29 a) D2 स्थितां (for शोभां) — b) T2 G4 5 सुस्थितिं (for स्थिर°) — c) Ś1 वीराणां (for सर्वे°) — d) K0 3 Ñ B D प्रयोग; T1 G1 3 6 M6 7 8 °गात्; T2 G3-5 M5 6 °गान् K3 G1 °चर्मण ; Ñ B D (except D2) °णो ; G3 M6-8 °णि

30 a) K0 3 D3 T1 G1 3 M6-8 °संरब्धौ; K1 °सन्न°; Ñ1 °सह ; B3 Dn D1 संहृ°; T1 G1-3 6 °संयुक्तौ M5 7 अथ संयुक्तौ — b) K0 3 D1 4 दुर्योधन ; T2 G4 वृकोदरसुयोधनौ — c) G3 अपि तीर्णौ — d) Ś1 महागौ पर्वताविव; K1 T2 G4 5 महाशृङ्गाविव पर्वतौ, G6 द्विशृङ्गाविव पर्वतौ

31 a) N (except Ś1 K1) T1 G3 °कक्षौ (K1 °कक्षा); G2 °सन्नद्धौ; G4 युद्धसज्जा K0 D1 महाकायौ — b) D1 समय° — c) Ś1 K0 3 B D (except Dn3) T2 G3-6 गृहन्तौ; K1 वृहन्तौ: K3 गृहीतौ, K4 गुरुतौ; T1 वमतौ; G1 गृहतौ, M2 गृध्नतौ N (except K1) वाशिता°

32 D1 om 32 G2 repeats 32^{cd} (with v 1) — c) Ñ3 Dn मण्डलगतौ; T2 G4 निर्मलावेतौ; G2 (first time) 6 चपलगतौ; G2 (second time) M2 5 °गतौ; Nilp as in text — d) T2 G2 (second time) 4 5 सदर्पाविव; M °शृङ्गा° Ñ B D (except D2) T1 G (except G4 5) कुञ्जरौ (for गोवृ°); cf 13^{d}

33 a) G6 transp विदु° and धृत° — b) Ñ B Da Dn D1 4 (before corr) गांधार्यां S च महामतिः; Cd पांडवारणि (as in text) — c) K2 D6 S न्यवेदयत Ś1 K1 3 4 D1 तां सर्वां — d) D2 पांडवानां (for कुमा°) Ś1 कृतांजलि ; K1 3 4 D3 कृताञ्जली; G6 च चेष्टित

Colophon. *Major parvan* T2 G M सम्भव° (for आदि°) — *Sub-parvan* T1 सम्भव Ś1 K Ñ B Da Dn D2 4 5 (all om sub-parvan name) mention only अस्त्र (K1 om अस्त्र; Ñ1 2 B3 6 Da D4 शिक्षा; B1 6 अस्त्रशिक्षा) दर्शन — *Adhy name* K0 रङ्गप्रवेश ; G2 रङ्गावतरण — *Adhy no* (figures, words or both) K2 *sup lin* 119, B1 131, B4 T1 127, Dn2 133, D1m 135, T2 G2 3 M 77, G1 4 6 78, G5 79 — *S'loka no* Dn 35, M3 45 — *Aggregate s'loka no* Dn2 5345

125

1 Ś1 K1 2 D3 S om उवाच — a) Ñ1 2 B D (except D1) हि, T1 G2 तु (for च) T2 G1 4 5 दुर्योधनो पराक्रम्य — c) G2 °स्नेहात — d) K0 2 Da D1 4 G1-3 M2 4 द्विधैवा°

2 a) Ś1 K D1 हे वीर; Ñ2 3 B1 3 Da ही वीर; S जय हे T2 गुरवे वीर; G4 5 गुरुवीरेति — b) Ś1 K D1 हे भीम; Ñ2 3 B1 3 Da Dn(?) ही भीम; S जय हे ॐ Nil

१२५

वैशंपायन उवाच ।

कुरुराजे च रङ्गस्थे भीमे च बलिनां वरे ।
पक्षपातकृतस्नेहः स द्विधेवाभवज्जनः ॥ १
हा वीर कुरुराजेति हा भीमेति च नर्दताम् ।
पुरुषाणां सुविपुलाः प्रणादाः सहसोत्थिताः ॥ २
ततः क्षुब्धार्णवनिभं रङ्गमालोक्य बुद्धिमान् ।
भारद्वाजः प्रियं पुत्रमश्वत्थामानमब्रवीत् ॥ ३
वारयैतौ महावीर्यौ कृतयोग्यावुभावपि ।
मा भूद्रङ्गप्रकोपोऽयं भीमदुर्योधनोद्भवः ॥ ४
ततस्तावुद्यतगदौ गुरुपुत्रेण वारितौ ।
युगान्तानिलसंक्षुब्धौ महावेगाविवार्णवौ ॥ ५
ततो रङ्गाङ्गणगतो द्रोणो वचनमब्रवीत् ।
निवार्य वादित्रगणं महामेघसमस्वनम् ॥ ६
यो मे पुत्रात्प्रियतरः सर्वास्त्रविदुषां वरः ।
ऐन्द्रिरिन्द्रानुजसमः स पार्थो दृश्यतामिति ॥ ७
आचार्यवचनेनाथ कृतस्वस्त्ययनो युवा ।
बद्धगोधाङ्गुलित्राणः पूर्णतूणः सकार्मुकः ॥ ८
काञ्चनं कवचं बिभ्रत्प्रत्यदृश्यत फल्गुनः ।
सार्कः सेन्द्रायुधतडित्ससंध्य इव तोयदः ॥ ९
ततः सर्वस्य रङ्गस्य समुत्पिञ्जोऽभवन्महान् ।
प्रावाद्यन्त च वाद्यानि सशङ्खानि समन्ततः ॥ १०
एष कुन्तीसुतः श्रीमानेष पाण्डवमध्यमः ।
एष पुत्रो महेन्द्रस्य कुरूणामेष रक्षिता ॥ ११
एषोऽस्त्रविदुषां श्रेष्ठ एष धर्मभृतां वरः ।　C 1 5353 B 1 135. 12 K. 1 145. 13

हा भीमेत्यपपाठ ।☸ K1 इति च नदन, K3 इति स्तुन्वतां, Ñ1 2 B D इति जल्पता (D5 कुरुनदन), Ñ3 इति नर्दतां, S भीम इत्युत — cd) T2 G3 4 5 °णां °ल °द सहसेरित

3 ab) T1 G2 क्षुब्धतर (G2 °तरस्) तत्र, T2 G1.4–6 M °र्णवसम Ś1 क्षुब्धार्णवनिभ रगं समालोक्याथ बुद्धि°

4 Before 4, Ñ Dn D1 4 ins द्रोण उ° — a) Ñ3 T2 G3 5 M3 वारयेता G1 महाभागौ, M6–8 °वीरौ — b) D2 कृतयोगौ, T2 G3 4 5 °विद्यौ G2 4 इह (for अपि) — c) K3 रगविभेदोय, T1 G2 रगस्य कोपोय, G3 °प्रकारोयं T2 G5 पुत्र मा रगकोपो भूत् — d) T2 G5 वृकोदरसुयोधनौ. — After 4, D4 (marg sec m) 5 S ins

1415* तत उत्थाय वेगेन अश्वत्थामा न्यवारयत् ।
गुरोराज्ञा भीम इति गान्धारे गुरुशासनम् ।
अल योग्याकृत वेगमल साहसमित्युत ।

[Before line 1, D4 ins वैश° उ° — (L 1) D4 उत्थाय सहसा — (L 2) T1 °राज्ञा हि महती—कुरु शासन — (L 3) D4 G3 4 शिक्षाकृत, G3 योग्यौ कृत D4 रग, T1 शिक्षां, G1 2 योग (for वेग)]

5 Before 5, Ñ3 Dn D1 ins वैश° उ° — c) K2 Da1 D5 युगातानल, M3 5 युगात इव Ko 2 D5 रब्धौ, K1 लब्धौ, K4 क्रुद्धौ (for क्षुब्धौ) — d) K3 Ñ B D (except D2 5) महावेलौ T2 G5 वेलयेव महार्णवौ

6 a) Ś1 K1 रगार्णव°, S (except T2 G3 5) रगाकण° — c) Ś1 K4 D5 T2 G4 5 वादित्ररव, K1 °वरं — d) Ś1 K Ñ2 B5 Dn D1 5 T1 G1.6 M6–8 °निभस्वन, T2 G3 4 5 तदा मेघसम(T3 °रव)स्वन

7 Before 7, T1 M6–8 ins द्रोण — b) Dn D1 सर्वशस्त्रविशारद — c) G2 °नुजयल, M7 °स्मजसम, Cd as in text

8 a) T1 G1 2 6 °वचनात्सोथ, T2 G4 5 M °वचनस्याते — d) K4 सतूण सज्जकार्मुक

9 b) Ś1 फल्गुण, Ko 2–4 Ñ B D (D4 before corr) M6–8 फाल्गुन, K1 G2 फल्गुन (K1 °ण), T2 G4 5 पाडव — c) Da G1 सार्क; G4 अर्क, G6 एक

10 a) K3 सर्वस्य लोकस्य — b) K3 सविस्मयभवत्तदा, Dn T1 G1 2 समुत्पिजलकोभवत्, D5 °त्पिण्डो महानभूत्, T2 °त्पचलकोभवत्, G3 6 M °त्पिज(M6–8 °ग)लिकोभवत्, G4 5 °त्पिच्छ(G5 °च)लकोभवत् Cd cites समुत्पिज (as in text) — c) Ś1 K1 3 B5 D1 प्रवाद्यत, K2 4 B1 3 अवा° S वादित्राण्यप्य(T2 G2 4 5 °णि प्र; G1 °प्यस्य, M °णि च)वाद्यत (M °ते) — d) K1 शखाश्चैव Ko 2 D5 च सर्वश (for सम°) T2 G2 4 तत शखानि सर्वश

11 Before 11, D2 S (except G1 4) ins प्रेक्षका (D2 cont. ऊचु) — a) K3 पाडुसुत — b) Ñ1 2 B1 3 Dn D1 2 मध्यमपाडव (by transp) — c) K2 महेंद्राय — d) Ko एव, Ñ1 एक, M6–8 परि- (for एष)

12 a) Ś1 ज्येष्ट, Da लोके — b) T1 [ऽ]प्येष Ko 2 धर्मविदा — c) T2 G3 4 5 °वतामग्र्य (T2 G5 °अ)

एष शीलवतां चापि शीलज्ञाननिधिः परः ॥ १२
इत्येवमतुला वाचः शृण्वन्त्याः प्रेक्षकेरिताः ।
कुन्त्याः प्रस्नवसंमिश्रैरस्रैः क्लिन्नमुरोऽभवत् ॥ १३
तेन शब्देन महता पूर्णश्रुतिरथाब्रवीत् ।
धृतराष्ट्रो नरश्रेष्ठो विदुरं हृष्टमानसः ॥ १४
क्षत्तः क्षुब्धार्णवनिभः किमेष सुमहास्वनः ।
सहसैवोत्थितो रङ्गे भिन्दन्निव नभस्तलम् ॥ १५

विदुर उवाच ।

एष पार्थो महाराज फल्गुनः पाण्डुनन्दनः ।
अवतीर्णः सकवचस्तत्रैष सुमहास्वनः ॥ १६

धृतराष्ट्र उवाच ।

धन्योऽस्म्यनुगृहीतोऽस्मि रक्षितोऽस्मि महामते ।
पृथारणिसमुद्भूतैस्त्रिभिः पाण्डववह्निभिः ॥ १७

वैशंपायन उवाच ।

तस्मिन्समुदिते रङ्गे कथंचित्पर्यवस्थिते ।
दर्शयामास बीभत्सुराचार्यादस्त्रलाघवम् ॥ १८
आग्नेयेनासृजद्वह्निं वारुणेनासृजत्पयः ।
वायव्येनासृजद्वायुं पार्जन्येनासृजद्घनान् ॥ १९
भौमेन प्राविशद्भूमिं पार्वतेनासृजद्गिरीन् ।
अन्तर्धानेन चास्त्रेण पुनरन्तर्हितोऽभवत् ॥ २०
क्षणात्प्रांशुः क्षणाद्ध्रस्वः क्षणाच्च रथधूर्गतः ।
क्षणेन रथमध्यस्थः क्षणेनावापतन्महीम् ॥ २१
सुकुमारं च सूक्ष्मं च गुरुं चापि गुरुप्रियः ।
सौष्ठवेनाभिसंयुक्तः सोऽविध्यद्विविधैः शरैः ॥ २२
भ्रमतश्च वराहस्य लोहस्य प्रमुखे समम् ।
पञ्च बाणानसंसक्तान्स मुमोचैकबाणवत् ॥ २३

— d) K3 शीलज्ञानविधौ, K4 सत्यज्ञानविधि T1 G1.2.6 M शीलरत्ना(G3 °परमां)स्त्रोर्जुन° (T1 °ज्वल°); T2 G3.4.5 एष ज्ञानवता पर (T2 G5 निधि°) — After 12, T2 G1.2.4.5 ins

1416* एष कलयितद्रस्य साक्षात्प्राणसम सखा ।
एष यत्प्रतिज्ञाताति तस्य पार गमिष्यति ।

13 Before 13, T1 G1.2.3.6 M ins वैश° — a) Ñ3 B1 Dn D4.5 सुतुला; B3 Da सतुला; T1 मधुरा (for अतुला) — b) Ñ3 Dn D1.4 शृण्वत्या — c) Ś1 K4 Ñ1 G3 प्रसव; K0 Ñ2 °स्रव; K3.4 D1.2 स्रव, D1 °स्नव; D5 °स्राव (for प्रस्रव) K0.2 संक्लिष्ट; Ñ2.3 B D (except D1) मयुक्त; T2 G2 °समिश्र, G4 °संयुक्त (for संमिश्रै°) — d) K0.2 पय सिक्त; K4 अश्रुपूर्ण; D4 अर्धे सिक्त B6 D4 क्लिन्नोपरोऽभवत्

14 D1 om 14ab — b) K1 T1 °रथाभवत् — c) Arjp नरश्रेष्ठ

15 Before 15, S (except M1) ins धृतराष्ट्र° T2 (sup lin) om 15–16 and धृत उ° (in 17) — a) K4 S (except G2, T2 om) °र्णवसम — b) K0.2–4 D1.2 T1 G1–3 सुमहास्वना — c) Ś1 दिशाश्च प्रदिशश्चैव; K1 शृणुते सुमहासाहो; G2 °वोत्थितः रंग — d) D2 भिन्दति च Ś1 K3 G1.2 T1 M (except M4) नभस्थलं G2 विभिद्गगनस्थलम्.

16 K1 Ś om उवाच T2 om 16 (cf v. l. 15) — a) K1 महाभाग; K3 Ñ1 G1.2.6 °बाहु; B2 °वीर्य; T1 °बाहो — b) Ś1 K1 फल्गुन; K0.2–4 Ñ B D (except D1) G2.6 फाल्गुन; T1 G1 M कौंतेय Ś1 जयतां वरः — c) Ś1 अस्त्रलाघवदर्शयंस्त्रि; K1 अस्त्राणि दर्शयन्वीर — d) K0 तत्रैव, K1 B6 T1 G (except G4) M6–8 °त्रैव; B3 °दैव; D4 °सैव K0.2–4 D1.4.5 सुमहास्वन; S (T2 om) जननिस्वन (cf 15b).

17 Ś1 K1.3 S om उवाच (T2 om the ref). — b) T1 G1 कृतार्थोस्मि; M5.6 विदुराद्य (for रक्षितो°)

18 Ś1 K1.3 D2.5 S om उवाच; K4 M5 om the ref. — a) K0.2.4 Ñ B D T G प्रमुदिते; K3 पर्यु° — b) Ñ1.2 B6 Da Dn D1 प्रत्यु°; Ñ3 पर्यु°; B1.2.3 D2.4 प्रस्व° (for पर्य°) — c) K0.2.4 Ñ B D °योयास्त्र°

19 b) T1 G1 °सृजज्जल. — c) S वायव्याद् — d) K3.4 G3.6 पर्जन्येन; T1 G1.2 M °न्यात्

20 a) Da1 चाविशद्; T1 अवसृजद्; T2 G4–6 M °सृजद्; G1 अप्यसृजद्; G2 त्वसृजद् — b) Ñ B1 (m as in text) 3 Dn D1 T2 G4 M4 अभवद्गिरि.; B3 D2.4 T1 G1.2.3.6 असृजद्गिरिं; M6–8 अपि पर्वतान् — d) K1 पुन मोंतर्हितो

21 a) Ñ3 transp प्रांशु and ह्रस्व — b) T2 G4 क्षणेन (cf c) Ś1 K1 रथपूर्वत; T1 (sup lin) G1 °मार्गत; G2 °युग्मस्त — c) Ś1 K1 क्षणाच्च (cf. a). — d) Ś1 K0.2.4 T1 G1 अव(Ś1 °ध)पतन् Ñ B D अपतरन् (D1 अभ्यापतन्); T2 G4 अभ्यपतन्

22 a) K3 तु (for the first च) S °मारत सूक्ष्म(T2 G2.3.6 M4 सूर; M5 6–8 वीर)श्च — b) T G गुरुभारि; M

गव्ये विषाणकोशे च चले रज्ज्ववलम्बिते ।
निचखान महावीर्यः सायकानेकविंशतिम् ॥ २४
इत्येवमादि सुमहत्खड्गे धनुषि चाभवत् ।
गदायां शस्त्रकुशलो दर्शनानि व्यदर्शयत् ॥ २५
ततः समाप्तभूयिष्ठे तस्मिन्कर्मणि भारत ।
मन्दीभूते समाजे च वादित्रस्य च निस्वने ॥ २६
द्वारदेशात्समुद्भूतो माहात्म्यबलसूचकः ।
वज्रनिष्पेषसदृशः शुश्रुवे भुजनिस्वनः ॥ २७
दीर्यन्ते किं नु गिरयः किं स्विद्भूमिर्विदीर्यते ।
किं स्विदापूर्यते व्योम जलभारघनैर्घनैः ॥ २८
रङ्गस्यैवं मतिरभूत्क्षणेन वसुधाधिप ।
द्वारं चाभिमुखाः सर्वे बभूवुः प्रेक्षकास्तदा ॥ २९
पञ्चभिर्भ्रातृभिः पार्थैर्द्रोणः परिवृतो बभौ ।
पञ्चतारेण संयुक्तः सावित्रेणेव चन्द्रमाः ॥ ३०
अश्वत्थाम्ना च सहितं भ्रातॄणां शतमूर्जितम् ।
दुर्योधनममित्रघ्नमुत्थितं पर्यवारयत् ॥ ३१
स तैस्तदा भ्रातृभिरुद्यतायुधै-
र्वृतो गदापाणिरवस्थितैः स्थितः ।
बभौ यथा दानवसंक्षये पुरा
पुरंदरो देवगणैः समावृतः ॥ ३२

C. 1 5378
B. 1 135. 32
K. 1. 145. 33

इति श्रीमहाभारते आदिपर्वणि पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥

गुरुसेवी (M5 नित्य चापि) — c) D5 लाघवेन Ko Da D5 G2 4 अपि, G6 हि (for अभि-) Ñ1 2 B5 m 6 Da Dn D1 °सक्षिप्त — d) M5 निशितै शरै For 22d, G1 reads 23d, repeating it in its proper place

23 a) T2 G2 4 भ्रमरस्य K2 बहुसत्र (for वराह°) G1 भूताश्वेतवराहाणां — b) K1 Da Dn2 n8 D4 (before corr) लौहस्य, K2 विह°, D1 लौम°, D4 (by corr) लोक°, T1 G1 5 M सिंह°, T2 G2 4 काक°, G6 वाह° K1 प्रमुखी, T2 G2 4 5 च मुखे K2 स्थित , G6 स्थिति° — c) Ko 2 D5 वाणशतान् राजन्, K1 वाणा सुससक्ता, K3 4 वाणान्सु(K4 °णांस्तु)स°, N1 2 B1 5 D2 वाणान्सुसयुक्तान्, B3 Da T G वाणानसयु° — d) K2 प्र-; Ñ B6 Dn1, n2 स- (for स) T2 G2 4 5 निचखानैकवाण° G1 repeats 23d here (cf v 1 22)

24 a) Ñ1 मध्ये, G2 गवो, M6–8 गोप्ये (for गव्ये) B6 Da S (except G1 6) विषाणे Some MSS -कोषे — b) Ko 3 रज्वावल°, Ñ1 बस्त्रावल°, Ñ2 B (except B6) Dn D1, 2 4 5 °लम्बिनि, Da रज्वावलम्बिनि S वालरज्वा(M8 °ज्व)वल° — c) G6 M7 महावीर

25 a) Ś1 Ko 1 3 Da D5 °मादिषु (for °मादि सु) K (except K3) महान् (K4 सुमहान्) T2 G2 4 5 एवमादि महावीर्ये — b) K2 Ñ B1 3 6 D (except D5) T2 G4 5 चानघ (D2 T2 G4 5 °घ), B5 लाघव (for चाभवत्) — c) T2 गदया, G4 लीलया, G5 गदाया Ś1 शास्त्रकुशलो, Ko चापि कु°, K2–4 Ñ B6 D2 S चा(Ñ1 M5 अ)स्त्र° — d) Ko 2 3 Ñ3 दर्शनान्स, Ñ1, 2 B D मडलानि, T G M6–8 दर्शकानां, M3 5 नानायोग्या Ñ2 Dn2 ह्यदर्श°; Dn1 n8 D1 T1 G1 3 6 M6–8 प्रदर्शयन् (Dn1 n8 °त्); T2 G2 4 5 M3, 5 अदर्शयत् Cd cites दर्शनाद् (? read दर्शनान्) — After 25, S ins

1417* चक्रतोमरपाशाना भिण्डिपालपरश्वधाम् ।
अन्येषां चापि शिक्षाणा दर्शयामास लाघवम् ।

[(L 1) T G2 4–6 °परश्वधै — (L 2) T2 G4–6 च महाशिक्षा, G3 चापि शस्त्राणा]

26 a) Ś1 K2 समाप्ते भू°, Cd as in text — b) T2 G4 5 °णि चानघ — c) T2 हर्षीभूते, G5 हर्षे°, G6 महा° Ś1 K1 समाजेत्र — d) D5 T1 वादित्राणा च, G1 वादित्रस्वन- Some MSS नि:स्वने

27 b) Ñ1 2 °सूचन: K3 सुमहानिस्वनस्तदा — After 27ab, Ko 2 D5 ins

1418* स शब्द सुमहानासीत्पूरयन्निव रोदसी ।

— cd) K3 D2 T2 G5 शुश्राव, Da श्रूयते (for शुश्रु°). G6 भूरिनिस्वन Some MSS °नि स्वन B5 अस्त्राणाम भयद्धोषो वज्रनिष्पेषनिस्वन

28 a) S (except G3 M5) शीर्यन्ते K3 T2 G4 5 गिरय किंस्वित् (G5 सम्यक्), Ñ3 (by transp) गिरय किं नु — b) G3 स्म दीर्यते, M विशी° B6 Da D4 किंस्वित्सिभिद्यते मही, G1 किं तु स्विद्भूर्विदार्यते — d) Ñ B D जलधाराघनैर् (B5 D2 °धरैर्), G5 °भारवनैर्; G6 °भारस्वनैर्.

29 a) Da गतिरभूत्, G5 समभवत् — c) T2 G2 4 5 M3 5 द्वारस्याभि°

30 a) K3 सर्वे (for पार्थैर्) — c) Ko 2 संवृत: पचतारेण, T2 G4, 5 °तारेण हस्तेन — d) K2 सपूर्ण इव, K4 नाक्षत्रेणेव, Cd सावित्रे° (as in text) T2 G4 5 चद्रमा स्वर्गतो यथा

32 a) G1, 3 तैस्तथा — b) S अवस्थित: बभौ (M

१२६

C. 1. 5357
B. 1. 136. 1
K. 1. 142. 1

वैशंपायन उवाच ।
दत्तेऽवकाशे पुरुषैर्विस्मयोत्फुल्ललोचनैः ।
विवेश रङ्गं विस्तीर्णं कर्णः परपुरंजयः ॥ १
सहजं कवचं बिभ्रत्कुण्डलोद्द्योतिताननः ।
सधनुर्बद्धनिस्त्रिंशः पादचारीव पर्वतः ॥ २
कन्यागर्भः पृथुयशाः पृथायाः पृथुलोचनः ।
तीक्ष्णांशोर्भास्करस्यांशः कर्णोऽरिगणसूदनः ॥ ३
सिंहर्षभगजेन्द्राणां तुल्यवीर्यपराक्रमः ।
दीप्तिकान्तिद्युतिगुणैः सूर्येन्दुज्वलनोपमः ॥ ४
प्रांशुः कनकतालाभः सिंहसंहननो युवा ।
असंख्येयगुणः श्रीमान्भास्करस्यात्मसंभवः ॥ ५
स निरीक्ष्य महाबाहुः सर्वतो रङ्गमण्डलम् ।
प्रणामं द्रोणकृपयोर्नात्यादृतमिवाकरोत् ॥ ६
स समाजजनः सर्वो निश्चलः स्थिरलोचनः ।
कोऽयमित्यागतक्षोभः कौतूहलपरोऽभवत् ॥ ७
सोऽब्रवीन्मेघधीरेण स्वरेण वदतां वरः ।
भ्राता भ्रातरमज्ञातं सावित्रः पाकशासनिम् ॥ ८
पार्थ यत्ते कृतं कर्म विशेषवदहं ततः ।
करिष्ये पश्यतां नृणां मात्मना विस्मयं गमः ॥ ९
असमाप्ते ततस्तस्य वचने वदतां वर ।

°स्थितं) Ko 2 Ñ B D गदाग्रपाणि समवस्थितं गृह (Ko D1 गत, K3 तथा; Ñ2 स्थित) — c) T G स्थितस्तदा; M1 2 यशी तदा T2 G3 4 5 यथा (for पुरा) — d) K2 T1 G1 2 6 M °गर्भेरिवावृत

Colophon *Major parvan* T2 G M सम्भव° (for आदि°) — *Sub-parvan* Ñ1.2 T1 सम्भव, to it Ñ1.2 add अस्त्रदर्शन Ś1 K Ñ2 B Da Dn1 n2 D1 4 5 M1.2 (all om sub-parvan name) mention only अस्त्र(B2 विद्या Da शस्त्र)दर्शन — *Adhy name* Ko अर्जु नास्त्रमोक्षणं; G1 अर्जुनरंगावतरण; M6-8 धनंजयावतार — *Adhy no* (figures, words or both) B1 132, B3 T1 125, Dr1.n3 134, Dm 136, T2 G2.4 M 78, G1.2.5 79, G3 80 — *Śloka no* Dn 32, M2 35 — *Aggregate śloka no* Dn2 5379

126

1 Ś1 K1 2 D1 S om. उवाच — After वैश°, S ins 1419* एतस्मिन्नेव काले तु तस्मिन्जनसमागमे ।
— a) K3 °समाने, Ñ3 पृथापस्नान.. — b) Ś1 Ñ1 2 Dn °लोचन — G3 reads 1c–3d after 7

2 ab) ~1 57 82c, 104 11ab G1 transp सह° and धनु° K2 °लोद्द्योतिताग्र, Ñ1.2 °लोज्ज्वलभूषण — b) K3 °बद्धतूणीर; Ñ2 °बद्धनिस्त्रिंश.. — d) Ś1 K3 पद्भ्यां° T2 G1 3 मास्तादिव दिवाकर

3 a) B (except T1 G1.2) कर्णोऽभवत् (G1 2 °मौर्य) — b) G1 पृथापुत्र महायशाः — G1 om. 3cd, G3 om 3c–7b — c) T1 M6-8 तिग्मांशोर् — d) T1 G1 °बलमर्दन ; T2 G3 4 5 °गणनाशन

4 G3 om 4 (cf v 1 3) — b) B1 Dn D1.5 बलवीर्य, M6-8 तुल्यरूप° — c) Ś1 K (except Ko) B3 6 Dn Dn1 D4 T G2 °गणै

5 G3 om 5 (cf v 1 3) — a) D2 तुल्य (for प्रांशु) — d) K2 4 °स्यात्मसंभव

6 G3 om 6 (cf v 1 3) — b) Ñ2 सर्वं तत् (for सर्वे) K2 4 °सुसमं; B3m °मटप — d) Ś1 K1 om न Ko 2 D2 °दृतमथा°, B1(m as in text) 2 Da D3 4 °दृत इवा°; S (G3 om) नामपूर्वं(T2 G4 5 मूर्ध्ना दद)मथाक° Cd as in text

7 G3 om 7ab (cf v 1 3) — a) T2 G4 5 समाजो; G2 6 समाजे — b) K3 विस्मय, D3 विस्मयात्; G3 निर्गत (for निश्च°) Ś1 भूत°, K1 2 स्थित°; T2 G5 त्रिय°; G1 स्मित° — c) Ko 2.4 B3 Da D3 T2 G6 M1 °गत — After 7, G3 reads 1c–3d

8 a) Ś1 °धीर्येण; K2 4 °घोरेण; Ñ2 Dn D1 °गभीर — b) K1 Ñ2 स्वनेन — M6-8 (hapl) om 8c–10a — c) B1 2 Da3 D2 T2 G2 °ज्ञातः — d) Ś1 सावित्रि..

9 M6-8 om 9 (cf v 1 8), G4 om 9c–13a — Before 9, Ko 2 D4 5 ins कर्ण उ°; M1 2 कर्ण — b) T2 G3 5 सविशेषम् (for विशेषवद्) — d) Ñ1 D1 पार्थ मा (for मात्मना) S (G4 M6-8 om) मा गृहात्मनि विस्मयः

10 M6-8 om 10ab, G4 om 10 (cf v 1. 8, 9) Before 10, D4 ins वैश° उ° — a) G4 यावत् (for ततस्)

यत्रोत्क्षिप्त इव क्षिप्रमुत्तस्थौ सर्वतो जनः ॥ १०
प्रीतिश्च पुरुषव्याघ्र दुर्योधनमथास्पृशत् ।
ह्रीश्च क्रोधश्च बीभत्सुं क्षणेनान्वविशच्च ह ॥ ११
ततो द्रोणाभ्यनुज्ञातः कर्णः प्रियरणः सदा ।
यत्कृतं तत्र पार्थेन तच्चकार महाबलः ॥ १२
अथ दुर्योधनस्तत्र भ्रातृभिः सह भारत ।
कर्णं परिष्वज्य मुदा ततो वचनमब्रवीत् ॥ १३
स्वागतं ते महाबाहो दिष्ट्या प्राप्तोऽसि मानद ।
अहं च कुरुराज्यं च यथेष्टमुपभुज्यताम् ॥ १४

कर्ण उवाच ।

कृतं सर्वेण मेऽन्येन सखित्वं च त्वया वृणे ।
द्वन्द्वयुद्धं च पार्थेन कर्तुमिच्छामि भारत ॥ १५

दुर्योधन उवाच ।

भुङ्क्ष्व भोगान्मया सार्धं बन्धूनां प्रियकृद्भव ।
दुर्हृदां कुरु सर्वेषां मूर्ध्नि पादमरिंदम ॥ १६

वैशंपायन उवाच ।

ततः क्षिप्तमिवात्मानं मत्वा पार्थोऽभ्यभाषत ।
कर्णं भ्रातृसमूहस्य मध्येऽचलमिव स्थितम् ॥ १७
अनाहूतोपसृप्तानामनाहूतोपजल्पिनाम् ।
ये लोकास्तान्हतः कर्ण मया त्वं प्रतिपत्स्यसे ॥ १८

कर्ण उवाच ।

रङ्गोऽयं सर्वसामान्यः किमत्र तव फल्गुन ।
वीर्यश्रेष्ठाश्च राजन्या बलं धर्मोऽनुवर्तते ॥ १९
किं क्षेपैर्दुर्बलाश्वासैः शरैः कथय भारत ।

C. 1 5398
B. 1 136. 20
K. 1 140. 21

T2 G2.5 तस्मिन् (for तस्य) — b) K1–3 B5.6 Da1 Dn1 D1.2.4.5 T G1.6 M5 वर — c) G1.2 °त्क्षिप्त Ñ1.2 B D इवोत्तस्थौ (D5 इवाक्षिप्त) — d) Ñ B D (except D5) क्षिप्र वै (Ñ3 उत्तस्थे), S (G4 om) उत्थित (G1 आस्थित) M3 (inf lin as in text) 5 सर्वशो T1 स तदार्जुन

11 G4 om 11 (of v l 9) — a) K0 Ñ B D G3.6 मनुजव्याघ्र (Ñ1.2 Dn1 D1.5 °घ्र), M3.5 °व्याघ्र T2 G2.5 ह्रीश्च प्रीतिश्च युगपत् — b) K1 T G2.5 °मथाविशत्; K4 °मथाब्रवीत्, Ñ1.2 B D (except D5) °मुपाविशत्, G3 (sup lin as in text) °मयाचत — c) T2 G2.5 बीभत्सो — d) K0.2 Ñ B D क्षणेनान्वा(K0 °न त्वा; Ñ1 °नानु, Ñ2 D4 °नाया; Da °नाभ्या, D1 °नात्मा, D2 °नात्या; D5 °नाथ)विवेश ह, K1 °नान्वाविश नृप, K3 G1 °नान्वा(G1 °न त्वा)विशत्सह, K4 °नान्वावि°, T1 G3.6 M °णेन त्वावि°; T2 G2.5 °णेन समपद्यत

12 G4 om 12 (of v l 9) — a)=21a — b) Ñ3 S (G4 om) °रणस्तदा (T2 G2.5 °रणार्णव) — c) K0 D5 कर्म; B5 तेन (for तत्र)

13 Before 13, T1 G1.2 ins वैश° — G4 om 13ab (of v l 9) — b) Ś1 K Ñ1 D5 पार्थिव (Ñ1 D5 °व, K0 भारत) — cd) T1 G1–3 M तदा मुदा, G6 मुदा तदा For 13cd, T2 G2.5 subst line 2 of 1420* (of v l 15)

14 G4 om 14–15 Before 14, K0.3 Ñ1.2 Dn D1.4 ins दुर्योधन उ°, D5 सुयोधन उ° — b) B6 कामद — c) K0.2 इद्, D2 धन (for अह)

15 G4 om. 15 (of v l 14) Ś1 K1 S om उवाच — a) M6–8 ते (for मे) S (G4 om.) राजन् (for ऽन्येन) Ś1 K Da1 D2 कृतं सर्वं ममेत्येव, Ñ1 °त न सर्वेणान्येन, Ñ2 Dn D1 °तं सर्वमह मन्ये, D4 °त सर्वं च मन्येह, D5 °त सर्वं ममत्वेन — b) Ś1 K Ñ3 D2 तु (for च) S (G4 om) भवता (for च त्वया) Ś1 K1–4 Ñ3 वृणे त्वया (by transp), K0 D5 वृणोमि ते — c) K3 B1.6 G3 तु (for च) — d) Ñ1.2 B D (except D5) °च्छाम्यह प्रभो (B6 D4 प्रिय) — After 15, D4 (marg. sec m) S (except G4.6) ins

1420* एवमुक्तस्तु कर्णेन राजा दुर्योधनस्तदा ।
कर्णं दीर्घाञ्चितभुज परिष्वज्येदमब्रवीत् ।

[Before line 1, D4 M6–8 ins वैश° — (L 2) For T2 G4.5 of v l 13 D4 कर्णं दीर्घभुजाभ्या च]

16 G6 om 16 Ś1 K1 T2 G2.5 M6–8 om उवाच, the rest of S om the ref D5 सुयोधन — a) B5 भुक्त्वा भोगा° — b) M5 यदय (for बन्धू°) G3 भय°, M5 प्रीति° — c) G3 रिपूणा (for दुर्हृ°) — d) M6–8 अविंदत (for अरिं°)

17 Ś1 K1.3 D2.5 S om उवाच — b) B5 transp मत्वा and पार्थो — d) Ś1 K0.1 °मिवोत्थित (K0 °त)

18 Before 18, K0.3 Ñ3 B5.6 D (except D1.2) ins अर्जुन उ°, T1 G1.3 M अर्जुन — a) K1 °दृप्ताना, K2–4 Ñ B D °सृष्टाना, T1 अनादृष्टोपहूताना — b) K0.3 अनाम्नातोप°, Ñ3 B5.6 Da S °जल्पता (G2 अनाभूतोप कल्पता, G5 अप्रश्ने बहु जल्पता); D2 अनापृष्टोथ ज° — c) G3 तत, M (except M3) गत (for हत)

19 Ś1 K1 S om उवाच — ab) Ś1 K1 फल्गुण, K2–4 Ñ B Da Dn D1.2 फा° K0 D4 °सामान्योथवा किं मन्यते

गुरोः समक्षं यावत्ते हराम्यद्य शिरः शरैः ॥ २०

वैशंपायन उवाच ।

ततो द्रोणाभ्यनुज्ञातः पार्थः परपुरंजयः ।
भ्रातृभिस्त्वरयाश्लिष्टो रणायोपजगाम तम् ॥ २१
ततो दुर्योधनेनापि सभ्रात्रा समरोद्यतः ।
परिष्वक्तः स्थितः कर्णः प्रगृह्य सशरं धनुः ॥ २२
ततः सविद्युत्स्तनितैः सेन्द्रायुधपुरोजवैः ।
आवृतं गगनं मेघैर्बलाकापङ्क्तिहासिभिः ॥ २३
ततः स्नेहाद्धरिहयं दृष्ट्वा रङ्गावलोकिनम् ।
भास्करोऽप्यनयन्नाशं समीपोपगतान्घनान् ॥ २४
मेघच्छायोपगूढस्तु ततोऽदृश्यत पाण्डवः ।
सूर्यातपपरिक्षिप्तः कर्णोऽपि समदृश्यत ॥ २५
धार्तराष्ट्रा यतः कर्णस्तस्मिन्देशे व्यवस्थिताः ।
भारद्वाजः कृपो भीष्मो यतः पार्थस्ततोऽभवन् ॥ २६
द्विधा रङ्गः समभवत्स्त्रीणां द्वैधमजायत ।
कुन्तिभोजसुता मोहं विज्ञातार्था जगाम ह ॥ २७
तां तथा मोहसंपन्नां विदुरः सर्वधर्मवित् ।
कुन्तीमाश्वासयामास प्रोक्ष्याद्भिश्चन्दनोक्षितैः ॥ २८
ततः प्रत्यागतप्राणा तावुभावपि दंशितौ ।
पुत्रौ दृष्ट्वा सुसंतप्ता नान्वपद्यत किंचन ॥ २९
तावुद्यतमहाचापौ कृपः शारद्वतोऽब्रवीत् ।
द्वन्द्वयुद्धसमाचारे कुशलः सर्वधर्मवित् ॥ ३०
अयं पृथायास्तनयः कनीयान्पाण्डुनन्दनः ।
कौरवो भवता सार्धं द्वन्द्वयुद्धं करिष्यति ॥ ३१
त्वमप्येवं महाबाहो मातरं पितरं कुलम् ।
कथयस्व नरेन्द्राणां येषां त्वं कुलवर्धनः ।

भवान् — ᵈ) K₀ D₁ धए°, B₁ °धेष्ठांश्च, Cd as in text. Ñ B₂ D (except D₁ ₂) राजानो, B₃ राजन्यान् — After 19 K₀ ₂ ₄ ins.:

1421* धार्यीर्यां मालणा प्रोक्ता वैश्याद्य धनवीर्यतः ।
कमवीर्या स्मृता शूद्रा ब्राह्मणा परमेष्ठिना ।

20 ᵃ) K₁ Ñ₃ B (B₃ m as in text) D दुर्बलायासै°; K₃ धनुर्मार्यं°, K₄ °लार्पे, Ñ₁ ₂ °लार्तांप ; G₃ °स्यै° — ᵇ) K₀ Ñ₁.₂ B₂ D₁ G₂ मद्याशे (Ñ₁ G₂ °श) — ᵈ) Ñ₁ साहरेय Ñ₁ G₂ ₆ निते (for शिर) K₄ T₂ G₂ transp. शिर and शरे

21 ᶜ) K₁ ₂ T₂ G₂ M₂–₃ om. उवाच; the rest of S om the ref — ᵇ)–12ᵃ — ᵈ) Ñ₁.₂ B₃ D₄ ₅ T₁ G₁ °वाभिष्टो, G₃ °वाभ्विष्ट, G₂ °भरमाष्लि°; G₃ °ष्लिष्टे ; Cd as in text

22 ᵇ) K₀ भ्राता च; Ñ₁ मद्राग ; D₂ G₂ सभ्राता — ᶜ) D₁ G₁ ₂ ₄ ₆ सत ; T₁ G₁ तदा (for स्थित)

23 ᵃ) K₀ °द्युदान्द ; K₄ °द्युत्स्वनितं, Cd as in text — ᵇ) Ñ₁ ₂ B D M C₁ °तमे — ᵈ) K₀ ₃ °मालिभि°; T₂ G₁ ₄ पुरंदरपुरोगमैः ; G₁ ₃ °भासिभिः

24 ᵃ) T₂ G₁ ₄ ₅ M₂ ₃ सुतस्नेहा° — ᵇ) K₄ °लेकिन, Ñ₁ च रणो°; T₂ G₁.₂ ₄ ₆ (inf. lin as in text) °लोकन — ᶜ) T₁ भास्करेणाप्यथ नून (sic). — ᵈ) M₂ ₃ समी पस्थागतानथ

25 ᵃ) K₁ मत्र°; M₂–₃ °च्छायाय° Ś₁ ते; K₁ T₁ G₁ ₂ ₆ M च (for तु) D₂ D₄ °भगूढ ; T₂ G₂ ₄ ₆ °गूढातमा — ᵇ) K₀ ₃ फाल्गुन ; K₁ फल्गुन ; Ñ₁.₃ B D (except D₃) फा(D₃ फ)ल्गुन° — ᶜ) Ś₁ °क्षिप्त°, B₃ °गुप्त , S °व्यक्त , Cd as in text — ᵈ) K₁ समपश्यत; K₂.₄ परिदृश्यते

26 ᵃ) K₀ कृपो भीष्मो यत पार्थो — ᵈ) K₀ भारद्वाजस्ततो°, T₁ G₁ ₂ पार्थो यत्र ततो°

27 ᵇ) K₀ °भवर्तत — ᶜ) Ñ₁ ₂ B (except B₃) D₂ D₃ T₂ G₃ °राज°, T₁ G₁–₄.₆ M कुन्ती° — ᵈ) T₂ G₁.₃ सा (for ह)

28 ᵃ) K₁ ततस्तां; G₂ तां तदा N (except Ś₁ K₀ ₄) G₂.₄ मोहमापन्नां; M₂.₄ °सविग्नां — K₃ om. 28ᶜ–30ᵇ, M₂–₃ (hapl.) om. 28ᶜ–30ᵈ — ᵈ) Ś₁ K (K₃ om.) Ñ B D₂ D₃ D₁ ₂ प्रेष्याभिश्चन्दनोदकैः (Ñ₃ वारिभि सुष्पश्रितार्क्षैर); D₄ S (M₂–₃ om.) प्रोक्ष्य चन्दनवारिणा (G₂.₆ M₁ ₄ °भि), D₂ °नोदकैः

29 K₃ M₂–₃ om. 29 (cf. v. l. 28) — ᵃ) Ñ₁ °प्राणेयम् — ᵇ) Ñ₃ transp. तौ and उभौ K₀ Ñ₁ ₂ B D (except D₃) T₁ °पुर्भौ परिद° Cd cites (only) दंशितौ (as in text) — ᶜᵈ) K₀ Ñ₁ ₂ B D सुसंभ्राता (D₃ °त्ता) T₂ G₁ ₃ पुत्रावज्ञाततत्त्वार्थौ पीडिता सा व्यपेक्षत

30 K₃ om. 30ᵃᵇ, M₂–₃ om. 30 (cf. v. l. 28) — ᵃ) K₃ °धनुषौ दृष्ट्वा; B₃ °यतौ महावीर्यौ; T₂ G₁.₃ धनुष्मा(T₂ तावुभा)वुपसंन्यानौ

31 ᵃ) K₃ ₄ अथ पृथासुत कर्ण( )

32 ᵃ) T₁ G₂ M किं च; T₂ G₃ ₄ ₆ येना; G₁ किंचित् (for येषां) G₂ ₄ (before corr.) च; G₂ (before corr.) स्व (for त्व) Ñ B₁.₂ ₆ D₂ D₃ ₄ G₄ °भूषण ; D₁ D₂.₄

ततो विदित्वा पार्थस्त्वां प्रतियोत्स्यति वा न वा ॥३२

एवमुक्तस्य कर्णस्य व्रीडावनतमाननम् ।
बभौ वर्षाम्बुभिः क्लिन्नं पद्ममागलितं यथा ॥ ३३

दुर्योधन उवाच ।

आचार्य त्रिविधा योनी राज्ञां शास्त्रविनिश्चये ।
तत्कुलीनश्च शूरश्च सेनां यश्च प्रकर्षति ॥ ३४
यद्ययं फल्गुनो युद्धे नाराज्ञा योद्धुमिच्छति ।
तस्मादेषोऽङ्गविषये मया राज्येऽभिषिच्यते ॥ ३५

वैशंपायन उवाच ।

ततस्तस्मिन्क्षणे कर्णः सलाजकुसुमैर्घटैः ।
काञ्चनैः काञ्चने पीठे मन्त्रविद्भिर्महारथः ।
अभिषिक्तोऽङ्गराज्ये स श्रिया युक्तो महाबलः ॥३६
सच्छत्रवालव्यजनो जयशब्दान्तरेण च ।
उवाच कौरवं राजा राजानं तं वृषस्तदा ॥ ३७
अस्य राज्यप्रदानस्य सदृशं किं ददानि ते ।
प्रब्रूहि राजशार्दूल कर्ता ह्यस्मि तथा नृप ।
अत्यन्तं सख्यमिच्छामीत्याह तं स सुयोधनः ॥३८
एवमुक्तस्ततः कर्णस्तथेति प्रत्यभाषत ।
हर्षाच्चोभौ समाश्लिष्य परां मुदमवापतुः ॥ ३९　　C. 1. 5418　B. 1. 136. 41　K. 1. 140. 40

इति श्रीमहाभारते आदिपर्वणि षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥

T2 G2.5 °भूषण, T1 G1.3.6 M भूषये कुल — c) T1 G1.3.6 M च (for त्वा) — After 32, K0.3.4 Ñ B D ins

1422* वृथाकुलसमाचारैर्न युध्यन्ते नृपात्मजा ।

33 Before 33, Ś1 K1.3 D2.5 S ins वैश°, K0.2.4 Ñ B Da Dn D1.4 वैश° उ° — b) T2 G2.4.5 व्रीडयानत° — c) K0.4 Ñ2 B D (except D5) G3 वर्षाम्बुविक्लिन्न (G3 °वक्लिन्न, B6 °वक्लिन्न); Ñ1 वर्षाद्युतिक्लि°, Ñ3 T1 G1.2.6 °म्बुदक्लि°, T2 G4.5 हेमांम्बुसक्लि°, M3.5 °म्बुसक्लि°, M6-8 मेघसुसक्लि° — d) K3 D5 °मालिंगित; G1 °मालोलित

34 Ś1 K1 D5 S om उवाच — b) Ś1 शास्त्रविचारणे, Ñ1 चात्र वि°, S धर्मवि° — c) Ñ Dn M3 सत्; D2 स, Cd तत् (as in text) T2 धीर°, M3.5 वीर° (for शूर°) — d) K0.3 Ñ B (except B5) D (except D5) transp सेनां and यश्च — After 34, D4 (marg sec m) S ins.

1423* अद्भ्योऽग्निर्ब्रह्मत क्षत्रमश्मनो लोहमुत्थितम् ।
तेषां सर्वत्रग तेज स्वासु योनिषु शाम्यति ।
[= Manu 9 321 — (L. 1) G3 ब्रह्मण ; G6 ब्राह्मण. — (L. 2) T1 सर्वगत]

35 a) K2.4 यथाय Ś1 K1 फल्गुणो, K0.2-4 Ñ B D (except D4) T2 फा°. G6 य फल्गुनो हि युद्धेन — b) G6 राज्ञा योद्धुमिहेच्छति — d) T1 G1.3 M राजा (for मया) M6-8 राज्ञो (for राज्ये) K2-4 °षेचित°, T1 G1.3.6 M6.7 °षिच्यता — T (T2 om lines 3-4) G M5 ins after 35 D2.4 (marg sec m) M3.6-8 (the latter three om. lines 3-4), after वैश° (of the foll st.)

1424* ततो राजानमामन्त्र्य गाङ्गेय च पितामहम् ।
अभिषेकस्य संभारान्समानीय द्विजातिभिः ।
गोसहस्रायुत दत्त्वा युक्ताना पुण्यकर्मणाम् ।
अर्होऽयमङ्गराज्यस्य इति वाच्य द्विजातिभि ।
[(L 3) D2 °स्रादिक, G2 °स्रयुत. G2.4.5 द्विजाना (for युक्ता°). — (L. 4) D4 G2.4.5 °स्य द्विजातिभिरिती (G4.5 °भिरथे)रित]

36 Ś1 K1.3 M6-8 om उवाच, D2 T G M5 om the ref — After वैश°, D2.4 (marg sec m) M3.6-8 ins 1424* (cf v l. 35). — T2 M6-8 om 36[abcd] — a) G2.4.5 तथा (for ततस्) — d) S (T2 M6-8 om) द्विजातिभि (for महा°) — e) K0 B6 Da D4 तु, K4 T1 G1.3.6 M स्म, T2 G2.4.5 च (for स) — After 36, D4 (marg sec m) S ins

1425* समौलिहारकेयूरै सहस्ताभरणाङ्गदै ।
राजलिङ्गैस्तथान्यैश्च भूषितो भूषणै शुभै ।
[(L. 1) T2 G4.5 सुमाली हार° — (L. 2) T1 G1.3.6 M3.5 तत (for तथा)]

37 b) K0 B6 Da D4 °शब्दरवेण, K2.4 Ñ B1.3.5 Dn D1 G1 °शब्दोत्तरेण — After 37[ab], D4 (marg sec. m.) S ins

1426* सभाज्यमानो विप्रैश्च प्रदत्वा ह्यमित वसु ।
[M3 प्रदाय D4 M3 अपि (for हि) T1 G1 सप्रदत्वामित, T2 G2.4.5 दत्वा तेभ्योधिक]

— c) K0 Da कौरवो; D4 वचन Ñ1.2 Da D5 T1 राजन्, T2 G2.4.5 कर्णो — d) K0 Ñ1.2 B6 Da Dn D1 वचनं, B1.3.5 D2 वर्धयन्, D4 सदृश (for राजा°) S राज्ञा मध्ये (for राजान त) K0 Ñ2 B1.3.5 Da Dn D1.2 स (for त). Ñ1 B6 सदृश; D4 वचन (for त वृषस्) Ś1 K1 नृप°, G4 (inf lin as in text) M वृषा, Cd as in text. K2.4 D5

१२७

C. 1. 5413
B. 1. 137. 1
K. 1. 147. 1

वैशंपायन उवाच ।
ततः स्रस्तोत्तरपटः सप्रस्वेदः सवेपथुः ।
विवेशाधिरथो रङ्गं यष्टिप्राणो ह्वयन्निव ॥ १
तमालोक्य धनुस्त्यक्त्वा पितृगौरवयन्त्रितः ।
कर्णोऽभिषेकार्द्रशिराः शिरसा समवन्दत ॥ २
ततः पादाववच्छाद्य पटान्तेन ससंभ्रमः ।
पुत्रेति परिपूर्णार्थमब्रवीद्रथसारथिः ॥ ३
परिष्वज्य च तस्याथ मूर्धानं स्नेहविक्लवः ।
अङ्गराज्याभिषेकार्द्रमश्रुभिः सिषिचे पुनः ॥ ४
तं दृष्ट्वा सूतपुत्रोऽयमिति निश्चित्य पाण्डवः ।
भीमसेनस्तदा वाक्यमब्रवीत्प्रहसन्निव ॥ ५
न त्वमर्हसि पार्थेन सूतपुत्र रणे वधम् ।
कुलस्य सदृशस्तूर्णं प्रतोदो गृह्यतां त्वया ॥ ६
अङ्गराज्यं च नार्हस्त्वमुपभोक्तुं नराधम ।
श्वा हुताशसमीपस्थं पुरोडाशमिवाध्वरे ॥ ७
एवमुक्तस्ततः कर्णः किंचित्प्रस्फुरिताधरः ।
गगनस्थं विनिःश्वस्य दिवाकरमुदैक्षत ॥ ८
ततो दुर्योधनः कोपादुत्पपात महाबलः ।
भ्रातृपद्मवनात्तस्मान्मदोत्कट इव द्विपः ॥ ९
सोऽब्रवीद्भीमकर्माणं भीमसेनमवस्थितम् ।

G1 यथा D1 m कर्णं परदारार्दन

38 b) Ko-4 D1-3 S ददामि — c) T1 G1.2.6 सद् (for प्र) M6-8 कृत्ना° — d) G3 कर्तव्य हि (for कर्तां क्षमि) S नवानघ (for तथा नृप) — Before 38ef, K3 D1 ins° दुर्योधन उ°, S दुर्योधन — e) Ś1 अत्यर्थं; B3 (m as in text) अद्य स, M अजर (M- अनत) — f) Ś1 K1.4 B D1 च; Ñ2 तु (for स) K3 इत्युवाच सुयो°, S त्वया सह महाद्य

39 ab) T1 G1 तदा (for तत) T2 G3.4.6 पूजया स्थिति स कर्णमनार्तो Ko Ñ1.2 B (except B1) D3 D1.4 प्रत्यानत; Ñ2 D5 D1 प्रत्युवाच स — After 39ab, S ins:

1427* वैशंपायन ।

अङ्गराज्यं गुणज्ञ दृष्ट्वा राजपरिच्छदान् ।

[T1 G1 M1 om. °न° G1 M °राजस्य G1 सगुणान्, M1-3 गुणानि M6-8 राजन°]

— c) K1 S परित्यज्य (for मन्ना°)

Colophon. Major parvan: T1 G M सभव° (for आदि°) — Sub-parvan: Ñ1.2 T1 सभव; to it Ñ1.2 add कर्णाभिषेक. Ś1 Ko.1.3 Ñ1 B D3 Dn1 n2 D1.4 M6-8 (all om. the sub-parvan name) mention only अस्त्र; Ko D3 अस्त्र; M6-8 अस्त्रदर्शन — Adhy. name: T1.4 D1 G1 M कर्णाभिषेक — Adhy. no. (figures, words or both): J1 133, B1 T1 126, Dn1 132, Dn2 127, T1 G1.2 M 79, G1.2.6 80, G1 81. Śloka no.: Dn 34 (Dn2 41), M1 47 — Aggregate śloka no.: Dn1 5119

127

☞ V1 resumes with कश्चित्कर्ण° in 21°

1 Ś1 K1.2 D5 S om. उवाच (G6 om. the ref.) — a) G3 सप्रस्रस्तोत्तर° — b) M6-8 सोपस्वेद — c) S (except G6 M6-8) °तिरथो G3 राजन् (for रङ्ग) — d) D3 T1 यष्टिपाणि; Cd as in text. K2-4 D3 S ज्वलन्, Ñ2 ज्वलन्

2 d) K4 S समवदत

3 b) K4 T1 G1.6 °सभ्रम

4 a) D5 मूर्धानं, S तस्यांग (T1 °से, G6 M °गे) — b) K (except Ko) B3 m Arjp Cd अतिवि°; Ñ1 अभिवि°; S अमरद्युते D5 तस्याशीव स पितु° — c) G1 M6-8 °राज्येभि°, G2 °भिषिच्य स — d) S °भि पर्यषिञ्चत

5 b) Ko Ñ1.2 B D (except D5) T2 सचिव — c) G2 °मद्याचार्यं — d) K3.4 उवाच प्र° S (except G3.6) प्रहसन्निदमब्रवीत्

6 Before 6, G3 M6-8 ins. भीम, G6 भीमसेनः — b) K3 रणे वध पदाघन — c) S °दृश कर्ण (G1 सुत; M1.2 कर्ण) — d) K3 marg. (sec. m.) तोदन (as pāṭhāntara for प्रतोदो) K3 इति (for त्वया) S प्रतोदोऽपगृह्यतां (G6 °श्च धार्यतां त्वया)

7 a) Ñ2 transp. च and न Ko B3 D3 D1 °राज्यमनर्ह° — b) D1 दुरात्मन् (for नरा°)

8 Before 8, T G (except G1.4) M6-8 ins. वैश° — a) G2 तथा; G1 तदा — c) T1 G1.2.4 निश्वस्य

वृकोदर न युक्तं ते वचनं वक्तुमीदृशम् ॥ १०
क्षत्रियाणां बलं ज्येष्ठं योद्धव्यं क्षत्रबन्धुना ।
शूराणां च नदीनां च प्रभवा दुर्विदाः किल ॥ ११
सलिलादुत्थितो वह्निर्येन व्याप्तं चराचरम् ।
दधीचस्यास्थितो वज्रं कृतं दानवसूदनम् ॥ १२
आग्नेयः कृत्तिकापुत्रो रौद्रो गाङ्गेय इत्यपि ।
श्रूयते भगवान्देवः सर्वगुह्यमयो गुहः ॥ १३
क्षत्रियाभ्यश्च ये जाता ब्राह्मणास्ते च विश्रुताः ।
आचार्यः कलशाज्जातः शरस्तम्बाद्गुरुः कृपः ।
भवतां च यथा जन्म तदप्यागमितं नृपैः ॥ १४

सकुण्डलं सकवचं दिव्यलक्षणलक्षितम् ।
कथमादित्यसंकाशं मृगी व्याघ्रं जनिष्यति ॥ १५
पृथिवीराज्यमर्होऽयं नाङ्गराज्यं नरेश्वरः ।
अनेन बाहुवीर्येण मया चाज्ञानुवर्तिना ॥ १६
यस्य वा मनुजस्येदं न क्षान्तं मद्विचेष्टितम् ।
रथमारुह्य पद्भ्यां वा विनामयतु कार्मुकम् ॥ १७
ततः सर्वस्य रङ्गस्य हाहाकारो महानभूत् ।
साधुवादानुसंबद्धः सूर्यश्चास्तमुपागमत् ॥ १८
ततो दुर्योधनः कर्णमालम्ब्याथ करे नृप ।
दीपिकाग्निकृतालोकस्तस्माद्रङ्गाद्विनिर्ययौ ॥ १९

C. 1 5438
B. 1 137 20
K. 1 147 20

गगनस्थ त

9 [a]) Ś1 K1 T2 G (except G1. 6) क्रोधाद् (for कोपा°)

10 [b]) S1 K1 उपस्थि°, S (except T2 G4. 5) इद वच. — Before 10[cd], T1 M6–8 ins दुर्योधन — [d]) S1 K3 transp वच° and वक्तु

11 [a]) S (except T2 G3 6) श्रेष्ट — After 11[ab], D2 ins a passage given in App I (No 78), cf v l. 1 128 4 — G4 om 11[c]–12[a] — [d]) Ko Ñ3 B D (except D5) transp प्रभवा and दुर्विदा ; Cd as in text S (G4 om) प्रभवो दुर्विभावन

12 G4 om 12 (cf v l 11) — [b]) S (G4 om) दग्ध (for व्याप्त) — [c]) B6 D2 °धीचेरस्थि° S1 K1 दधीचास्थिकृत वज्र, K2 4 D5 दधीचेरस्थिभिर्व°, K3 S (G4 om.) °स्यास्थिभिर्वज्र (G5 °भि पूर्व) — [d]) G2 5 दानवनाशन

13 [b]) T1 भीष्मो, G5 रौद्रिर् (for रौद्रो) — [d]) D2 सर्वदेव°, T1 G3 सर्वभूत°

14 [a]) K2–4 क्षत्रियाश्चैव, Ñ B (except B5) Dn D2 °येभ्यश्च, D5 T1 G3. 6 M °यासु च Ko Da ते (for ये) T2 G1 2 4. 5 क्षत्रिया ब्राह्मणेभ्यश्च — [b]) K2–4 ब्राह्मणेभ्यश्च T1 G1 3 तव (for ते च) N (except Ś1 K1) ते (B5 ये) श्रुता (for विश्रु°) T2 G1 2 4. 5 भा(G1 2 भ)विता इत्यपि श्रु° — After 14[ab], Ko 4 Ñ B D ins

1428* विश्वामित्रप्रभृतय प्राप्ता ब्रह्मत्वमव्ययम् ।,

while T2 G1, 2 4. 5 ins

1429* जातानाहु क्षत्रियासु ब्राह्मणै क्षत्रसक्षये ।

— After 14[c], N ins

1430* द्रोण. शस्त्रभृता वर ।
[1] गौतमस्यान्ववाये च

[(L 1) Ś1 K Ñ3 D5 द्रोणोस्त्रविदुपा (K3 °णोप्यस्त्रविदां) — (L. 2) Ś1 K1 भरतस्या° K2 4 °न्वये चैव]

— [d]) Ko Ñ1. 2 B D (except D5) च गौतम (for गुरु कृप) — [e]) K3 भवतोपि — [f]) Ñ2 °प्याकर्णित, T2 G (except G1. 6) °प्यवगत, Cd as in text Ko Ñ1 2 B D (except D5) मया, S (except T2 G2 4 5) नरै

15 [b]) Ko Ñ1 2 B D सर्वलक्षणलक्षित (Ko Da °ण) — [c]) N (except Ś1 B6) °सदृश — After 15[c], T2 G (except G3) ins

1431* सूतोऽमु जनयिष्यति ।
एव क्षत्रगुणैर्युक्त शर समितिशोभनम् ।,

repeating thereafter 15[c] — [d]) K1 हनिष्यति, Ñ3 *inf lin. sec m* प्रजास्यति ; S प्रसूयते

16 [a]) D4 पृथिव्या — [b]) Ś1 K (except Ko) Ñ1 Dn1 n3 G2 जनेश्वर , M3 5 नराधिप — [c]) S स्ववाहुवलवी° — [d]) D5 राज्ञानु°

17 [a]) Ñ1 येन. M6–8 इह (for वा) Ñ1 मनुजेन, M3 5 मानुषस्य D4 G3 इह (for इद) — [b]) Ñ1 B3 5 D4 तद् (for मद्-) G1 न क्षात मम चे°, G3 क्षात मम विचे°. — [c]) Ko Ñ B D (except D2 5) स (for वा) — [d]) Ś1 K (except Ko) D2 5 स नाम°

18 Before 18, T2 G (except G3 6) M3 ins वैश° — G3 om 18[cd] — [c]) K2 4 D5 °सयुक्त , K3 साधुकारा°, D2 °सधान , D4 °वादार्थ° ; T1 °सभूत , G1 °वाद सुस°, T2 G2 4 5 °नुबद्धाश्च — [d]) T2 G2 4. 5 अपि (for च) Ś1 K1 D5 °पागत

19 [b]) K2–4 Ñ B6 Dn D1, 5 S अग्र (for अथ) K4 Ñ B D (except Da D4) G1 3 M3 5 नृप , T1 M6–3 °प — [c]) S दीपिकाभिः (T2 G5 °र्चि)

C 1.5479 B 1.137.21 K 1.147.21

पाण्डवाश्च सहद्रोणाः सकृपाश्च विशां पते ।
भीष्मेण सहिताः सर्वे ययुः स्वं स्वं निवेशनम् ॥ २०
अर्जुनेति जनः कश्चित्कश्चित्कर्णेति भारत ।
कश्चिद्दुर्योधनेत्येवं ब्रुवन्तः प्रस्थितास्तदा ॥ २१
कुन्त्याश्च प्रत्यभिज्ञाय दिव्यलक्षणसूचितम् ।
पुत्रमङ्गेश्वरं स्नेहाच्छन्ना प्रीतिरवर्धत ॥ २२
दुर्योधनस्यापि तदा कर्णमासाद्य पार्थिव ।
भयमर्जुनसंजातं क्षिप्रमन्तरधीयत ॥ २३
स चापि वीरः कृतशस्त्रनिश्रमः
परेण साम्नाभ्यवदत्सुयोधनम् ।
युधिष्ठिरस्याप्यभवत्तदा मति-
र्न कर्णतुल्योऽस्ति धनुर्धरः क्षितौ ॥ २४

इति श्रीमहाभारते आदिपर्वणि सप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥

१२८

वैशंपायन उवाच ।
ततः शिष्यान्समानीय आचार्यार्थमचोदयत् ।
द्रोणः सर्वानशेषेण दक्षिणार्थं महीपते ॥ १
पाञ्चालराजं द्रुपदं गृहीत्वा रणमूर्धनि ।

---

20 ᵃ) Ś1 T2 G3.4.5 श्चापि सद्रो ; G1 °श्च कृतद्रो°. — ᵇ) S °पा भरतर्षभ (T1 M6-8 °भा)

21 V1 resumes with कश्चित्कर्णे in ᵇ (cf v l 1 96 37ᶜᵈ) — ᵃᵇ) K (except K1) D4 M8 जना ; T2 G2.4 तत (for जन) K D1.3 T2 G3.4 M8 केचित् (for कश्चित् both times) D5 वादिन (for भार°) — ᶜ) K D1.2 G1.4 M2.. केचित् (for कश्चि°) — ᵈ) K3 स्तुवत K4 पुरे (for तदा) G3 °त प्रत्यपश्यिता

22 ᵇ) K0.2.4 D5 °लक्षित, D3 °पूजित; G6 सर्प° — ᶜ) D1 मोहात्; G° भूतात्; M6-8 दृष्ट्वा (for स्नेहात्) — ᵈ) Ñ1.2 B D (except D1) °रजायत

23 ᵃ) D3 सुयोध°. G3 तथा — ᵇ) Ñ1 D1 पार्थिव, T G (except G°) भारत

24 ᵃ) D1 कर्ण , T2 G1.2.6 धीर (for वीर) Ñ1 D4 कृताभिश्रमस्तदा; B° °शास्त्रनिश्रम ; B° कृतनिश्रमस्तदा; D1.4 °निश्रय , G1 °सश्रम , G3 निश्रम Cd cites नि श्रम — ᵇ) K2.4 G1 ह्यवदत् — ᶜ) B1 D1 G2.6 सदा (for तदा) K1 °स्याभिनवत् K3 transp अभवत् and तदा Ś1 K0.1 transp तदा and मति

कुतस्त्वमसि संप्राप्तः कश्चासि पुरुषर्षभ ।
क इमे शेरते चेह पुरुषा देवरूपिणः ॥ १९
केयं च बृहती श्यामा सुकुमारी तवानघ ।
शेते वनमिदं प्राप्य विश्वस्ता स्वगृहे यथा ॥ २०
नेदं जानाति गहनं वनं राक्षससेवितम् ।
वसति ह्यत्र पापात्मा हिडिम्बो नाम राक्षसः ॥ २१
तेनाहं प्रेषिता भ्रात्रा दुष्टभावेन रक्षसा ।
बिभक्षयिषता मांसं युष्माकममरोपम ॥ २२
साहं त्वामभिसंप्रेक्ष्य देवगर्भसमप्रभम् ।
नान्यं भर्तारमिच्छामि सत्यमेतद्ब्रवीमि ते ॥ २३
एतद्विज्ञाय धर्मज्ञ युक्तं मयि समाचर ।
कामोपहतचित्ताङ्गीं भजमानां भजस्व माम् ॥ २४
त्रास्येऽहं त्वां महाबाहो राक्षसात्पुरुषादकात् ।
वत्स्यावो गिरिदुर्गेषु भर्ता भव ममानघ ॥ २५

---

as in text.]

16 [illegible]

17 [illegible]

[illegible]

18 S repeats 18[ab], cf. [illegible] — [a]) K[1] [illegible] [illegible]

19 Before 19, M ins. हिडिम्बा — [a]) [illegible] — [c]) G[1, 3] इमे के (by transp.) — [illegible]

20 [illegible]

21 [illegible]

22 [illegible]

23 [illegible]

24 [illegible]

25 [illegible]

अन्तरिक्षचरा ह्यस्मि कामतो विचरामि च ।
अतुलामाप्नुहि प्रीतिं तत्र तत्र मया सह ॥ २६

भीम उवाच ।

मातरं भ्रातरं ज्येष्ठं कनिष्ठानपरानिमान् ।
परित्यजेत को न्वद्य प्रभवन्निव राक्षसि ॥ २७
को हि सुप्तानिमान्भ्रातॄन्दत्त्वा राक्षसभोजनम् ।
मातरं च नरो गच्छेत्कामार्त इव मद्विधः ॥ २८

राक्षस्युवाच ।

यत्ते प्रियं तत्करिष्ये सर्वानेतान्प्रबोधय ।
मोक्षयिष्यामि वः कामं राक्षसात्पुरुषादकात् ॥ २९

भीम उवाच ।

सुखसुप्तान्वने भ्रातॄन्मातरं चैव राक्षसि ।
न भयाद्बोधयिष्यामि भ्रातुस्तव दुरात्मनः ॥ ३०
न हि मे राक्षसा भीरु सोढुं शक्ताः पराक्रमम् ।
न मनुष्या न गन्धर्वा न यक्षाश्चारुलोचने ॥ ३१
गच्छ वा तिष्ठ वा भद्रे यद्वापीच्छसि तत्कुरु ।
तं वा प्रेषय तन्वङ्गि भ्रातरं पुरुषादकम् ॥ ३२

C. 1. 5961
B. 1. 152. 30
K. 1. 164. 50

इति श्रीमहाभारते आदिपर्वणि एकोनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥

— ^{b})–29^d — ^{c}) K (except K3) Ñ1 G1.3 वत्स्यामो; M °मि T2 G (except G4) °श्रृंगेषु — ^{d}) T2 G5 भर्ता त्वं मम चानघ — After 25, T G ins

1523* इच्छामि वीर भद्रं ते मा मा प्राणान्विहासिषुः ।
त्वया ह्यहं परित्यक्ता न जीवेयमरिंदम ।

[(L. 1) G6 मम प्राणान् G1 विहास्यसि T1 मा प्राणान्भो विहासिषु — (L. 2) G1 त्वयास्म्यहं]

26 ^{a}) Ñ1.3 V1 B D (except D5) T1 °चरी (for °चरा) S (except T1 G3) चास्मि — ^{b}) K2.4 D5 अहं (for च) S (except T1) कामरूपधरापि च — ^{c}) D5 अचलां Ś1 K1.2.4 Da1 D5 प्राप्नुहि

27 Ś1 K1 भीमसेन ; Ñ V1 B1 D (except Da) भीमसेन उ°, S भीम° — Ś1 K1 (hapl) om 27^a–29^d and भीम उ° (before 30) — After the ref, S ins

1524* एष ज्येष्ठो मम भ्राता नान्य परमको गुरुः ।
अनिविष्टश्च त नाहं परिविद्या कथचन ।

[(L. 1) T2 परमतो गुरुः — (L. 2) G1 अनिर्दिष्टश्च, G2 अनिर्विण्ण°, G3 अविनष्ट°, G6 अभिमिष्ट° G5 अनिष्ट कथन नाहं G1.2.4.5 परिवेत्ता ; G3 °विता]

— ^{b}) Ñ2 B Da D2.4 अपरानपि ; T2 G1.2 अपराजितान्, Ñ1.3 कनीय(Ñ3 °या)सोपरानिमान्, V1 Dn1.n2 D1 सुखसुप्तान्कथ त्विमान् — ^{c}) K3 G1.2 M परित्यजति, T2 G3–6 °त्यजेद्धि — ^{d}) K3 प्रमादादिह, Ñ V1 Dn D1.4 T1 प्रभवन्निह, T2 G M भयादपि च

28 Ś1 K1 Da om 28 (of v. 1. 27) — ^{a}) G1.2 सुखसुप्तान् K (K1 om) Ñ1.3 वने भ्रातॄन् — ^{c}) M3 तथा गच्छेत् — ^{d}) Ñ1.3 कामार्थमिव (Ñ3 °ह) त(Ñ3 म)द्विध — S ins after 28 (M om all but line 1)

1525* राक्षसी ।
एक त्वा मोक्षयिष्यामि सह मात्रा परतप ।
सोदरानुत्सृजैतांस्त्वमारोह जघनं मम ।
भीमः ।
नाहं जीवितुमाशसे भ्रातॄनुत्सृज्य राक्षसि ।
यथागत व्रजैका त्व विप्रिय मे प्रभाषसे ।

[(L 1) M6–8 अहं त्वा — (L. 4) T1 G1.2.6 यथाश्रद्धं व्रजैका हि]

29 Ś1 K1 M om 29 (of v. 1. 27) — T1 G1.2 राक्षसी, T2 G3–6 हिडिंबी (all om उवाच) — ^{a}) T2 G न तेप्रिय चिकीर्षामि — ^{b}) K2 G5 विबो°, K4 निबोध मे — ^{c}) Ñ2 V1 B D (except D2.5) T1 अहं (for च) — ^{d})=25^b

30 K0.2 Ñ1.2 V1 B1 Dn2 n3 D1.5 भीमसेन उ°, T G भीमः (om. उ°), Ś1 K1.4 M om the ref (of v. 1. 27) — T2 G transp 30^{ab} and 30^{cd}. — ^{a}) S (except T1) इमान् (for वने) — ^{b}) M राक्षसात् — After 30^{ab}, M ins भीम° — ^{c}) G3 न भिया

31 ^{b}) T2 G शक्ता सोढु (by transp.) — ^{d}) D2 चारुहासिनि

32 ^{d}) S राक्षस

Colophon om in B1. — *Major parvan* T2 G M संभव° (for आदि°) — *Sub-parvan* Ś1 K1.3 Ñ V1 B3.5.6 Da Dn1.n2 D1.2.4.5 T2 हिडिंबवध — *Adhy name* K0 हैडम्बागम°, K4 हिडम्बागमन, Ñ1.2 V1 T1 भीमहिडिंबा(T1 °राक्षस)संवाद, G3 हिडिंबिसंवाद, G1 हिडिंबप्रयोग — *Adhy no* (figures, words or both) Dn3 151, D1m 154, T1 148, T2 G3 M 98, G1.2 99, G3.4 97 — *S'loka no* Da 34 (Dn3 37), M3 33

१४०

वैशंपायन उवाच ।
तां विदित्वा चिरगतां हिडिम्बो राक्षसेश्वरः ।
अवतीर्य द्रुमात्तस्मादाजगामाथ पाण्डवान् ॥ १
लोहिताक्षो महाबाहुरूर्ध्वकेशो महाबलः ।
मेघसंघातवर्ष्मा च तीक्ष्णदंष्ट्रोज्ज्वलाननः ॥ २
तमापतन्तं दृष्ट्वैव तथा विकृतदर्शनम् ।
हिडिम्बोवाच वित्रस्ता भीमसेनमिदं वचः ॥ ३
आपतत्येष दुष्टात्मा संक्रुद्धः पुरुषादकः ।
त्वामहं भ्रातृभिः सार्धं यद्ब्रवीमि तथा कुरु ॥ ४
अहं कामगमा वीर रक्षोबलसमन्विता ।
आरुहेमां मम श्रोणीं नेष्यामि त्वां विहायसा ॥ ५
प्रबोधयैनान्संसुप्तान्मातरं च परंतप ।
सर्वानेव गमिष्यामि गृहीत्वा वो विहायसा ॥ ६
भीम उवाच ।
मा भैस्त्वं विपुलश्रोणि नैष कश्चिन्मयि स्थिते ।
अहमेनं हनिष्यामि प्रेक्षन्त्यास्ते सुमध्यमे ॥ ७
नायं प्रतिबलो भीरु राक्षसापसदो मम ।
सोढुं युधि परिस्पन्दमथवा सर्वराक्षसाः ॥ ८

140

[illegible]

पश्य बाहू सुवृत्तौ मे हस्तिहस्तनिभाविमौ ।
ऊरू परिघसंकाशौ संहतं चाप्युरो मम ॥ ९
विक्रमं मे यथेन्द्रस्य साद्य द्रक्ष्यसि शोभने ।
मावमंस्थाः पृथुश्रोणि मत्वा मामिह मानुषम् ॥ १०
हिडिम्बोवाच ।
नावमन्ये नरव्याघ्र त्वामहं देवरूपिणम् ।
दृष्टापदानस्तु मया मानुषेष्वेव राक्षसः ॥ ११
वैशंपायन उवाच ।
तथा संजल्पतस्तस्य भीमसेनस्य भारत ।
वाचः शुश्राव ताः क्रुद्धो राक्षसः पुरुषादकः ॥ १२
अवेक्षमाणस्तस्याश्च हिडिम्बो मानुषं वपुः ।
स्रग्दामपूरितशिखं समग्रेन्दुनिभाननम् ॥ १३
सुभ्रूनासाक्षिकेशान्तं सुकुमारनखत्वचम् ।
सर्वाभरणसंयुक्तं सुसूक्ष्माम्बरवाससम् ॥ १४
तां तथा मानुषं रूपं बिभ्रतीं सुमनोहरम् ।
पुंस्कामां शङ्कमानश्च चुक्रोध पुरुषादकः ॥ १५
संक्रुद्धो राक्षसस्तस्या भगिन्याः कुरुसत्तम ।
उत्फाल्य विपुले नेत्रे ततस्तामिदमब्रवीत् ॥ १६
को हि मे भोक्तुकामस्य विघ्नं चरति दुर्मतिः ।
न बिभेषि हिडिम्बे किं मत्कोपाद्विप्रमोहिता ॥१७
धिक्त्वामसति पुंस्कामे मम विप्रियकारिणि ।
पूर्वेषां राक्षसेन्द्राणां सर्वेषामयशस्करि ॥ १८

C 1 5979
B 1 153. 18
K. 1. 163. 20

D5 M शक्त°; T2 G4.5 मम (for युधि) M5 पर हतुं — d) T G (G3 om) अशक्ता° (for अथवा)

9 G3 om 9 (of v l 3) — a) Ñ1 विवृत्तौ. — b) K0 Ñ1.3 °निभावुभौ; K3 °हस्तोपमाविमौ, S (except T1, G3 om) °हस्तोपमौ शुभौ (G2 शुभे; G4 भुजौ) — d) Ñ3 सघातं K1.2 Ñ V1 B D (except D5) T1 M महत् (for मम)

10 G3 om 10 (of v l 3) — a) D5 G1.2 M महेंद्रस्य — b) K3 D1 साक्षाद्; S (except T1, G3 om.) यथा (for साद्य) — d) Ñ3 °ह मानवं

11 G3 om 11 (of v l 3) K0 1.3 हिडिंबा; T2 G (G3 om) M हिडिंबी (M5 राक्षसी); K4 T1 om. the ref — a) G5 नरश्रेष्ठ — b) K3 मत्वा त्वा देव° — c) K0 दृष्टा युवानस्तु; K2 B5m D1.5 दृष्ट्वावदासस् (B5m °नास्, D1 °नस्; D5 °नं) तु; K3 दृष्ट्वावदानासु; K4 V1 B1m 5 6 Dn D2 4 दृष्टप्रभाव(B5.6 °वा)स्तु, Ñ B1.3 दृष्टा(Ñ3 °ष्ट्वा)वदानं (B1 3 °नस्) तु; Da S (G3 om) °प(Da T1 °व)दानास्तु — d) K3 अथ; K4 B3m Da D1 T G (G3 om) इह (for एव) K3 B3 6 Da S (G3 om) राक्षसा K0 राक्षसश्चैव मानवा

12 G3 om 12 (of v l 3) Ś1 K1 D2 S om उवाच (G2 om the ref) — a) Ñ3 D2 5 T2 G1 4-6 M तथा Ñ3 सजल्पमानस्य — c) G1.2 4 M3 वच° T2 G (G3 om) श्रुत्वा तत°, M3 श्रुत्वाभ्ययात्; M5-8 श्रुत्वा च (M5 तु) ता K4 तद् (for ता°) Ś1 K0 2.3 Ñ1 क्षुद्रो, K4 रक्षो (for क्रुद्धो) — d) G1 पुरुषाकृति

13 G3 om 13 (of v l 3), G6 om 13a–15b. — a) K0 D5 निरीक्षमाणस् K2 M3 तस्यास्तु, K4 D5 तस्याशु — K0 om. 13c–15a — c) D5 M °शिखां; T2 G1 2 5 °भूषित(G5 °पण)शिखां — d) K4 सपूर्णेंदु°, D5 °शुभाननां, S (except T1, G3 6 om) °निभानना

14 K0 G3.6 om 14 (of v l 3, 13) — a) D5 T2 G1 2 4 5 M3.5 8 °केशांता — c) K1 °पूर्णं, K3 °पक्ष, S (except T1, G3 6 om) °युक्तां — d) Ś1 K1 Ñ1 सुसूक्ष्मातर°, K2-4 B5 D5 °क्ष्मोत्तर°, Ñ3 सुसूक्ष्मं तनु°; S (except T1, G3.6 om) °धारिणीं

15 G3 om 15, G6 om 15ab, K0 om 15a (of v. l 3, 13) — a) S (except T1, G3.6 om) भगिनीं (for ता तथा) Ñ2 °प कल्पं — b) T2 G1 2, 5 M5-8 °हरां, M3 °रमां — After 15ab, S (except T1 G3.6) ins

1530* स ददर्शाग्रतस्तस्य भीमस्य पुरुषादकः ।

— d) G2 चुक्रोश; G6 °कोप S (except T1, G3 om) स निशाचर

16 G3 om 16 (of v l 3) — a) T2 G4.5 M3 तत्र, G2 M5 तस्य; M6-8 त च (for तस्या) — b) T2 G4 5 M तां (M6-8 तान्) दृष्ट्वा; (for भगि°) Ś1 भरतर्षभ, K2 3 पुरुषादक (for कुरु°) — c) S (G3 om) विस्फार्य, Cd उत्फाल्य (as in text) K3 विकटे ने° — d) K0 D5 M भगिनीं; Ñ3 ततस्तान्, G1.2 हिडिंबा (G2 °बीं)

17 Cf. v l 2 and 1527* — G3 om 17 (cf. v l. 3). Before 17, M3 6-8 ins हिडिंब — a) T1 G1.2 6 M3 कस्मान्मे — b) T1 G1 2 M दुर्मते K0 4 विघ्नं कर्तुमिहेच्छति — c) T2 G2 4 5 हिडिंबि K3 T2 G4.5 त्वं; M मां (for किं) — d) T G4-6 कामार्ते, G1.2 केन

यानिमानाश्रिताकार्षीरप्रियं सुमहन्मम ।
एष तानद्य वै सर्वान्हनिष्यामि त्वया सह ॥ १९
एवमुक्त्वा हिडिम्बां स हिडिम्बो लोहितेक्षणः ।
वधायाभिपपातैनां दन्तैर्दन्तानुपस्पृशन् ॥ २०
तमापतन्तं संप्रेक्ष्य भीमः प्रहरतां वरः ।
भर्त्सयामास तेजस्वी तिष्ठ तिष्ठेति चाब्रवीत् ॥ २१

इति श्रीमहाभारते आदिपर्वणि चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥

१४१

वैशंपायन उवाच ।
भीमसेनस्तु तं दृष्ट्वा राक्षसं प्रहसन्निव ।
भगिनीं प्रति संक्रुद्धमिदं वचनमब्रवीत् ॥ १
किं ते हिडिम्ब एतैर्वा सुखसुप्तैः प्रबोधितैः ।
मामासादय दुर्बुद्धे तरसा त्वं नराशन ॥ २
मय्येव प्रहरैहि त्वं न स्त्रियं हन्तुमर्हसि ।
विशेषतोऽनपकृते परेणापकृते सति ॥ ३
न हीयं स्ववशा बाला कामयत्यद्य मामिह ।
चोदितैषा ह्यनङ्गेन शरीरान्तरचारिणा ।
भगिनी तव दुर्बुद्धे राक्षसानां यशोहर ॥ ४
त्वन्नियोगेन चैवेयं रूपं मम समीक्ष्य च ।
कामयत्यद्य मां भीरुर्नैषा दूषयते कुलम् ॥ ५

अनङ्गेन कृते दोषे नेमां त्वमिह राक्षस ।
मयि तिष्ठति दुष्टात्मन्न स्त्रियं हन्तुमर्हसि ॥ ६
समागच्छ मया सार्धमेकेनैको नराशन ।
अहमेव नयिष्यामि त्वामद्य यमसादनम् ॥ ७
अद्य ते तलनिष्पिष्टं शिरो राक्षस दीर्यताम् ।
कुञ्जरस्येव पादेन विनिष्पिष्टं बलीयसः ॥ ८
अद्य गात्राणि क्रव्यादाः श्येना गोमायवश्च ते ।
कर्षन्तु भुवि संहृष्टा निहतस्य मया मृधे ॥ ९
क्षणेनाद्य करिष्येऽहमिदं वनमकण्टकम् ।
पुरस्ताद्दूषितं नित्यं त्वया भक्षयता नरान् ॥ १०
अद्य त्वां भगिनी पाप कृष्यमाणं मया भुवि ।
द्रक्षत्यद्रिप्रतीकाशं सिंहेनेव महाद्विपम् ॥ ११
निराबाधास्त्वयि हते मया राक्षसपांसन ।
वनमेतच्चरिष्यन्ति पुरुषा वनचारिणः ॥ १२

हिडिम्ब उवाच ।

गर्जितेन वृथा किं ते कत्थितेन च मानुष ।
कृत्वैतत्कर्मणा सर्वं कत्थेथा मा चिरं कृथाः ॥ १३
बलिनं मन्यसे यच्च आत्मानमपराक्रमम् ।
ज्ञास्यस्यद्य समागम्य मयात्मानं बलाधिकम् ॥ १४
न तावदेतान्हिंसिष्ये स्वपन्त्वेते यथासुखम् ।

C 1 5997
B 1 153. 36
K 1 165. 38

कामयस्यवशा भीरु — ^{d}) V1 B6 D (except D5) T1 तव (D4 तुभ्य) नैषापराध्यति (cf v l 2)

6 G3 om 6 (cf v l 3) — ^{a}) K0 4 Ñ1 कृतो दोषो — ^{b}) K0 न मां; Ñ2 B1 नैनां K4 Ñ3 V1 B D (except D5) T1 गर्हितुमर्हसि (for त्वमिह रा°) — After 6^{ab}, G1 2 ins

1532* हन्तुमर्हसि दुर्बुद्धे शूरश्चेत्सहर स्वरम् ।

— D4 om 6^{cd} — ^{d}) = 3^{b} Ś1 K1 त्वं स्त्रिय, Ñ1 3 स्त्रियं वै (for न स्त्रिय) G1 2 यदि मां हतुमिच्छसि — After 6, G1 2 ins

1533* मदर्थे कामबाणार्तां त्वामह हन्मि राक्षस ।

7 ^{a}) Ñ3 V1 B D (except D5) T1 G2 3 सगच्छस्व मया Ś1 K1 साक (for सार्धं) — ^{c}) V1 Dn अहमेको Ś1 D1 हनिष्यामि, K1 3 Ñ1 B5 D4 M हि नेष्यामि, D5 Nil (comm) गमिष्यामि, T2 G3–6 तु नेष्यामि, Dn (erroneously) Nilp as in text G1, 2 एकोहमेव नेष्यामि.

8 ^{a}) Ñ3 V1 B D (except D5) T1 अद्य मद्तलनि°; G3 तत्ते तलविनि° — ^{b}) M3 5 दीर्यंते, M6–8 शीर्यंते G1, 2 शिरस्ते राक्षसाधम — After 8^{ab}, G1 2 ins

1534* शतधा भेदमायाति पूर्णकुम्भ इवाश्मनि ।

— ^{cd}) G6 om 8^{cd} S (except T1, G6 om) °स्येव निष्पिष्ट सिंहेनेव (T2 °नाति-; G4 5 M3. 5 °न हि) बलीयसा

9 ^{a}) K0 D5 गृध्राद्या, Ñ1 चक्रांगा ; Ñ3 sm V1 B D (except D5) T1 ते कका, Ñ3 वक्त्रांगा, T2 G M गृध्राश्च (for क्रव्यादा) K1 क्रव्यादा अद्य गात्राणि — ^{b}) D5 श्वानो, S वला (M5 व्याला; T1 श्येना as in text) Ś1 K Ñ3 च ते (as in text), D5 च ये, the rest तथा — ^{c}) G3 भक्षतु K3 तव (for भुवि) Ñ1 3 सम्प्रहृष्टास्ते (Ñ3 °ष्टा वै), Ñ2 B1, 3 5 भृशसहृष्टा, B6 Da D2 4 सुभृश हृष्टा (for भुवि सहृष्टा) K0 कर्षयतु सुसहृष्टा — ^{d}) Ś1 B3 महामृधे, G3 मया रणे, G5 मया वने

10 ^{a}) S (except T1 G2) करिष्यामि — ^{b}) Ñ2 V1 B D (except D5) T1 वनमराक्षसं T2 G M वन निहत कटक — ^{c}) Ñ2 V1 B D (except D5) T1 पुरा यद्दूषित. K3 नून; M6–8 तस्य

11 ^{a}) K1 D5 T2 G M पापं, Ñ2 V1 B Da Dn D1 2, 4 T1 रक्ष — ^{b}) Ñ3 V1 B D (except D5) T1 मयासकृत् — ^{c}) Ś1 K0 4 Ñ3 D5 द्रक्ष्यते° — ^{d}) K1 महागज

12 M om 12 — ^{a}) T2 G (except G6) निराबाध — ^{b}) Ñ3 °पांसुल — ^{c}) K0 वनमेते, K4 सुखमेतच्

13 K0 3 राक्षस उ°, T1 G1, 2 M5 हिडिंब, T2 G3–6 M3, 6–8 राक्षस — K1 om 13^{a}–14^{b} — ^{a}) G1 2 गर्जनेन T2 G भृशं किं ते — ^{b}) G1 2 6 M6–8 कत्थनेन, Cd as in text T2 G मानव — After 13^{ab}, M3 ins

1535* शारदस्येव मेघस्य गर्जित निष्फल हि ते ।

— ^{c}) Ñ1 स्वस्कृते कर्मणा Ś1 K0 2 4 D5 पूर्वं, D2 सार्धं (for सर्वं) — ^{d}) Ñ2 B6 D4 कत्थ मा, M कत्थ्यता (for कत्थे°) G1, 3 वृथा (for कृथा) K0 D5 कथय त्वं नराधिप (D5 °धम)

14 K1 om 14^{ab} (cf v l 13), B6 om 14^{a}–17^{b} — ^{a}) K2 Ñ1 युत्त्वम्, D5 S यस्माद् (G3 यन्माम्, T1 यच्च as in text) — ^{b}) Ś1 K0 3 Ñ2 3 V1 B3 Dn D1 T1 ins अपि between the two halves of the line (to avoid the hiatus) Ś1 च पराक्रमः, K0 त्व न मांसभुक्, K2 D2 स्वपराक्रमात् (D2 °क्रम), K4 Ñ V1 B3 Dn D1 4 सपरा°; B1 5 Da सुपरा°, M3 अपराजित G2 आत्मनस्तु पराक्रम — ^{c}) T2 G (except G3) ज्ञास्यसे K3 त्व (for अद्य) D5 समागत्य, T2 G मयागम्य (G1 2 °त्य) — ^{d}) T2 G बलहीन ततो भुवि

15 B6 om 15 (cf v l 14) — ^{a}) M6–8 एनान्

एष त्वामेव दुर्बुद्धे निहन्म्यद्याप्रियंवदम् ॥ १५

हत्वा तवानुगानन्यानतः पश्चादिमानपि ।
हनिष्यामि ततः पश्चादिमां विप्रियकारिणीम् ॥ १६

वैशंपायन उवाच ।

एवमुक्त्वा ततो बाहुं प्रगृह्य पुरुषादकः ।
अभ्यधावत संक्रुद्धो भीमसेनमरिंदमम् ॥ १७

तस्याभिपततस्तूर्णं भीमो भीमपराक्रमः ।
वेगेन प्रहृतं बाहुं निजग्राह हसन्निव ॥ १८

निगृह्य तं बलाद्भीमो विस्फुरन्तं चकर्ष ह ।
तस्माद्देशाद्धनूंष्यष्टौ सिंहः क्षुद्रमृगं यथा ॥ १९

ततः स राक्षसः क्रुद्धः पाण्डवेन बलाद्धृतः ।
भीमसेनं समालिङ्ग्य व्यनदद्भैरवं रवम् ॥ २०

पुनर्भीमो बलादेनं विचकर्ष महाबलः ।
मा शब्दः सुखसुप्तानां भ्रातॄणां मे भवेदिति ॥ २१

अन्योन्यं तौ समासाद्य विचकर्षतुरोजसा ।
राक्षसो भीमसेनश्च विक्रमं चक्रतुः परम् ॥ २२

बभञ्जतुर्महावृक्षाँल्लताश्चाकर्षतुस्ततः ।
मत्ताविव सुसंरब्धौ वारणौ षष्टिहायनौ ॥ २३

तयोः शब्देन महता विबुद्धास्ते नरर्षभाः ।
सह मात्रा तु ददृशुर्हिडिम्बामग्रतः स्थिताम् ॥ २४

इति श्रीमहाभारते आदिपर्वणि एकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥

१४२

वैशंपायन उवाच ।
प्रबुद्धास्ते हिडिम्बाया रूपं दृष्ट्वातिमानुषम् ।
विस्मिताः पुरुषव्याघ्रा बभूवुः पृथया सह ॥ १
ततः कुन्ती समीक्ष्यैनां विस्मिता रूपसंपदा ।
उवाच मधुरं वाक्यं सान्त्वपूर्वमिदं शनैः ॥ २
कस्य त्वं सुरगर्भाभे का चासि वरवर्णिनि ।
केन कार्येण सुश्रोणि कुतश्चागमनं तव ॥ ३
यदि वास्य वनस्यासि देवता यदि वाप्सराः ।
आचक्ष्व मम तत्सर्वं किमर्थं चेह तिष्ठसि ॥ ४
हिडिम्बोवाच ।
यदेतत्पश्यसि वनं नीलमेघनिभं महत् ।
निवासो राक्षसस्यैतद्धिडिम्बस्य ममैव च ॥ ५

C 1 6011
B 1 154. 5
K 1 160. 5

सु-) सक्रुद्धौ — d) Ko T2 G (G3 4 om) मातगौ (for वारणौ) T2 G1 2 M (except M5) षाष्टि°. — T G1, 2 4 5 (om lines 8–12) 6 ins after 23 G3 (om lines 1, 11, 12), after 22

1538* पादपानुद्धरन्तौ तावूरुवेगेन वेगितौ ।
स्फोटयन्तौ लताजालान्यूरुभ्यां गृह्य सर्वशः ।
वित्रासयन्तौ तौ शब्दैः सर्वतो मृगपक्षिणः ।
बलेन बलिनौ मत्तावन्योन्यवधकाङ्क्षिणौ ।
भीमराक्षसयोर्युद्धं तदावर्तत दारुणम् । [5]
ऊरुबाहुपरिक्लेशात्कर्षन्तावितरेतरम् ।
उत्कर्षन्तौ विकर्षन्तौ प्रकर्षन्तौ परस्परम् ।
तत शब्देन महता गर्जन्तौ तौ परस्परम् ।
पाषाणसघातनिभै प्रहारैरभिजघ्नतु ।
अन्योन्य तौ समाश्लिष्य विकर्षन्तौ परस्परम् । [10]
बाहुयुद्धमभूद्धोरं बलिवासवयोरिव ।
युद्धसरम्भनिर्गच्छत्फूत्काररवनिस्वनम् ।

[(L 5) T1 तदा तु दारुण युद्धं चक्रतुर्भीमराक्षसौ — After line 5, G1 3 4 ins.

1539* पुरा देवासुरे युद्धे वृत्रवासवयोरिव ।

— (L. 7) Of 1 142 12ab T G3–6 उत्कर्षण विकर्षणमपकर्षणमेव च — (L 8) Of 1 142 12ab. G1.3 तौ शब्देन विना राजन् (for the prior half) — (L 9) G1.3 °सघट्टनिभै — (L 12) T2 G4.6 °फूत्काराराव°.]

24 b) Dn3 M3.5 प्रबुद्धास् G1 3 पाडुसभवा (for ते नर°) — c) K2 3 Ñ1 V1 B D T1 च, Ñ2 हि; Ñ3 T2 G अथ (for तु) M सह मात्रा ददृशिरे — d) G1–3 हिडिंबीं Ñ3 तु स्थितामिति, T1 अग्रचेष्टिता; G1 3 पुरत स्थितां

Colophon om in Ñ2 D1 — *Major parvan* T2 G M सभव° (for आदि°) — *Sub-parvan* Ś1 K0–3 Ñ1 2 V1 B1 5 6 Da Dn D2 4 T1 M3 6–8 हिडिंबवध — *Adhy name* K4 D5 भीमसेनहिडिंबयोर् (D5 °डिंब) युद्ध. — *Adhy no* (figures, words or both) B1 T1 149; Dn3 152, D4m 155, T2 G5 6 M 100, G1 3 101, G3 4 99 — *S'loka no* Dn 45, M3 25 — *Aggregate s'loka no* Dn2 5994

142

1 Ś1 K1 3 D5 S om उवाच; D1 om the ref — a) K1 विबुद्धास्ते — b) T2 G रूपमालोक्य शोभनं — c) G1 3 °ता रूपसपत्त्या (of 2b)

2 a) G3 समेत्य (for समीक्ष्य) — d) K2 3 D5 G1 वच ; K4 यथा (for शनै)

3 Before 3, K0 D5 ins कुती उ°, K3 4 D1 (marg. *sec m*) कुत्युवाच, M (except M5) कुती — b) K0 3 Ñ1 2 V1 B Dn D2 G1 M5 वा (for च) — c) Ñ3 V1 B D (except D5) T1 समाख्या, G6 सुभगे (for सुश्रो°)

4 a) Ś1 K3 चास्य, K0 M6 7 वापि; K1 Ñ1 T2 G (except G3) M3 वासि, K4 N2 3 M5 चापि; M8 नापि. Ś1 K1–4 V1 Dn D1 T1 °स्य त्व, K0 Ñ B D5 T2 G M °स्यास्य (G3 °च) — b) A few MSS °प्सरा — c) M भद्रे (for मम) — d) K0 2 om च

5 K1 3 Ñ3 S om उवाच — b) G1.3 °मेघसमप्रभं. — c) K0 4 Ñ3 D5 M इह; K1–3 Ñ1 2 V1 B D1 2 Dn2 n3 D1 2.4 T1 एप, Da1 Dn1 एव; G4 इति (for एतद्) — d)

तस्य मां राक्षसेन्द्रस्य भगिनीं विद्धि भामिनि ।
भ्रात्रा संप्रेषितामार्ये त्वां सपुत्रां जिघांसता ॥ ६
क्रूरस्याहं तस्य वचनादागता इह ।
अद्राक्षं हेमवर्णाभं तव पुत्रं महौजसम् ॥ ७
ततोऽहं सर्वभूतानां भावे विचरता शुभे ।
चोदिता तव पुत्रस्य मन्मथेन वशानुगा ॥ ८
ततो वृतो मया भर्ता तव पुत्रो महाबलः ।
अपनेतुं च यतितो न चैव शकितो मया ॥ ९
चिरायमाणां मां ज्ञात्वा ततः स पुरुषादकः ।
स्वयमेवागतो हन्तुमिमान्सर्वांस्तवात्मजान् ॥ १०
स तेन मम कान्तेन तव पुत्रेण धीमता ।
बलादितो विनिष्पिष्य व्यपकृष्टो महात्मना ॥ ११
विकर्षन्तौ महावेगौ गर्जमानौ परस्परम् ।
पश्यध्वं युधि विक्रान्तावेतौ तौ नरराक्षसौ ॥ १२

वैशंपायन उवाच ।

तस्याः श्रुत्वैव वचनमुत्पपात युधिष्ठिरः ।
अर्जुनो नकुलश्चैव सहदेवश्च वीर्यवान् ॥ १३
तौ ते ददृशुरासक्तौ विकर्षन्तौ परस्परम् ।
काङ्क्षमाणौ जयं चैव सिंहाविव रणोत्कटौ ॥ १४
तावन्योन्यं समाश्लिष्य विकर्षन्तौ परस्परम् ।
दावाग्निधूमसदृशं चक्रतुः पार्थिवं रजः ॥ १५
वसुधारेणुसंवीतौ वसुधाधरसंनिभौ ।

विभ्राजेतां यथा शैलौ नीहारेणाभिसंवृतौ ॥ १६
राक्षसेन तथा भीमं क्लिश्यमानं निरीक्ष्य तु ।
उवाचेदं वचः पार्थः प्रहसञ्शनकैरिव ॥ १७
भीम मा भैर्महाबाहो न त्वां बुध्यामहे वयम् ।
समेतं भीमरूपेण प्रसुप्ताः श्रमकर्शिताः ॥ १८
साहाय्येऽस्मि स्थितः पार्थ योधयिष्यामि राक्षसम् ।
नकुलः सहदेवश्च मातरं गोपयिष्यतः ॥ १९

भीम उवाच ।

उदासीनो निरीक्षस्व न कार्यः संभ्रमस्त्वया ।
न जात्वयं पुनर्जीवेन्मद्बाह्वन्तरमागतः ॥ २०

अर्जुन उवाच ।

किमनेन चिरं भीम जीवता पापरक्षसा ।
गन्तव्यं न चिरं स्थातुमिह शक्यमरिंदम ॥ २१
पुरा संरज्यते प्राची पुरा संध्या प्रवर्तते ।
रौद्रे मुहूर्ते रक्षांसि प्रबलानि भवन्ति च ॥ २२
त्वरस्व भीम मा क्रीड जहि रक्षो विभीषणम् ।
पुरा विकुरुते मायां भुजयोः सारमर्पय ॥ २३

वैशंपायन उवाच ।

अर्जुनेनैवमुक्तस्तु भीमो भीमस्य रक्षसः ।
उत्क्षिप्याभ्रामयद्देहं तूर्णं गुणशताधिकम् ॥ २४

O 1 6031
B 1 154 25
K. 1 160. 81

1541* ते पश्यन्तो महद्युद्ध सर्वे व्यथितचेतस. ।
[G1. 2 transp ते and पश्यत]

17 a) K1 ततो, K4 Ñ1 2 V1 Dn D1 M5 तदा, T2 G बलाद् — b) K4 कृष्यमाणौ, T2 श्लिष्य°; G3 पीड्य°. K0 3 समीक्ष्य V1 B Dn D1 T G च, D2 ह; M त (for तु) — After 17ab, T G ins

1542* चिरप्रयुद्धौ तौ दृष्ट्वा त्वयोन्यवधकाङ्क्षया ।
[G1 चिरयुद्धौ कृतौ दृ°, G6 °द्धौ दृष्ट्वा च T1 G2. 4 च (for तु) G6 om तु G1 2 °कांक्षिणौ]

— c) B (B1 marg) Da D2 तत· (for वच) K3 उवाच वचन पा° — d) K1 तदा (for इव) T2 G प्रहसन्निव भारत

18 Before 18, D4 (marg *sec m*) ins अर्जुन उ°, G1 M अर्जुन — a) Ñ3 transp भीम and मा भैर् G1. 2 M भीम (for मा भैर्) — b) Some MSS त्वा (for त्वां) — d) Ñ2 V1 B D (except D5) T1 रक्षसा (for प्रसु°) Ś1 K2 4 Ñ V1 B Da Dn1 n2 D1 °कर्पिता. (B5 6 °त), K1 °कल्पिता·, D4 °कर्शित, G1 °निर्जिता.

19 a) K0 T1 M3 सहाये, K1 2 4 T2 G (except G4) सहायो G (except G4 5) पार्श्वे (for पार्थ) — b) Ñ2 V1 B D (except D5) T1 पातयि°; G1. 3 यो वधिष्या° — c) M यमौ च राजा कौंतेयो — d) Ś1 पालयिष्य°

20 K1 S om उवाच Ś1 Da1 भीमसेन (for भीम उ°) — d) T2 G मद्भुजातरम् M आश्रित (for आग°) K0 Da D5 मम बाह्वतरे स्थित (Da °तर गत) — After 20, T G (T2 G3 5 6 om lines 1–2) ins

1543* भुजयोरन्तर प्राप्तो भीमसेनस्य राक्षस ।
अमुक्त्वा पार्थ वीर्येण मृतो मा भूदिति ध्वनि ।
अयमस्मान्न नो हन्याज्जातु वै पार्थ राक्षस ।
जीवन्त न प्रमोक्ष्यामि मा भैषीर्भरतर्षभ ।
[(L 2) G1. 2 अमृत्वा — (L 4) T2 G4 हि (for प्र)]

21 Ś1 K1 S om उवाच — After अर्जुन., T G ins.

1544* पूर्वरात्रे प्रबुद्धोऽसि भीम क्रूरेण रक्षसा ।
क्षपा व्युष्टा न चेदानीं समाप्तोऽसि महारणम् ।
[(L 1) G3–5 प्रयु°. — (L 2) T1 G1 समाप्तस्तु; T2 G6 °माप्तोपि, G2 °माप्त तु T1 G1 °रण·; G2 त्वया रण]

— a) B5 वीर; G1 2 भूप (for भीम) — b) T2 G दुष्टचारिणा (for पाप°) — c) K0 Ñ V1 B D T1 गतव्ये न (D5 °व्योपि, T1 °व्यो न), T2 G नातरेण. — d) S (except T1) परतप (for अरिंदम).

22 a) N1 दिशा; D5 यावत्, Arj (comm) Cd पुरः (=अग्रत·), Da (erroneously) Arjp पुरा (as in text) D5 न रज्यते काष्ठा — b) D5 पूर्वसध्या — d) Ś1 वलवति (for प्रब°) K1 ह; K4 M3 5 हि, Ñ V1 B D (except D5) T1 उत (for च) T2 G भवति बलवति च

23 a) K0 भैस्त्व; Ñ2 B1 3 हासीर्, Ñ3 भीत, S (except T1 G1) लीला (G3. 5 °ल; G4 °ला) (for क्रीड) — b) Many MSS विभी° — d) Ś1 K भुजाभ्यां साधु योक्त्रय (K4 योधयन्), D5 जानुभ्या साधु योजय — After 23, T2 G ins

1545* माहात्म्यमात्मनो वेत्थ नराणा हितकाम्यया ।
रक्षो जहि यथा शक्र पुरा वृत्र महावने ।
[(L 2) T2 G4 महाहवे, G1. 2 महासुर]

Thereafter T G read 26–27

24 Ś1 K1 3. 4 S om उवाच (K4 M6–8 om the ref) — After 24a, K4 Ñ V1 B D (for D5 see below) T1 ins

1546* भीमो रोषाज्ज्वलन्निव ।
बलमाहारयामास यद्वायोर्जगत क्षये ।
ततस्तस्याम्बुदाभस्य

भीम उवाच ।

[illegible] ।
[illegible] न भविष्यति ॥ २५

अर्जुन उवाच ।

यदि वा मन्यसे भारं त्वमिमं राक्षसं युधि ।
करोमि तव साहाय्यं शीघ्रमेव निहन्यताम् ॥ २६
अथवाप्यहमेवैनं हनिष्यामि वृकोदर ।
कृतकर्मा परिश्रान्तः साधु तावदुपारम ॥ २७

वैशंपायन उवाच ।

तस्य तद्वचनं श्रुत्वा भीमसेनोऽत्यमर्षणः ।
निष्पिष्यैनं बलाद्भूमौ पशुमारममारयत् ॥ २८
स मार्यमाणो भीमेन ननाद विपुलं स्वनम् ।
पूरयंस्तद्वनं सर्वं जलार्द्र इव दुन्दुभिः ॥ २९
भुजाभ्यां योक्त्रयित्वा तं बलवान्पाण्डुनन्दनः ।
मध्ये भङ्क्त्वा स बलवान्हर्षयामास पाण्डवान् ॥ ३०
हिडिम्बं निहतं दृष्ट्वा संहृष्टास्ते तरस्विनः ।

अपूजयन्नरव्याघ्रं भीमसेनमरिंदमम् ॥ ३१
अभिपूज्य महात्मानं भीमं भीमपराक्रमम् ।
पुनरेवार्जुनो वाक्यमुवाचेदं वृकोदरम् ॥ ३२
नदूरे नगरं मन्ये वनादस्मादहं प्रभो ।
शीघ्रं गच्छाम भद्रं ते न नो विद्यात्सुयोधनः ॥३३
ततः सर्वे तथेत्युक्त्वा सह मात्रा परंतपाः ।
प्रययुः पुरुषव्याघ्रा हिडिम्बा चैव राक्षसी ॥ ३४

C. 1. 6041
B. 1. 154. 56
K. 1. 166. 45

इति श्रीमहाभारते आदिपर्वणि द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥ समाप्तं हिडिम्बवधपर्व ॥

°ध्ये तु भंक्त्वा वल°

31 ^{b}) K2 संतुष्टास्, B8 प्रहृ° Ñ8 M8 तपस्विन: Ko D5 हृष्टास्ते कुरुनदना , T2 G प्रहृष्टास्तत्र पांडवा (G5 वाधवा:). — After 31^{ab}, T G ins

1551* हिडिम्बा चैव सप्रेक्ष्य निहत राक्षस रणे ।
अदृश्याश्चैव ये स्वस्था: समेता भूतवादिका· ।
पूजयन्ति स्म संहृष्टा साधु साध्विति पाण्डवम् ।
भ्रातरश्चापि सहृष्टा युधिष्ठिरपुरोगमा ।

[(L 1) T1 हिडिंब, T2 G8–6 हिडिंबी G1 2 सा च (for चैव) T1 वने (for रणे) — (L. 2) T1 अदृश्यांगाश्च G8 सिद्धाश्च, G4 मेघस्था (for ये स्वस्था.) G1 सर्वे त (for समेता) T1 भूतचारका , G1 °देवता , G8 °वादिन., G4 सर्पिचारणा G5 °वादका]
— ^{c}) Ñ1 पूजयंतो नरव्याघ्रा

32 Ko om. 32^{ab} — ^{a}) T2 G अथ (for अभि) Ñ8 महात्मान·; M8 5 यथान्याय M6–8 °पूज्याथ तं भीम — ^{b}) Ñ8 भीमसेनपरा° — ^{cd}) M °रेवाब्रवीद्वाक्यमर्जुनस्तु वृ°.

33 ^{a}) Ñ1 2 V1 B (except B6) Dn1. n8 D2 न दूरं; T G2–6 M अदूरे G1 पथा तु तेन गतव्य — ^{b}) G1 इह (for अहं) N1 V1 B (except B1) D (except D5) T1 विभो — ^{d}) Ko 8 4 D4 5 G8 विंद्यात्

34 ^{a}) G8 ते तु (for तत) B6 Da transp तत सर्वे and तथे°. D2 तथेत्युक्त्वा तु ते सर्वे — ^{b}) Ñ1 2 V1 B5 Dn D1 transp सह and मात्रा Ś1 Ko 1 परतप (Ko °प), Ñ1. 8 in V1 B D (except D5) T2 G महारथा ; Ñ2 महाबला , Ñ8 नरर्षभा , T1 महायशा — ^{c}) K2 4 ते नरव्याघ्रा, T1 M6–8 °व्याघ्र

Colophon *Major parvan* T2 G M सभव° (for आदि°) — *Sub-parvan* Ś1 K Ñ1 2 V1 B D (D4 *see m*) M6–8 Cd हिडिंबवध, to it Ś1 Ko–2 Ñ1 D5 M6–8 add समास — *Adhy name* Ñ1 2 V1 T G1 M हिडिंब· वध·; G8 हिडिंबिसवाद — *Adhy no* (figures, words or both) B1 T1 150, Dn2 153, D4m 156 , T2 G5 6 M 101, G1.2 102, G8 4 100 — *S'loka no* Dn 36, M8 35. — *Aggregate s'loka no* Dn2 6030.

143

1 Before भीम· (see below), D4 (marg *see m*) (M om lines 3, 6) ins.

1552* वैशंपायन· ।
सा ततो न्यपतत्तूर्णं भगिनी तस्य रक्षस· ।
अब्रुवाणा हिडिम्बा तु राक्षसी पाण्डवान्प्रति ।
अभिवाद्य तत कुन्तीं धर्मराज च पाण्डवम् ।
अभिपूज्य च तान्सर्वान्भीमसेनमभाषत ।
अह ते दर्शनादेव मन्मथस्य वशं गता । [5]
क्रूर भ्रातृवचो हित्वा सा त्वामेवानुरुन्धती ।
राक्षसे रौद्रसकाशे तवापश्य विचेष्टितम् ।
अह शुश्रूषुरिच्छेयं तव गात्र निषेवितुम् ।

[(L. 1) D4 ततोन्वप°; M5 ततोन्वगम° — (L 2) G1 2 transp राक्ष° and पाण्डवान्प्र° D4 पुन· (for प्रति). — (L. 4) D4 अभिवाद्य, and उवाच ह (for अभा°) — (L 7) D4 राक्षसी भीमसकाश — (L 8) D4 तव पादसरोरुहं]

— Ś1 K1 भीमसेन ; Ko 8 B5 6 Dn8 D2 भीम उ°, S भीम — ^{b}) Ko Ñ1 2 Da D2 4 T G आस्थाय (for आश्रि°) A few MSS मोहनीं — ^{d}) Ñ1 त वै, T1 G8 तत्व, T2 G2 4–6 मा त्व, G1 मा त्वा; M5 त्व त Ñ2 V1 B D (except D5) त्वमिम भ्रातृसेवितं Cd cites भ्रातृनिषेवितं.

2 Ś1 K1 8 S om उवाच — ^{a}) B5 क्रुद्धोसि; T1 G1 श्राहीमा, G8 °द्धो हि — ^{b}) Ś1 Ko 1. 8 transp भीम and मा स्म K2 4 D5 M त्वं; T G च (for स्म) — ^{c}) K1 (corrupt) °ह्यापिदिक; K2 °ह्यप्य°, K4 Ñ V1 B (except B8) Da Dn D1. 2 4 T2 G1. 5. 6 °ह्यस्य°; D5 M8 5 °साप्य°; T1 G1 4 °सेर°, G2 °ह्या ह्य°; M6–8 °ह्याप्य°. — ^{d}) K8. 4 Ñ1. 2 V1 B (except B8) D T G5 गोपाय — After 2, B8 ins

1553* शरणागतगूढा त्वं धर्मं गोपाय पाण्डव ।,
the posterior half repeating 2^{cd}.

१४३

भीम उवाच ।

स्मरन्ति वैरं रक्षांसि मायामाश्रित्य मोहिनीम् ।
हिडिम्बे व्रज पन्थानं त्वं वै भ्रातृनिषेवितम् ॥ १

युधिष्ठिर उवाच ।

क्रुद्धोऽपि पुरुषव्याघ्र भीम मा स्म स्त्रियं वधीः ।
शरीरगुप्त्याभ्यधिकं धर्मं गोपय पाण्डव ॥ २
वधाभिप्रायमायान्तमवधीस्त्वं महाबलम् ।
रक्षसस्तस्य भगिनी किं नः क्रुद्धा करिष्यति ॥ ३

वैशंपायन उवाच ।

हिडिम्बा तु ततः कुन्तीमभिवाद्य कृताञ्जलिः ।
युधिष्ठिरं च कौन्तेयमिदं वचनमब्रवीत् ॥ ४
आर्ये जानासि यद्दुःखमिह स्त्रीणामनङ्गजम् ।
तदिदं मामनुप्राप्तं भीमसेनकृतं शुभे ॥ ५
सोढं तत्परमं दुःखं मया कालप्रतीक्षया ।
सोऽयमभ्यागतः कालो भविता मे सुखाय वै ॥ ६
मया ह्युत्सृज्य सुहृदः स्वधर्मं स्वजनं तथा ।
वृतोऽयं पुरुषव्याघ्रस्तव पुत्रः पतिः शुभे ॥ ७
वरेणापि तथानेन त्वया चापि यशस्विनि ।
तथा ब्रुवन्ती हि तदा प्रत्याख्याता क्रियां प्रति ॥ ८
त्वं मां मूढेति वा मत्वा भक्ता वानुगतेति वा ।
भर्त्रानेन महाभागे संयोजय सुतेन ते ॥ ९
तमुपादाय गच्छेयं यथेष्टं देवरूपिणम् ।

पुनश्चैवागमिष्यामि विश्रम्भं कुरु मे शुभे ॥ १०
अहं हि मनसा ध्याता सर्वान्नेष्यामि वः सदा ।
वृजिने तारयिष्यामि दुर्गेषु च नरर्षभान् ॥ ११
पृष्ठेन वो वहिष्यामि शीघ्रां गतिमभीप्सतः ।
यूयं प्रसादं कुरुत भीमसेनो भजेत माम् ॥ १२
आपदस्तरणे प्राणान्धारयेद्येन येन हि ।
सर्वमादृत्य कर्तव्यं तद्धर्ममनुवर्तता ॥ १३
आपत्सु यो धारयति धर्मं धर्मविदुत्तमः ।
व्यसनं ह्येव धर्मस्य धर्मिणामापदुच्यते ॥ १४
पुण्यं प्राणान्धारयति पुण्यं प्राणदमुच्यते ।
येन येनाचरेद्धर्मं तस्मिन्गर्हा न विद्यते ॥ १५

युधिष्ठिर उवाच ।

एवमेतद्यथात्थ त्वं हिडिम्बे नात्र संशयः ।
स्थातव्यं तु त्वया धर्मे यथा ब्रूयां सुमध्यमे ॥ १६
स्नातं कृताह्निकं भद्रे कृतकौतुकमङ्गलम् ।
भीमसेनं भजेथास्त्वं प्रागस्तगमनाद्रवेः ॥ १७

C 1 6058
B 1 155. 17
K. 1 167 33

---

text — T G ins after 10 M8 (om lines 1–4, 8–9), after 1554* (of v l. 8^{ab})

1556* अहं हि समये लिप्से प्राग्भ्रातुरपवर्जनात् ।
तत सोऽभ्यपतद्राज्ञी भीमसेनजिघांसया ।
यथा यथा विक्रमते यथा रमति तिष्ठति ।
तथा तथा समाधाय पाण्डव काममोहिता ।
न यातुधान्यहं स्वार्ये न चास्मि रजनीचरी । [5]
ईशा रक्ष सु साध्व्यस्मि राज्ञी सालकटङ्कटी ।
पुत्रेण तव सयुक्ता युवतिर्देववर्णिनी ।
सर्वान्वोऽहमुपस्थास्ये पुरस्कृत्य वृकोदरम् ।
अप्रमत्ता प्रमत्तेषु शुश्रूषुरनहंवदा ।

[(L. 1) T1 अहं समुपलक्ष्यैव, G4 5 °हं समुपलभ्यैव, G6 °हं समुपलप्स्ये प्राक् G6 मद्- (for प्राक्) G3 श्रोतुम् (for भ्रातुर्) G4 6 उपवर्ज° — (L. 3) T1 यथारिमधि तिष्ठ°; G1.2 तथारिमधुति°; G8 यथारिमयि ति° — (L. 4) T2 G3–5 समादाय, G6 समाधावत् — (L 5) G1 भद्रे (for स्वार्ये) — (L 6) T2 G4 5 कन्या, G8 तथा, G6 ईशे (for ईशा) T1 रक्ष°स्वसा ह्यस्मि, G6 रक्ष स्वाहमस्मि, M8 रक्ष सुता यास्मि (for रक्ष सु साध्व्यस्मि) G1 2 M8 राज्ञि; G8 राज्ञ T2 G8 6 °कटकटा; G1 °कटकरी — (L. 7) T1 युवती देवरूपिणी — (L. 9) T1 असह, G8 अमव (for अनहं-) T1 G3 6 सदा (for वदा)]

11 G1 om 11^{ab}, T G2–6 read it after 1555* (of v. l 8) — ^{ab}) Ñ8 पथि (for सदा) S (G1 om) ध्यात्वा सर्वं वेत्स्यामि सर्वदा — ^{c}) Ś1 K (except K0) विपिने, Ñ1 2 V1 B Da Dn D1 2 4 वृजिनात्; D5 G8 विजने, T2 G6 वृजिन, M विषमे T2 G3 6 कारयिष्यामि — ^{d}) K8 दुर्गेषि; T G दासीवच् Ś1 °र्षभ, K1 G6 °र्षभ; Ñ8 T2 G3 4 °र्षभा Ñ1 दुर्गेषु भरतर्षभान्, Ñ2 V1 B D (except D5) °षु विषमेषु च

12 ^{a}) G2 वा; G3 च, G5 अपि (for वो) Ñ B Da D2 4 T G Nilp प्रव(Ñ8 T1 G1 °वे)क्ष्यामि; M6–8 हनि° — ^{b}) Ś1 K1 Ñ1 2 V1 D5 शीघ्र Ś1 K1.3 B5 D5 °प्सतां, K4 Ñ1.3 B5m °प्सितां T G2–6 क्षणेन गति(T1 °त)मीप्स(G2 6 °प्सि)ता (T1 °त); G1 M विमान सुकृती(G1 M5 °ता)निव — After 12^{ab}, T G read 8^{cd}, followed by 1555* (of v l 8) — After 12, D5 reads 8^{cd}, followed by

1557* उवाच सा तदा कुन्ती हिडिम्बा नाम राक्षसीम् ।

13 Before 13, Ś1 ins कुती, K0 D5 कुती उ°, K1 3 4 कुन्त्युवाच — ^{a}) K1 2 M8 (*inf lin* as in text) °स्तारणे, T G आपक्षिस्त°. — ^{b}) K (except K1) Ñ1 3 येन ह; Ñ2 V1 B D T1 तेन वा (D4 केन वा; D5 केन ह), T2 G M केनचित् — ^{c}) B6 धर्मं (for सर्वं) K2 4 D4 T1 G1 2 आहृत्य, K3 V1 B6 Dn G3 4 आवृत्य, T2 G5 आपदि, G6 आपत्सु — ^{d}) Ñ1 2 V1 B6 Dn G1.2 त धर्मम्, D1 धर्मेनम् (sic) K0 3 D5 °वर्तते, K2 4 Ñ3 °वर्ततां, T1 °पश्यत ; T2 G4–6 °पश्यता, G1–3 M °पश्यता

14 Before 14, K3 ins हिडम्बो — ^{a}) Cd धारयते G2 आपद्यो धारयेत्प्राणान् — ^{b}) D5 T G स वै (for धर्मं) — D5 om 14^{cd}

15 K4 om 15, Ś1 K1 Dn1 (hapl) om 15^{ab} — ^{a}) T G3–6 M पुण्यान् B3 धारयीत, T2 °यतीं, G3 °यत्य , G5 °यति G1 2 पुण्याद्धा(G2 °न्धा)रयति (G2 °ती) प्राणान् — ^{b}) S पुण्य वै (G1 2 हि) प्राणधारण — ^{c}) Ñ1 3 B3 Da S येन येन (T1 G1 M3.6–8 येन केन, G3 येनार्कों न) चरे°; Cd as in text — After 15, S ins a passage given in App I (No 87)

16 S1 K1 3 S om उवाच (G3 om the ref) — ^{a}) M3 5 एव (for एतद्) Ñ1 °थातत्व, T °थावृत्त — ^{c}) T1 कर्तव्य D5 च; G5 हि (for तु) Ñ2 V1 B D M सत्ये, T1 धर्मं — ^{d}) K3 T2 G4–6 ब्रूया., G1 2 ब्रूहि — After 16, S ins

1558* नित्य कृताह्निका स्नात्वा कृतशौचा सुरूपिणी ।

अहःसु विहरस्वैव यथाकामं मनोजवा ।
अयं त्वानयितव्यस्ते भीमसेनः सदा निशि ॥ १८

वैशंपायन उवाच ।

तथेति तत्प्रतिज्ञाय हिडिम्बा राक्षसी तदा ।
भीमसेनमुपादाय ऊर्ध्वमाचक्रमे ततः ॥ १९

शैलशृङ्गेषु रम्येषु देवतायतनेषु च ।
मृगपक्षिविघुष्टेषु रमणीयेषु सर्वदा ॥ २०

कृत्वा च परमं रूपं सर्वाभरणभूषिता ।
संजल्पन्ती सुमधुरं रमयामास पाण्डवम् ॥ २१

तथैव वनदुर्गेषु पुष्पितद्रुमसानुषु ।
सरस्सु रमणीयेषु पद्मोत्पलयुतेषु च ॥ २२

नदीद्वीपप्रदेशेषु वैडूर्यसिकतासु च ।
सुतीर्थवनतोयासु तथा गिरिनदीषु च ॥ २३

सागरस्य प्रदेशेषु मणिहेमचितेषु च ।

पत्तनेषु च रम्येषु महाशालवनेषु च ॥ २४
देवारण्येषु पुण्येषु तथा पर्वतसानुषु ।
गुह्यकानां निवासेषु तापसायतनेषु च ॥ २५
सर्वर्तुफलपुष्पेषु मानसेषु सरःसु च ।
बिभ्रती परमं रूपं रमयामास पाण्डवम् ॥ २६
रमयन्ती तथा भीमं तत्र तत्र मनोजवा ।
प्रजज्ञे राक्षसी पुत्रं भीमसेनान्महाबलम् ॥ २७

विरूपाक्षं महावक्त्रं शङ्कुकर्णं विभीषणम् ।
भीमरूपं सुताम्रोष्ठं तीक्ष्णदंष्ट्रं महाबलम् ॥ २८
महेष्वासं महावीर्यं महासत्त्वं महाभुजम् ।
महाजवं महाकायं महामायमरिंदमम् ॥ २९
अमानुषं मानुषजं भीमवेगं महाबलम् ।
यः पिशाचानतीवान्यान्बभूवाति स मानुषान् ॥३०
बालोऽपि यौवनं प्राप्तो मानुषेषु विशां पते ।

C 1 6076
B 1 155 35
K 1 169 10

— ^{b}) Dn1 तापसायतनेषु (cf. 25^d), G1 °मयेषु, G3.6 °युतेषु — B5 om 24^{cd}, G1 reads 24^{cd} after 23^{ab}. — ^{c}) Ñ2 V1 B6 Dn D1 पल्वलेषु; M3 5 निर्झरे° — M3 om. 24^d–25^a — ^{d}) Ñ2 B1 3 Da तथैवोपवने°

25 K3 om 25, D5 G1 2 4 transp 25^{ab} and 25^{cd}, M3 om 25^a (cf. v l 24), T2 G3 5 read 25^{ab} after 23^{ab}. — ^{a}) Ñ1 च तथा, Ñ3 G5 M (M3 om) रम्ये° (for पुण्ये°) — Ś1 K1 2 4 transp 20^b and 25^b — ^{b}) Ñ1 पर्वतानां च सानुषु; D5 मानसेषु सरःसु च (=26^b), T2 G3.5 6 तापसायतनेषु च (=25^d) T1 om 25^{cd} — ^{c}) K0 °नां च भवनं — ^{d}) K0 पन्नगाना वनेषु च, Ñ3 देवतायतनेषु च (=20^b), T2 G कुलपर्वतसानुषु

26 D5 reads 26^{ab} after 23 — ^{a}) Ñ1 S °वृक्षेषु, V1 Dn D1.5 °रम्येषु — ^{b}) T G वनेषु (for सरःसु) D2 सरःस्वमलवारिषु, M सागरावृतभूमिषु — ^{d})=21^d. — After 26, D5 S ins a passage given in App I (No 89), which is followed by 1 144. 7-10, 11^{cd}–17, 19-20 (with v l and some additions noted below) and a colophon in lieu of the colophon at the end of the present adhy which S om — After the colophon, D5 S (except G3) ins

1565* वैशंपायन ।
गते भगवति व्यासे पाण्डवा विगतज्वरा ।
ऊषुस्तत्र च षण्मासान्वटवृक्षे यथासुखम् ।
शाकमूलफलाहारास्तप कुर्वन्ति पाण्डवा ।
अनुज्ञाता महाराज तत कमलपालिका ।

27 D2 om 27-28 — In S, 27^{ab} is repeated (cf. App I, No 89) — ^{a}) D5 T2 G M सदा (G3 6 तदा) (for तथा) — After 27^{ab}, D5 T G (G3 om line 5) ins

1566* दिव्याभरणवस्त्राङ्गी दिव्यस्रगनुलेपना ।
एव आवृन्सस मासान्हिडिम्बावासयद्वने ।
पाण्डवान्भीमसेनार्थं राक्षसी कामरूपिणी ।
सुख स विहरन्भीमस्तत्काल पर्यणामयत् ।
ततोऽलभत सा गर्भं राक्षसी कामरूपिणी । [5]
अतृप्ता भीमसेनेन सप्तमासोपसंगता ।

[(L 1) G1 °वस्त्रा हि, G3 °वस्त्राणि T1 दिव्यगंधानु° — (L 4) T2 सविह°, G2 5 सुविह°. — (L. 6) T1 G3 °सो वन गता]

— ^{d}) K0 2 Ñ3 D5 T2 G (except G1 2) M (except M5) °बलात् — See further a special note at the end of adhy 145

28 D2 om 28 (cf. v l. 27) — ^{b}) K4 G4 महाबल, M5 भयावह (for विभी°) — ^{c}) V1 B D (except D5, D2 om) भीमनाद, T1 °सेनं T1 विरूपाक्ष, G2 सुताम्राक्ष. — ^{d}) K0 B1.6 Da D4 M महारव, Ñ3 T2 G °रथ, T1 °सुर — After 28, K0 reads 30^c–31^b.

29 K1 (hapl.) om. 29^a–30^b — ^{a}) K0 °महोदर (for महे°) — ^{b}) K4 M5-8 °बल, T G M3 °जव (for °भुजम्) — ^{c}) T G °काय, M3 °बल (for °जव) S (except M5) °काल (for °काय) — ^{d}) K4 भीमरूपम्, T1 महानाद, G2 M °काय (M5 °काल), G6 °पाद K0 महोदय; S महाभुज (for अरिंदमम्) — Ñ3 B D ins after 29 K4, after 30^{ab}

1567* दीर्घघोण महोरस्क विकटोद्बद्धपिण्डिकम् ।
[D2 4 दीर्घघ्राण K4 D1 2 °पिंडक]

30 K1 om 30^{ab} (cf v l 29) — ^{b}) S अरिंदम (for महा°) — After 30^{ab}, K4 ins 1567* — G6 om 30^{cd}, K0 reads it after 28 — ^{c}) Ś1 K0 2 Ñ2 V1 B3 Dn D1 5 G1 4 °तीत्यान्यान्, K1 °तीता°, K4 °तीत्य° K3 महारथानतीत्यान्यान् — ^{d}) Ś1 K1 यो बभूवाति, K0 2-4 B1 3m M °वाति च, Ñ V1 B3 5 6 D °वातीव Ñ2 V1 B D राक्षसान् (for मानु°)

31 For K0, cf. v l. 28 — ^{a}) M3 5-7 बाल्येऽपि K3 यो बल, T G विक्रम (for यौवन) M3 बाल्ये वीर्यं बल प्रा° — ^{b}) M विशेषत (for विशा पते) — ^{c}) Ñ3 (m as in text) सर्वांगेषु G3 वरो (for पर). — ^{d}) G1-3

सर्वास्त्रेषु परं वीरः प्रकर्षमगमद्बली ॥ ३१
सद्यो हि गर्भं राक्षस्यो लभन्ते प्रसवन्ति च ।
कामरूपधराश्चैव भवन्ति बहुरूपिणः ॥ ३२
प्रणम्य विकचः पादावगृह्णात्स पितुस्तदा ।
मातुश्च परमेष्वासस्तौ च नामास्य चक्रतुः ॥ ३३
घटभासोत्कच इति मातरं सोऽभ्यभाषत ।
अभवत्तेन नामास्य घटोत्कच इति स्म ह ॥ ३४
अनुरक्तश्च तानासीत्पाण्डवान्स घटोत्कचः ।
तेषां च दयितो नित्यमात्मभूतो बभूव सः ॥ ३५
संवाससमयो जीर्ण इत्यभाषत तं ततः ।

हिडिम्बा समयं कृत्वा स्वां गतिं प्रत्यपद्यत ॥ ३६
कृत्यकाल उपस्थास्ये पितॄनिति घटोत्कचः ।
आमन्त्र्य राक्षसश्रेष्ठः प्रतस्थे चोत्तरां दिशम् ॥ ३७
स हि सृष्टो मघवता शक्तिहेतोर्महात्मना ।
कर्णस्याप्रतिवीर्यस्य विनाशाय महात्मनः ॥ ३८

इति श्रीमहाभारते आदिपर्वणि त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥

१४४

वैशंपायन उवाच ।
ते वनेन वनं वीरा घ्नन्तो मृगगणान्बहून् ।
अपक्रम्य ययू राजंस्त्वरमाणा महारथाः ॥ १
मत्स्यांस्त्रिगर्तान्पाञ्चालान्कीचकानन्तरेण च ।
रमणीयान्वनोद्देशान्प्रेक्षमाणाः सरांसि च ॥ २
जटाः कृत्वात्मनः सर्वे वल्कलाजिनवाससः ।
सह कुन्त्या महात्मानो बिभ्रतस्तापसं वपुः ॥ ३
क्वचिद्वहन्तो जननीं त्वरमाणा महारथाः ।
क्वचिच्छन्देन गच्छन्तस्ते जग्मुः प्रसभं पुनः ॥ ४
ब्राह्मं वेदमधीयाना वेदाङ्गानि च सर्वशः ।

C. 1 6087
B. 1 156 5
K. 1 170 3

पूजितास्तेन वन्येन तमामन्त्र्य महामुनिम् ।
[(L 1) T1 G1 2 ते (for तु) — (L 2) M8 5 वाक्येन M आमन्त्र्य च (for तमा°) M6 महाव्रतं]

37 S reads 37–38 after 1569* (of v l 35) — After 37ª, G1 2 4 ins

1572* भवत्स्मरणमात्रत ।
महत्कृच्छ्रे वने दुर्गे

— ᶜ) Ś1 K0 8 D5 T G M8 5 राक्षस (as in text), the rest रक्षसां — ᵈ) Ñ8 ह, G2 स (for च) K1 गतिं (for दिश)

38 ª) B6 G1 दृष्टो Ś1 T G भगवता — ᵇ) M महाबल — ᶜ) K2 G1 °वीरस्य, Cd as in text — ᵈ) Ñ2 V1 B D प्रतियोद्धा महारथ (D5 °रमन) Cd cites विनाशाय (as in text)

Colophon om in S (of v l 26 above) — *Sub-parvan* K0 हैडयं, Ñ V1 हिडिंबवध, to it K0 Ñ1 8 add समाप्त — *Adhy name* Ś1 K1–4 Ñ1 2 V1 B D घटोत्कचोत्पत्ति — *Adhy no* (figures, words or both) B1 151, Dn8 154, D4m 157 — *S'loka no* Dn1 42, Dn2 45, Dn8 46

144

1 Ś1 K1. 8 D2 om उवाच, S om the ref — The sequence in S is 3, 5, 1575*, 1–2, 4, 1574*, 6 etc (but of v l 7 also) — ª) V1 Dn D2 4 S गत्वा (for वीरा) Ñ2 D5 ते वने व्यचरन्वी°, D1 ते च सर्वे वने गत्वा — ᵇ) Ś1 K1 ततो; Cd घ्नन्तो (as in text)! — ᶜ) K2 पराक्रम्य, T G अति°. T1 महाराज (for ययू राजन्) — ᵈ) K4 महाबला. — K2 (hapl) om from महारथा· upto प्रेक्षमाणा· (in 2ᵈ).

2 K2 om up to °माणाः (of. v l 1) — ᵇ) T2 G3–6 °काना वनानि च, G1. 2 °कान्यवनांस्तथा — ᵈ) A few MSS प्रेक्ष्य°.

3 For sequence in S of v l. 1 — ª) K2–4 D5 जटा, D1 M6–8 जटा — ᶜ) T G transp सह and कुन्त्या

4 For S, of v l 1 — ᵇ) Ñ1 8 G2 रममाणा — After 4ªᵇ, G1 ins

1573* नित्यकर्म प्रकुर्वन्तो वन्यमूलफलाशना ।

— ᶜ) T G3 4. 6 छद्मेन, G2 5 शनैश्च, Cd as in text K (except K8) D5 वर्तंतस् (D5 °ते) — ᵈ) S (except T1 G2 8) °ग्मु पृथया सह — After 4, S ins

1574* पथि द्वैपायन सर्वे ददृशु स्वं पितामहम् ।

5 For S, of v l 1 — ª) K (except K1) ब्राह्म्यं, D2 T1 M5 ब्रह्म ; Cd as in text. Ñ1 अधीयतो — ᵇ) T1 तपश्चरणतत्परा — ᶜᵈ) Ñ2 धर्मज्ञ; V1 Dn सर्वज्ञा, M (except M5) धर्मांश्च B5 transp धर्मज्ञा and ददृशु T1 न्यायज्ञानां; T2 G4 धर्मज्ञानां, G1. 2 न्यायज्ञान, G3 न्यायशास्त्र, G5 6 धर्मज्ञान, M न्यायज्ञान (for ददृशुस्ते) S च पाण्डवा (for पिता°) — After 5, S ins

1575* शालिहोत्रप्रसादेन लब्ध्वा प्रीतिमवाप्य च ।
[T2 G4–6 प्रीतिमनुत्तम]

6 D5 om 6 — ªᵇᶜ) S अभिप्रणम्य शिरसा पाराशर्यमुपेत्य च । ते पादौ जगृहुस्तस्य — S transp सह and मात्रा in 6ᵈ, and, after 6, ins

नीतिशास्त्रं च धर्मज्ञा ददृशुस्ते पितामहम् ॥ ५

तेऽभिवाद्य महात्मानं कृष्णद्वैपायनं तदा ।
तस्थुः प्राञ्जलयः सर्वे सह मात्रा परंतपाः ॥ ६

व्यास उवाच ।

मयेदं मनसा पूर्वं विदितं भरतर्षभाः ।
यथा स्थितैरधर्मेण धार्तराष्ट्रैर्विवासिताः ॥ ७

तद्विदित्वास्मि संप्राप्तश्चिकीर्षुः परमं हितम् ।
न विषादोऽत्र कर्तव्यः सर्वमेतत्सुखाय वः ॥ ८

समास्ते चैव मे सर्वे यूयं चैव न संशयः ।
दीनतो बालतश्चैव स्नेहं कुर्वन्ति बान्धवाः ॥ ९

तस्मादभ्यधिकः स्नेहो युष्मासु मम सांप्रतम् ।
स्नेहपूर्वं चिकीर्षामि हितं वस्तन्निबोधत ॥ १०

इदं नगरमभ्याशे रमणीयं निरामयम् ।
वसतेह प्रतिच्छन्ना ममागमनकाङ्क्षिणः ॥ ११

वैशंपायन उवाच ।

एवं स तान्समाश्वास्य व्यासः पार्थानरिंदमान् ।
एकचक्रामभिगतः कुन्तीमाश्वासयत्प्रभुः ॥ १२

जीव पुत्रि सुतस्तेऽयं धर्मपुत्रो युधिष्ठिरः ।

पृथिव्यां पार्थिवान्सर्वान्प्रशासिष्यति धर्मराट् ॥ १३
धर्मेण जित्वा पृथिवीमखिलां धर्मविद्वशी ।
भीमसेनार्जुनबलाद्भोक्ष्यत्ययमसंशयः ॥ १४
पुत्रास्तव च माद्र्याश्च सर्व एव महारथाः ।
स्वराष्ट्रे विहरिष्यन्ति सुखं सुमनसस्तदा ॥ १५
यक्ष्यन्ति च नरव्याघ्रा विजित्य पृथिवीमिमाम् ।
राजसूयाश्वमेधाद्यैः क्रतुभिर्भूरिदक्षिणैः ॥ १६
अनुगृह्य सुहृद्वर्गं धनेन च सुखेन च ।
पितृपैतामहं राज्यमिह भोक्ष्यन्ति ते सुताः ॥ १७

एवमुक्त्वा निवेश्यैनान्ब्राह्मणस्य निवेशने ।
अब्रवीत्पार्थिवश्रेष्ठमृषिर्द्वैपायनस्तदा ॥ १८

इह मां संप्रतीक्षध्वमागमिष्याम्यहं पुनः ।
देशकालौ विदित्वैव वेत्स्यध्वं परमां मुदम् ॥ १९

स तैः प्राञ्जलिभिः सर्वैस्तथेत्युक्तो नराधिप ।
जगाम भगवान्व्यासो यथाकाममृषिः प्रभुः ॥ २० C. 1 6102 B. 1 156. 19 K. 1 170 14

इति श्रीमहाभारते आदिपर्वणि चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४ ॥

कुर्याश्च केवल धर्मं दुष्कृत च तथा नर ।
सुकृतं दुष्कृतं लोके न कर्ता नास्ति शोभने ।
अवश्य लभते कर्ता फल वै पुण्यपापयो ।
दुष्कृतस्य फलेनैव प्राप्त व्यसनमुत्तमम् ।
तस्मान्माधवि मानार्हे मा च शोके मन' कृथा । [5]

[M om व्यास· — (L 1) M3. 5 केवलं कुरुते धर्मं, M6–8 केवल धर्मं कुरुते M न (for च) T1 G3 तदा न°; G6 नराधम — (L 2) G1 सतत (for सुकृ°) — (L. 3) M कृती (for कर्ता) — (L 5) G3 मा शुच, M3 5 मानवि] — Thereafter S reads 18^{ab}

13 For D5 S cf. v 1 7 — M3 5–7 om 13–17 — Before 13, Ś1 K1 ins व्यास ; K0 2–4 Ñ2 3 V1 B (except B3) D (except D5) व्यास उ°. — ^{a}) V1 Dn D2 जीवत्- Ś1 K1. 2 4 वत्से, K3 D5 S (M3. 5–7 om) पुत्रे — ^{b}) K3 4 Ñ V1 B D (except D1 5) G1. 2 M3 धर्मनित्यो — Ñ1 2 V1 B D (except Da2 D5) transp 13^{cd} and 14^{ab}

14 For D5 S (M3 5–7 om) cf. v 1. 7 — ^{ab}) Ñ2 V1 B D (except D5) transp जित्वा and पृथिवीं, and (for 14^{b}) read महात्मा पुरुषर्षभ — After 14^{ab}, Ñ2 V1 B Da Dn D1 2. 4 ins

1583* पृथिवीमखिलां जित्वा सर्वां सागरमेखलाम् ।,

while D5 T2 G (except G1 2) ins

1584* स्थापयित्वा वशे सर्वां सपर्वतवना शुभाम् ।

— ^{d}) D5 T1 M3 असशय Ś1 K1 N1 3 भोक्ष्यतेयमसंशय (Ñ1 °य), K0 2–4 Ñ2 V1 B Da Dn D1 2 4 °ते नात्र (K3 °स्येप न) सशय

15 For D5 S (M3 5–7 om) cf v 1 7 — ^{a}) G5 कुत्या. (for पुत्रा); cf. 1 145 2^{b}. — ^{b}) K0 2 4 Ñ B D2 M3 महायला D5 T G पचैते पुरुषोत्तमा — ^{c}) K4 D1 स्वे (for स्व) — ^{d}) K0 2 4 Ñ V1 B D T2 G4 5 सदा

16 For D5 S (M3 5–7 om) cf v 1. 7. — ^{a}) K1 यक्ष्यते, K4 जेष्यति Ñ1 च महाभागा — ^{b}) Ñ3 V1 B5 6 D (except D2. 5) निर्जित्य — ^{d}) Ñ2 B1 3 बहुभिश्च. Ñ3 B Da D2 4 चाप्तदक्षि°.

17 For D5 S (M3 5–7 om) cf v 1 7 — ^{a}) Ñ1 2 °द्वर्गान्; G4 5 °द्वर्शं — ^{b}) Ñ1 बले° (for धने°) G3. 6 बले° (for सुखे°) Ñ2 3 V1 B D (except D5) भोगैश्वर्य सुखे° — ^{d}) Ś1 K Ñ V1 Da Dn1. n2 D1. 2 इमे (K3 इद, Ñ1 3 इमं). D5 T G M3 आहरिष्यति (for इह भो°) — After 17, Ś1 ins (an additional) colophon — D5 T G (G3 om lines 2–3) M3 ins after 17 M3 5–7, after 1580* (of v 1 10)

1585* स्नुषा कमलपत्राक्षी नाम्ना कमलपालिका ।
वशवर्तिनी तु भीमस्य पुत्रमेषा जनिष्यति ।
तेन पुत्रेण कृच्छ्रेषु भविष्यथ च तारिता ।

which in S is followed by 19–20 (partly om in some MSS, see below)

18 S (which om 18^{cd}) read 18^{ab} after 1582* (cf v 1 12) — Before 18, Ś1 K1 3 D2 ins वैश°; K0 2 4 Ñ2 3 (marg *sec m*) B D (except D5) वैश° उ° — After 18^{ab}, G1. 2 M read 20^{cd}, repeating it in its proper place — D5 S om 18^{cd} — ^{c}) K0 2 Ñ1 2 °श्रेष्ठान्, K3 पाण्डव ज्येष्ठ, Ñ3 V1 B (except B5) D (D5 om) पाण्डवश्रे°

19 S (G3 M3 5–7 om.) reads 19 after 1585* (cf v 1 17) — Before 19, K3 ins श्रीव्यास — ^{a}) Ś1 K1 2. 4 Ñ V1 B (except B5) Dn D5 T G (G3 om) M3 इह मास (*or* मा स) प्र° — ^{c}) Ś1 K1 °काल K0 B Da2 D1 2 4 °स्त्वैव — ^{d}) Ś1 K1 वत्स्य°, Ñ2 V1 B Da Dn D2 4 लप्स्य°; D1 लिप्ससे, T2 G2 4 5 °ध्वे. Ś1 K0 1 Ñ1 G2 M3 वै परा (for परमां) K4 लप्स्यथैव दुरासद

१४५

जनमेजय उवाच ।

एकचक्रां गतास्ते तु कुन्तीपुत्रा महारथाः ।
अतः परं द्विजश्रेष्ठ किमकुर्वत पाण्डवाः ॥ १

वैशंपायन उवाच ।

एकचक्रां गतास्ते तु कुन्तीपुत्रा महारथाः ।
ऊषुर्नातिचिरं कालं ब्राह्मणस्य निवेशने ॥ २

रमणीयानि पश्यन्तो वनानि विविधानि च ।
पार्थिवानपि चोद्देशान्सरितश्च सरांसि च ॥ ३

चेरुर्भैक्षं तदा ते तु सर्व एव विशां पते ।
बभूवुर्नागराणां च स्वैर्गुणैः प्रियदर्शनाः ॥ ४

निवेदयन्ति स च ते भैक्षं कुन्त्याः सदा निशि ।
तया विभक्तान्भागांस्ते भुञ्जते स्म पृथक्पृथक् ॥ ५
अर्धं ते भुञ्जते वीराः सह मात्रा परंतपाः ।
अर्धं भैक्षस्य सर्वस्य भीमो भुङ्क्ते महाबलः ॥ ६
तथा तु तेषां वसतां तत्र राजन्महात्मनाम् ।
अतिचक्राम सुमहान्कालोऽथ भरतर्षभ ॥ ७

C 1 6109
B 1. 157 7
K. 1 171 17

जटिला ब्रह्मचारिण = (var) line 2 of 1586*. — After 4^ab, S (except G1.2) ins

1586* युधिष्ठिरं च कुन्तीं च चिन्तयन्त उपासते ।
भैक्ष चरन्तस्तु सदा जटिला ब्रह्मचारिण ।

[(L 1) M6–8 ह्युपासते — (L 2) T G6 M तदा (for सदा)]

— ^c) M3 5 स्वैर्गुणैः (for बभूवु॰) T G4–6 ते, G3 तु (for च) — ^d) K1 B1 6 D2 G6 स्वगुणै॰; T1 G2 3 गुणै. सु॰ (G2 स-), G1 गुणैर्वै; M3 5 बभूवु K3 अतिवल्लभा.. — After 4, S (T2 om. lines 6–7) ins

1587* नागरा॰ ।
दर्शनीया द्विजा शुद्धा देवगर्भोपमा शुभा॰ ।
भैक्षार्हा न च राज्यार्हा सुकुमारास्तपस्विन ।
सर्वलक्षणसपन्ना भैक्ष नार्हन्ति नित्यश॰ ।
कार्यार्थिनश्चरन्तीति तर्कयन्त इति ब्रुवन् ।
बन्धूनामागमाश्रित्यमुपचिन्त्य तु नागरा । [5]
भोजनानि च पूर्णानि भक्ष्यभोज्यैरकारयन् ।
मौनव्रतेन सयुक्ता भैक्षं गृह्णन्ति पाण्डवा. ।
माता चिरगतान्दृष्ट्वा शोचन्तीति च पाण्डवा॰ ।
त्वरमाणा निवर्तन्ते मातृगौरवयन्त्रिता. ।

[(L 1) G2 प्रिया॰ शुद्धा महात्मानो (for the prior half) — (L. 2) G2 (prior half corrupt) चरति द्विजवेश्मसु (for posterior half) — After line 2, G2 4 ins

1588* नैते यथार्थतो विप्रा॰ सुकुमारास्तपस्विन॰ ।
चरन्ति भूमौ प्रच्छन्ना कस्माच्चित्कारणादिह ।

— (L 3) G1.2 वेपत (for नित्यश) — (L 4) G1.2 तर्कयत॰ सुरा इति — (L 5) G2 साधूनामागमाश्रित्यं मुदितास्ते तु नागरा — (L 6) T1 G6 M भाजनानि — (L. 8) G1 2.4 शोचती पांडवान्प्रति; M शोचतीति च पार्थिव — After line 8, T1 G2 4–6 ins

1589* दु खाश्रुपूर्णनयना लिखन्त्यास्ते महीतलम् ।
भिक्षित्वा द्विजगेहेषु चिन्तयन्तश्च मातरम् ।

— (L 9) M पांडवा दु खिता भृश (for posterior half)]

5 ^a) Ñ2 V1 B D (except D5) T1 G3 M5 तदा, T2 G4–6 M3.6–8 सदा (for च ते) G1 2 मात्रे निवेदयति स्म. — ^b) Some MSS भैक्ष्यं Ko Ñ1 D5 कुत्या भिक्षां, K1 भक्ष्यं कुत्या॰; Ñ2 3 V1 Da Dn D1 4 कुंत्या भैक्ष; B कुत्यां भैक्ष; D2 T1 G1–3 कुत्यै भै(D2 भ)क्ष्य, T2 G4–6 M भैक्ष कुंत्यै B5 तथा निशि, D2 4 (before corr) M तदा निशि, T G3–6 च ते निशि, G1.2 दिवानिशं — After 5^ab, G2 ins

1590* सर्वसपूर्णभैक्षान्नं मात्रा दत्त पृथक्पृथक् ।

— ^cd) Ñ1 B5 तदा, G4 तथा (for तया). K2 ते भागान्; K4 ते भाग, T2 G4 5 भैक्षाश्च; G6 M भिक्षाशान् (for भागांस्ते) Ś1 K1 3 G3 तया विभक्तभागांश्च (G3 ॰स्ते). G1 2 विभज्य भुंजतेष्टं ते यथाभागं पृ॰.

6 ^ab) G3 आदौ (for अर्धं) T1 G3 स्म (for ते), and पंच (for वीरा.) G1 2 युधिष्ठिरार्जुनौ कुंती यमावर्धं च भुंजते — ^cd) Ś1 K1 G3 भक्षस्य सर्वस्य, K3 Ñ2 V1 B1 6 Dn1 n2 D1 G1.2 6 M6–8 सर्वस्य भैक्षस्य; T2 G4 5 अन्नस्य सततं. G4 भुक्ते भीमो (by transp) T2 G4–6 महाभुज Ko अर्धं तु भीमसेनश्च एक एव महा॰. — After 6, S (T2 G5.6 om line 1) ins

1591* न चाशितोऽसौ भवति कल्याणान्नभृतः पुरा ।
स वैवर्ण्यं च कार्श्यं च जगामातृप्तिकारितम् ।

[(L. 1) T1 न चापि तृप्तिर्, G1 न चाशितस्य; G2 ॰तं च, G3 4 ॰तोस्मि — After line 1, M6–8 ins 1593* (cf. v. 1 7). — After line 2, G2 4 ins

1592* आज्यबिन्दुर्यथा वह्नौ महति ज्वलिते यथा ।
तथार्धभागं भीमस्य भिक्षान्नस्य नृपोत्तम ।]

7 D2 om 7 — ^a) Ko 4 M वसता तेषां (by transp.), K1 तेषा भवतां D5 तथा तेषा तु वसतां, T G तथैव वसतां तत्र (T G5 6 तेषां) — ^b) K3 नगरेषु, Ñ2 V1 B Da Dn D1.4 तस्मिन्राष्ट्रे, Ñ3 तत्र राष्ट्रे; T G (except G4 5) तेषां (T2 G6 ततो) राजन् — Dn1 om. 7^c–8^d — ^d) Ś1 K1 2 D5 वै; Ko च; Ñ3 हि (for ऽथ) K4 कालो भरतसत्तम — T2 G ins. after 7 M6–8, after line 1 of 1591*

1593* भीमोऽपि क्रीडयित्वा तु मिथो ब्राह्मणबन्धुषु ।
कुम्भकारेण सबन्धं लेभे पात्रं बृहत्तदा ।
स ददाति महत्पात्रं भीमाय प्रहसन्निव ।
तस्माद्भुतं कर्म कृत्वा महन्मृद्भारमाददे ।
तस्य भार॰ शतगुण कुम्भकारमतोषयत् । [5]
चक्रे चक्रे च मृद्भाण्डान्सतत भैक्षमाहरन् ।
तदादाय गत दृष्ट्वा हसन्ति प्रहसन्ति च ।
भक्ष्यभोज्यानि विविधान्यादाय प्रक्षिपन्ति च ।
एवमेष सदा भुक्त्वा मात्रे वदति वै रह ।

79

ततः कदाचिद्भैक्षाय गतास्ते भरतर्षभाः ।
संगत्या भीमसेनस्तु तत्रास्ते पृथया सह ॥ ८
अथार्तिजं महाशब्दं ब्राह्मणस्य निवेशने ।
भृशमुत्पतितं घोरं कुन्ती शुश्राव भारत ॥ ९
रोरूयमाणांस्तान्सर्वान्परिदेवयतश्च सा ।
कारुण्यात्साधुभावाच्च देवी राजन्न चक्षमे ॥ १०
मथ्यमानेव दुःखेन हृदयेन पृथा ततः ।
उवाच भीमं कल्याणी कृपान्वितमिदं वचः ॥ ११
वसामः सुसुखं पुत्र ब्राह्मणस्य निवेशने ।
अज्ञाता धार्तराष्ट्राणां सत्कृता वीतमन्यवः ॥ १२
सा चिन्तये सदा पुत्र ब्राह्मणस्यास्य किं त्वहम् ।
प्रियं कुर्यामिति गृहे यत्कुर्युरुषिताः सुखम् ॥ १३
एतावान्पुरुषस्तात कृतं यस्मिन्न नश्यति ।
यावच्च कुर्यादन्योऽस्य कुर्यादभ्यधिकं ततः ॥ १४
तदिदं ब्राह्मणस्यास्य दुःखमापतितं ध्रुवम् ।
तत्रास्य यदि साहाय्यं कुर्याम सुकृतं भवेत् ॥ १५

भीम उवाच ।

ज्ञायतामस्य यद्दुःखं यतश्चैव समुत्थितम् ।

विदिते व्यवसिष्यामि यद्यपि स्यात्सुदुष्करम् ॥ १६

वैशंपायन उवाच ।

तथा हि कथयन्तौ तौ भूयः शुश्रुवतुः स्वनम् ।
आर्तिजं तस्य विप्रस्य सभार्यस्य विशां पते ॥ १७
अन्तःपुरं ततस्तस्य ब्राह्मणस्य महात्मनः ।
विवेश कुन्ती त्वरिता बद्धवत्सेव सौरभी ॥ १८
ततस्तं ब्राह्मणं तत्र भार्यया च सुतेन च ।
दुहित्रा चैव सहितं ददर्श विकृताननम् ॥ १९

ब्राह्मण उवाच ।

धिगिदं जीवितं लोकेऽनलसारमनर्थकम् ।
दुःखमूलं पराधीनं भृशमप्रियभागि च ॥ २०
जीविते परमं दुःखं जीविते परमो ज्वरः ।
जीविते वर्तमानस्य द्वन्द्वानामागमो ध्रुवः ॥ २१
एकात्मापि हि धर्मार्थौ कामं च न निषेवते ।
एतैश्च विप्रयोगोऽपि दुःखं परमकं मतम् ॥ २२
आहुः केचित्परं मोक्षं स च नास्ति कथंचन ।
अर्थप्राप्तौ च नरकः कृत्स्न एवोपपद्यते ॥ २३
अर्थेप्सुता परं दुःखमर्थप्राप्तौ ततोऽधिकम् ।
जातस्नेहस्य चार्थेषु विप्रयोगे महत्तरम् ॥ २४
न हि योगं प्रपश्यामि येन मुच्येयमापदः ।
पुत्रदारेण वा सार्धं प्राद्रवेयमनामयम् ॥ २५
यतितं वै मया पूर्वं यथा त्वं वेत्थ ब्राह्मणि ।

C. 1. 6129
B. 1. 157. 00
K. 1. 171. 43

---

18 a) B8 D1 अभ्यतरं, T G1.2 4–6 M अतर्गृहं K8 आर्तो गृहं तस्य ततो; G8 अंतर्नविगतास्तस्य — c) Ś1 K2 4 D8 कुती सहसा, Ñ1.2 V1 B Da Dn D1.2 4 M8 (by transp) त्वरिता कुती. — d) G5 M6–8 सौरभिः; Cd as in text

19 a) G1–3 भीत त (for ततस्तं) — c) K8 T1 G1.2 M7 सततं, G3.5 वसत (for सहि°) — d) K2 विवृतानन, K8 विगतप्रभं, Ñ1.3 B5 विगता°, Ñ2 V1 B6 Dn D1 अवनता°, T2 G4–6 M विनता°; Cd as in text.

20 K1.3 S (except M8) om उवाच — a) M5 लोल (for लोके) — b) Ś1 K4 नन्वसारम्, K0 साल्प°; K1.3 Ñ3 V1 Dn D1 3–5 गत°, K2 स्वल्प°; Ñ1 G1.2 नर°; B8 m द्वंद्व°, B6 न च सारम् (m as in text), D4 नष्ट°, G3 नांत°, M6–8 न तु सारम्, Cd (corrupt) लहसारम्(?) — d) G5 M6–8 प्रियम् (for भृशम्) D2 G4–6 M5 °भावि च

21 ab) Ś1 K1 D2 जीवित (both times) — d) K0 V1 Dn D1.2 5 दु खानाम्; Cd द्वन्द्वानाम् (as in text) Da Dn3 D2 G (except G4.6) ध्रुवं

22 a) Ñ2 V1 B1 m 3 5 6 D (except D5) आत्मा ह्येको हि; B1 एकात्मा चैव, T G एकात्मना हि (G3 च); M एकात्मा यो (M6–8 या) हि K1.2 4 धर्मार्थो (K2 °र्थं); G3 धर्मादौ, G4 कामार्थौ Cd cites (as in text) एकात्मा (=एकाकी) — b) T2 G5 6 काम ; G4 धर्मं (for कामं). Ś1 K1.3 यश्च, K2 V1 Dn D1 2 चैव; B3 T1 M5 च स; B5 Da D4 न च (for च न) Ñ3 निवेश्यते; T2 G4–6 निषेव्यते. — c) K0 विप्रयोगोस्य, K2 °योगश्च, K3 °योगेस्य; K4 °योगैश्च, Dn3 D1 4 T2 G3.5 6 °योगेपि; D5 °युक्तस्य, T1 °योगो हि — d) K0 3.4 भवेत्, Ñ2 G1.2 महत् (for मतम्) Ñ1.3 परमसमतं, Dn परमनतकं, D1.2 परमिक मत

23 a) M3 केचित्प्राहु (for आहु केचित्) — c) Ñ1.2 V1 B Da Dn D1.2 तु (for च) S (M3 inf lin) नरकं (M3 orig 5 परम) Ś1 अनर्थप्राप्तौ नरकः; D2 अप्राप्तौ तस्य नरक K0 (hapl) om. from च नरक up to °प्राप्तौ (in 24b) — d) Ñ2 कृच्छ्रम्, T2 G4–6 M6–8 कृत्स्नम् T1 G1–3 कृत्स्नमेवोपलभ्यते, M3.5 दुःख(M3 inf lin. कृत्स्न)मे- वोपपाद्यते

24 K0 om up to प्राप्तौ (of v 1 23). — a) K3 M5 महदुःख — d) M विप्रयोगो महत्तर (M3 °त्तम ; inf lin °त्तर.) — After 24, D5 (om lines 3–4) T G ins

1596* यावन्तो यस्य संयोगा द्रव्यैरिष्टैर्भवन्त्युत ।
तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कव ।
तदिद जीवित प्राप्य स्वल्पकाल महाभयम् ।
त्यागोऽप्यय महान्प्राप्तो भार्यया सहितेन च ।

[(L. 4) G2 6 त्वया तु मम न श्रुत (for posterior half)]

25 b) Ś1 G3 °यमापदि; B1 3 मुच्ये महापद°, B5 Dn3 D4 T1 G6 °यमापदं — d) B1.3 Da M3 6 8 प्रद्रवेयम्; Cd (by corr) as in text

26 a) K0 D5 कथित, T2 G5 यदुक्त; G1.2 विदितं; G3 यद्दिद; G4 उदित; G6 अधीतं (for यतित) K1 च; K3 S हि (for वै) — b) T2 G4 5 स्वार्थे नो, G6 न स्वार्थे (for यथा त्व) Ñ1 वेत्सि Ñ2 V1 B D (except D5) वेत्थ ब्राह्मणि तत्तथा. — c) K1 तथा, K2 यत्र, Cd यत (as in text) Ñ1.2 V1 B5.6 D (except D5) क्षेमं यत (by transp.). K3 तत्र, T1 मया, G3 तथा, Cd ततः (as

C. 1. 6126
B. 1. 157. 26
K. 1. 171. 43

यतः क्षेमं ततो गन्तुं त्वया तु मम न श्रुतम् ॥ २६
इह जाता विवृद्धासि पिता चेह ममेति च ।
उक्तवत्यसि दुर्मेधे याच्यमाना मयासकृत् ॥ २७
स्वर्गतो हि पिता वृद्धस्तथा माता चिरं तव ।
बान्धवा भूतपूर्वाश्च तत्र वासे तु का रतिः ॥ २८
सोऽयं ते बन्धुकामाया अशृण्वन्त्या वचो मम ।
बन्धुप्रणाशः संप्राप्तो भृशं दुःखकरो मम ॥ २९
अथवा मद्विनाशोऽयं न हि शक्ष्यामि कंचन ।
परित्यक्तुमहं बन्धुं स्वयं जीवन्नृशंसवत् ॥ ३०
सहधर्मचरीं दान्तां नित्यं मातृसमां मम ।
सखायं विहितां देवैर्नित्यं परमिकां गतिम् ॥ ३१
मात्रा पित्रा च विहितां सदा गार्हस्थ्यभागिनीम् ।
वरयित्वा यथान्यायं मन्त्रवत्परिणीय च ॥ ३२
कुलीनां शीलसंपन्नामपत्यजननीं मम ।
त्वामहं जीवितस्यार्थे साध्वीमनपकारिणीम् ।
परित्यक्तुं न शक्ष्यामि भार्यां नित्यमनुव्रताम् ॥ ३३
त एवं संनिवृत्तास्तु युद्धाद्युद्धविशारदाः ।
यथावासं ययुः सर्वे विस्मिता राजसत्तमाः ॥ ३३
वृत्तो ब्रह्मोत्तरो रङ्गः पाञ्चाली ब्राह्मणैर्वृता ।
इति ब्रुवन्तः प्रययुर्ये तत्रासन्समागताः ॥ ३४
ब्राह्मणैस्तु प्रतिच्छन्नौ रौरवाजिनवासिभिः ।
कृच्छ्रेण जग्मतुस्तत्र भीमसेनधनंजयौ ॥ ३५
विमुक्तौ जनसंबाधाच्छत्रुभिः परिविक्षतौ ।
कृष्णयानुगतौ तत्र नृवीरौ तौ विरेजतुः ॥ ३६
तेषां माता बहुविधं विनाशं पर्यचिन्तयत् ।
अनागच्छत्सु पुत्रेषु भैक्षकालेऽतिगच्छति ॥ ३७
धार्तराष्ट्रैर्हता न स्युर्विज्ञाय कुरुपुंगवाः ।
मायान्वितैर्वा रक्षोभिः सुघोरैर्दृढवैरिभिः ॥ ३८
विपरीतं मतं जातं व्यासस्यापि महात्मनः ।
इत्येवं चिन्तयामास सुतस्नेहान्विता पृथा ॥ ३९
महत्यथापराह्णे तु घनैः सूर्य इवावृतः ।
ब्राह्मणैः प्राविशत्तत्र जिष्णुर्ब्रह्मपुरस्कृतः ॥ ४०

C. 1. 7130
B. 1. 190. 47
K. 1. 203. 00

इति श्रीमहाभारते आदिपर्वणि एकाशीत्यधिकशततमोऽध्यायः ॥ १८१ ॥

स्वापराद्धा हि, K₂ B₆ Da D₁ स्वपराद्धापि; K₃ D₅ °धा हि; Ñ1 B₃ अपराद्धापि, B₁ ₅ स्वपराद्धापि (B₅ °द्धा हि), D₂ स्वपराधेपि Ñ1 सर्वथा (for निरत्यदा)]
— ᶜ) K₀ ₁ ₃ D₂ ₅ M₅ एतान् (for एनान्) — ᵈ) N T₁ G₆ °त्साम हृष्टवत् (G₆ °मि हृष्टवान्) — After 31, Ś1 K Ñ1 ₂ V1 B₃ D (except Da) ins

1883* तांस्तथा वदत सर्वान्प्रसमीक्ष्य क्षितीश्वरान् ।
अत्यन्यान्पुरुषांश्चापि कृत्वा तत्कर्म संयुगे ।

[(L 1) Ñ1 ₂ V1 B₃ Dn D₁ ₂ ₄ °था वादिन — (L. 2) K₀ ₃.₄ अन्योन्य, Ñ1.₂ V1 B₃ Dn D₁ ₂ ₄ ₆ अथान्यान्; Cd अत्यन्यान् (as above) B₃ कृते कर्मणि सं°]

32 Before 32, Ñ V1 B (except B₆) Dn D₁ ₂ ₄ M₃.₅ ins वैश° उ° (resp. वैश°) — ᵃ) Ñ1 कर्ण° (for कृष्ण.) T₂ G₂ ₅ °स्य हरि (G₂ हसन्) समीक्ष्य. — ᵇ) Ñ1 स (for तौ)

33 ᵃ) G₆ °रुद्धा° (for °वृत्ता°) Ñ₂ ₃ V1 B D एव ते विनि° — ᵇ) T₂ G (except G₁ ₆) युद्ध्या (for युद्धात्) — ᶜ) N₃ यथाकाम — Ś1 K₁ om 33ᶜ–34ᶜ — ᵈ) K (K₁ om) Ñ1 D₆ राज(K₀ नर)पुगवा

34 Ś1 K₁ om 34ᵃᵇᶜ (of v l 33) — ᵇ) Da₁ D₁ G₃ पाचालैर् K (K₁ om) M वृता — ᶜ) K₄ इति स्तुवत — ᵈ) G₁ ये के तत्र समा°

35 ᵇ) G₁ °जिनधारिभि — K₂ ₃ transp 35ᶜᵈ and 36ᵃᵇ — ᶜ) Ñ₃ V1 B D (except D₂ ₄ ₅) तौ तु (for तत्र)

36 K₂ ₃ transp 35ᶜᵈ and 36ᵃᵇ — ᵃ) M₆–₈ निवृत्तौ (for विमुक्तौ) Da राज (for जन) — ᵇ) Ś1 K B₁m Cd क्षतविक्षतौ; B₁.₃ D₂ T G₃ ₆ M₅ परिवीक्षि°, B₆ परिरक्षि°, G₁ परिवार्जि°; G₂ च निविक्षि°, G₃ ₄ साधु वीक्षि°; M₃ परिवारि° — ᵈ) T₂ G₂–₅ तौ वीरौ हि विरे°; G₆ नृवीरौ तत्र रे° — After 36, Ñ₂ ₃ V1 B D ins

1884* पौर्णमास्यां घनैर्मुक्तौ चन्द्रसूर्याविवोदितौ ।

37 Before 37, S (except M₃ ₅) ins वैश° — ᵃ) M₆ मातापि विविधं — ᵇ) B₁ ₃ D₂ विपर्ययमचिंत°, G₃ °श तस्य चिं° — ᵈ) Some MSS भैक्ष्य°. Ś1 K D₂ ₅ °ले च लक्षिते; Ñ1 °ले प्रगच्छ°; Ñ₂ ₃ V1 Da Dn D₁ ₄ °लेभिग°

38 ᵃ) G₆ नून, M (except M₃) वा स्यु° Ñ1 धार्तराष्ट्रा हि तान्हन्यु — ᵇ) Ñ1 °पुगवान्; B₃ °पाडवा°, D₃ °नंदना , G₃.₄ °पुगवै — ᵈ) Ñ1 अघोरैर्, T₂ G (except G₁ ₆) असुरैर् K₄ दृढवेगिभि , G₃–₄ दानवैरिह

39 ᵃ) K₀ ₄ इद (for मत) K₁ तात, T₂ G₂ चापि (for जात) K₂ वैपरीत्य तु सजात — ᵈ) Ñ1 ₂ V1 B D (except D₂) °स्नेहावृता (Ñ1 °सत) T₂ G (except G₁ ₆) सुतसगान्विता (T₂ G₅ °तं) तथा — After 39, N T₁ G₁ ₆ (T₁ G₁ ₆ om the posterior half, see below) ins

1885* तत सुसजनप्राये दुर्दिने मेघसकुले ।

[K₀ T₁ G₆ भुक्तजन° K₂ Ñ1 D₅ °सकुले, K₃ °सयुते]

40 T₁ G₁ ₆ om 40ᵃ — ᵃ) Ś1 महान्यथा°, K₁ अथन्यथा°, N₃ Da भवत्यथा° K₀ ₂ T₂ च (for तु) G₂ महताथ वरारोहा — Da₂ repeats 40ᵃᵇ (v l प्राविशत्तत्र and आसपुर°) — ᶜ) G₃ ₄ सहितस् (for प्राविशत्) G₂ तूर्ष्णी (for तत्र) Ś1 K D₅ प्राविशत्तत्र बीभत्सु — ᵈ) Ś1 K D₅ ब्रह्मवृद(Ś1 K₁ °विद्धि)पुर°, Ñ₂ ₃ V1 B Da (erroneously) Dn D₁ ₂ ₄ Arjp जिष्णुर्भार्गववेश्म तत्; T₂ G₃–₅ °ष्णुर्धर्मपु° — After 40, K₂ ins

१८२

वैशंपायन उवाच।

गत्वा तु तां भार्गवकर्मशालां
पार्थौ पृथां प्राप्य महानुभावौ।
तां याज्ञसेनीं परमप्रतीतौ
भिक्षेत्यथावेदयतां नराग्र्यौ ॥ १

कुटीगता सा त्वनवेक्ष्य पुत्रा-
नुवाच भुङ्क्तेति समेत्य सर्वे।
पश्चात्तु कुन्ती प्रसमीक्ष्य कन्यां
कष्टं मया भाषितमित्युवाच ॥ २

साधर्मभीता हि विलज्जमाना
तां याज्ञसेनीं परमप्रतीताम्।
पाणौ गृहीत्वोपजगाम कुन्ती
युधिष्ठिरं वाक्यमुवाच चेदम् ॥ ३

इयं हि कन्या द्रुपदस्य राज-
स्तवानुजाभ्यां मयि संनिसृष्टा।
यथोचितं पुत्र मयापि चोक्तं
समेत्य भुङ्क्तेति नृप प्रमादात् ॥ ४

कथं मया नानृतमुक्तमद्य
भवेत्कुरूणामृषभ ब्रवीहि।
पाञ्चालराजस्य सुतामधर्मो
न चोपवर्तेत नभूतपूर्वः ॥ ५

मुहूर्तमात्रं त्वनुचिन्त्य राजा

1887* [illegible]
[illegible] गृहद्वारि यत्र तिष्ठति च पृथा।

Colophon. *Major parvan* T1 G M संभव° (for आदि°) — *Sub-parvan* Ś1 K Ñ2 B Da Dn D1-4 T2 G1 2 4 M3 द्रौपदीस्वयंवर; T1 संभव — *Adhy name* D3 युधिष्ठिरवचन; T2 G1 2 4 [illegible] — *Adhy no* (figures, words or both) Da4 T1 188, Dm 192, T2 G 140 (G1 3 142), M 141 — *Śloka no* Da1 44, Dn 40, M1 42 — *Aggregate śloka no* Da1 7101

182

☞ MS T1, which ends with adhy 181, is replaced by T3

1 Ś1 K (except K0) N om उवाच (G1 om the ref) — [illegible] [illegible] Da1 भार्गववेश्म°; G2 [illegible] — [illegible]) T2 G2 प्रेक्ष्य (for प्राप्य) — [illegible] Ś1 F1 4 सां (for तां) T2 G1 4 परिगृह्य कन्यां (for याज्ञ°) — After 1 T2 G1 4 ins

1888* [illegible]
[illegible]

2 [illegible]

— [illegible]) Ś1 K2 Ñ1 3 V1 B3 D (except D1 3) T1 च (for तु) T1 सा तु (for कुन्ती) Ñ3 transp कुन्ती and कन्यां Ñ1 3 V1 B D कृष्णां (for कन्यां)

3 [illegible]) Ś1 K1 3 [illegible]; K0 2 4 D1 [illegible]; G1 M3 च (for हि) T G1-3 M1-3 °माना (for °माना) Ñ1 2 V1 B Da Dn D1 3 °भीता परिचिन्तयन्ती (Da1 °ती); D1 धर्मोपनीतां परिचिन्तयन्ती; G1 °भीतामभिलज्जमाना; G2 अधर्मभीता च हि° — [illegible]) K (except K1) °प्रतीता

4 Before 4, Ś1 K0 3 T1 G कुन्ती; K2 पृथा उ°; Ñ V1 B2 Da Dn D1 4 5 कुन्त्युवाच — [illegible]) Ñ V1 B Da Dn D1 4 तु; D1 5 च (for हि) — [illegible]) K2 Ñ V1 D2 [illegible]; T2 G1 4 °सृष्टा — [illegible]) G1 यथाचितं T2 G1 मया (for मया) — [illegible]) G1 सर्वं तु (for समेत्य) T1 भुंक्तध्वम्; T2 G1-4 भुञ्जीध्वम्; G1 2 M भुक्ष्वम्; G2 भुञ्जध्वम् (for भुङ्क्ते) S om नृप

5 [illegible]) Ñ V1 B2 Da Dn D1 मया कथं (by transp), B1 3 4 Da D1 4 [illegible]; M1-3 कथं त्वया Ś1 K D1 [illegible] (K1 [illegible]); B1 [illegible] — [illegible]) Ś1 K D2 ब्रवीर (for ब्रवीहि) B Dn D1 4 मया भवेद्धि यदत्र युक्त- — [illegible]) Ñ V1 B (except B1) D (except D1) M1 4 पञ्चाल° — [illegible]) Ñ1 G1 2 4 °भूतपूर्वं; Ñ1 2 V1 B D (except D1) [illegible] M1-3 (corrupt) न चोपवर्तेगमम्

6 Before 6, Ś1 K1-4 D1 5 (except M1 3) ins वैश° Ñ0 Ñ V1 B Da Dn D1 4 5 वैश° उ° — [illegible]) Ñ V1 B D

युधिष्ठिरो मातरमुत्तमौजाः ।
कुन्तीं समाश्वास्य कुरुप्रवीरो
धनंजयं वाक्यमिदं बभाषे ॥ ६
त्वया जिता पाण्डव याज्ञसेनी
त्वया च तोषिष्यति राजपुत्री ।
प्रज्वाल्यतां हूयतां चापि वह्नि-
र्गृहाण पाणिं विधिवत्त्वमस्याः ॥ ७
अर्जुन उवाच ।
मा मां नरेन्द्र त्वमधर्मभाजं
कृथा न धर्मो ह्ययमीप्सितोऽन्यैः ।
भवान्निवेश्यः प्रथमं ततोऽयं
भीमो महाबाहुरचिन्त्यकर्मा ॥ ८
अहं ततो नकुलोऽनन्तरं मे
माद्रीसुतः सहदेवो जघन्यः ।
वृकोदरोऽहं च यमौ च राज-
न्नियं च कन्या भवतः स्म सर्वे ॥ ९
एवंगते यत्करणीयमत्र
धर्म्यं यशस्यं कुरु तत्प्रचिन्त्य ।
पाञ्चालराजस्य च यत्प्रियं स्या-
त्तद्ब्रूहि सर्वे स्म वशे स्थितास्ते ॥ १०
वैशंपायन उवाच ।
ते दृष्ट्वा तत्र तिष्ठन्तीं सर्वे कृष्णां यशस्विनीम् ।
संप्रेक्ष्यान्योन्यमासीना हृदयैस्तामधारयन् ॥ ११
तेषां हि द्रौपदीं दृष्ट्वा सर्वेषाममितौजसाम् ।
संप्रमथ्येन्द्रियग्रामं प्रादुरासीन्मनोभवः ॥ १२

C 1 7143
B 1 161 13
K. 1. 200. 13

(except D5) स एवमुक्तो मतिमान्प्रवीरो — c) S भ्रातरम् (for मात°) Ñ1 °रो धर्मभृतां वरिष्ठ ; Ñ2 3 V1 B D (except D5) मात्रा मुहूर्तं तु वि(Ñ2 V1 Dn1, n2 D1 2 °तं त्वव)चिंत्य राजा — c) Ś1 यदु° (for कुरु°)

7 Before 7, S (except M3 5) ins युधिष्ठिर — a) Ñ V1 B D फाल्गुन (for पाण्डव) — b) Ś1 K1 त्वयापि; Ñ2 3 V1 B D त्वयैव N शोभिष्य° (D1 वा वत्स्य°), G2 तेनेष्य° — c) Ñ1 S एव (for अपि) Ś1 K1 4 वाह्निं Ñ2 3 V1 B D (except D5) °ल्यतामग्निर(Dn °म)मित्रसाह

8 Ś1 K1 S om उवाच — a) Ś1 Dn1 S (except G1 2 M3) मा (for मा) Ñ1 नृपधर्म°, T3 G4 °धर्मभाजन G1 2 माधर्मभाज न कृथा वरेण्य — b) G1 2 रमेत (for कृथा न) Ś1 K0 1 [ऽ]थैं, K2 4 न ; K3 [ऽ]घ (for ऽन्यै) Ñ V1 B1, 3 D (except D4, 5) धर्मोयमशिष्टदृष्ट, T2 G3 4 °र्मो ह्यनभीप्सि°

9 b) Ñ2 3 V1 B D (except D5) पश्चादय सहदेव स्तरस्वी (B6 °वो जघन्य) Arjp सहदेवो जघन्य (as in text) — Da1 om 9c-10b — d) K4 Ñ1 D3 T1 G2 5, 6 च सर्वे; Ñ2 3 V1 B1, 3 5 Dn D1 4 5 नियोज्या ; B6 Da2 तु सर्वे

10 Da1 om 10ab (of v 1 9) — a) Ñ1 °कृते (for °गते) K0 अस्ति, K3 Ñ1 B Da2 D1 3 4 M6-8 अद्य (for अत्र) — b) Some MSS धर्मं Ñ1 प्रसह्य; Ñ2 3 V1 B D (except D5, Da1 om) विचिंत्य (for प्र°). — c) K0 Ñ V1 B D (except D1 2 4) पचाल° K3 तु; S हि (for च) Ñ2 3 V1 B D (except D5) हित च यत् (for च यत्प्रि°) — d) Ñ1 प्रब्रूहि, Ñ2 3 V1 B D (except D5) प्रशाधि T3 G (except G1) वय (for वशे)

11 K2 om. 11-15 Ś1 K1 3 4 D2 S om उवाच (T1 G1 M3 5 om the ref) — After वैश° उ°, N (except K2) ins

1888* जिष्णोर्वचनमाज्ञाय भक्तिस्नेहसमन्वितम् ।
दृष्टिं निवेशयामासु पाञ्चाल्या पाण्डुनन्दना° ।
[(L 1) Ś1 K1 °स्नेहसमुत्थिता]

— a) N3 V1 B1, 5 6 D (except D5) transp ते and दृष्ट्वा Ñ2 3 B5 Dn D1 4 पश्यतीं (for तिष्ठन्तीं) B3 दृष्ट्वा च सर्वे ते तत्र — b) B3 स्थिता (for सर्वे) — c) Ś1 K (K3 om) D5 °क्ष्यानन्यमनसो — d) T3 G1 हृदये Ñ1 G3 M तद् (for ताम्) V1 °यैस्तेविचारयन्

12 K2 om 12 (of v 1 11) — a) Ñ2 3 B3 D (except D2 5) T1 G1 तु; G6 च (for हि)

13 K2 om 13 (of v 1 11) — a) Ñ1 2 V1 Dn transp रूप and हि K0 काम्यरूप तु पांचा° — b) Ś1 T1 G1 6 M विधातृ — T1 (which om 13cd) ins. after 13ab G6, after 13

1889* ते मन्यमाना कौन्तेया सर्वभूतमनोहराम् ।
चक्रमु सत्त्वसंपन्ना विधात्रा च प्रचोदिता ।

— c) K4 S (T1 om) अन्येभ्य — d) K1 सर्वलोक°

14 K2 om 14 (of v 1 11) — a) Ś1 °कारभाय त, Ñ3 Dn1 D1 °धर्मज्ञ°, T1 G6 °तत्त्वज्ञ° — d) Ñ1

कामं रूपं हि पाञ्चाल्या विधात्रा विहितं स्वयम् ।
बभूवाधिकमन्याभ्यः सर्वभूतमनोहरम् ॥ १३
तेषामाकारभावज्ञः कुन्तीपुत्रो युधिष्ठिरः ।
द्वैपायनवचः कृत्स्नं संस्मरन्वै नरर्षभ ॥ १४
अब्रवीत्स हि तान्भ्रातॄन्मिथोभेदभयान्नृपः ।
सर्वेषां द्रौपदी भार्या भविष्यति हि नः शुभा ॥ १५

इति श्रीमहाभारते आदिपर्वणि द्व्यशीत्यधिकशततमोऽध्यायः ॥ १८२ ॥

१८३

वैशंपायन उवाच ।
भ्रातुर्वचस्तत्प्रसमीक्ष्य सर्वे
ज्येष्ठस्य पाण्डोस्तनयास्तदानीम् ।
तमेवार्थं ध्यायमाना मनोभि-
रासांचक्रुरथ तत्रामितौजाः ॥ १
वृष्णिप्रवीरस्तु कुरुप्रवीरा-
नाशङ्कमानः सहरौहिणेयः ।
जगाम तां भार्गवकर्मशालां
यत्रासते ते पुरुषप्रवीराः ॥ २
तत्रोपविष्टं पृथुदीर्घबाहुं
ददर्श कृष्णः सहरौहिणेयः ।
अजातशत्रुं परिवार्य तांश्च

°स्मरेद्; Ṅ1.2 V1 B D T G1.2 स्मरन् K0.4 वै नरर्षभ; Ṅ1 V1 S भरतर्षभ (Ṅ1 V1 T1 G3 M1.3 °भ); Ṅ1.2 B D मनुजर्षभ (D1 पुरुषर्षभ)

15 K3 om 15 (cf v 1 11). — ᵃ) Ś1 K1 नृप; K0 D1 M1 (*inf lin* as in text) सदा — ᵇ) M1-3 कृष्णा (for भार्या) — ᶜ) S महिषी (G3 सा भार्या) नो भविष्यति — After 15, T1 G3 ins

1850* मन्त्रगूढतमो पार्थो भ्रातुर्ज्येष्ठस्य पाण्डवाः ।
अन्योन्यमनुपश्यन्तो धर्मार्थं काममीप्सितम् ॥

T1 G2.3 ins after 15 D1 (marg *sec m.*) T1 G1.3, after the colophon

1851* जनमेजय ।
1) [illegible]
[illegible] ।
[illegible]
[illegible] ॥
वैशंपायन ।
2) [illegible]
[illegible] ।
[illegible]
[illegible] ॥
3) [illegible]
[illegible] ।
[illegible]
[illegible] ॥
4) इति [illegible]

पार्थान्निविष्टान्निविशेषरूपान् ।
स तद्वचः सत्यमिषेण कर्तुं
बभूवुरस्येष्टतमा हि पार्थाः ॥
[D1 जनमे° उ°, and वैश° उ° — 2ᶜ) D1 भवति (for च नृप) — 3ᵃ) T G3.4 निहतान् (for नृपतीन्) — T1 G1-3 om 4ᶜᵈ — 4ᵈ) T1 G1 कृष्णस्य वै प्राणसमो हि पार्थः]

Colophon om in Ś1 K Dn1 n3 D1 — *Major parvan* T1 G M संभव° (for आदि°) — *Sub-parvan* Ṅ1 B Da D1.4.5 T1 G3.4 द्रौपदीस्वयंवर; T1 संभव — *Adhy name* T1 G3.4 पाण्डवभ्रातृमन्त्र — *Adhy no* (figures, words or both) Dn1 T1 189, D1 (marg) 193, D1 140, T1 G 141 (G2.3 143), M 142 — *Śloka no* Da1 M1 15, Dn1 16

183

☞ This adhy is (1 hapl) om in G1.

1 Ś1 K (except K0) S om उवाच — ᵈ) K0.1.4 °कुरुथ तत्रामितौजाः; K1 V1 B1 (m as in text) T1 G1.2.4 M1.3 कुरुथ (V1 T1 G1 M1.3 °कुरुथथ) तत्रामितौजाः; Ṅ1 B1 D1 Dn सर्वे च ते तस्युरदीनसत्त्वाः; Ṅ1 °कुरुथथ तत्र°; T1 G1.4 °कुरुथथा (G1 °थ) तत्रामितौजसः; M1-3 °कुरुथथा तत्रामितौजाः (*sic*).

2 T1 G1 om 2-3 — ᵃ) T1 G1 °वीर कुरुपुंगवांस्तु — ᵇ) Ś1 K0-4 Ṅ1.2 V1 B D T1 G1 नाशङ्क°. B1m °रौहिणेय (cf v 1 3). — K1.4 (hapl) om 2ᶜ-3ᵇ.

उपोपविष्टाञ्ज्वलनप्रकाशान् ॥ ३
ततोऽब्रवीद्वासुदेवोऽभिगम्य
कुन्तीसुतं धर्मभृतां वरिष्ठम् ।
कृष्णोऽहमस्मीति निपीड्य पादौ
युधिष्ठिरस्याजमीढस्य राज्ञः ॥ ४
तथैव तस्याप्यनु रौहिणेय-
स्तौ चापि हृष्टाः कुरवोऽभ्यनन्दन् ।
पितृष्वसुश्चापि यदुप्रवीरा-
वगृह्णतां भारतमुख्य पादौ ॥ ५
अजातशत्रुश्च कुरुप्रवीरः
पप्रच्छ कृष्णं कुशलं निवेद्य ।
कथं वयं वासुदेव त्वयेह
गूढा वसन्तो विदिताः स्म सर्वे ॥ ६
तमब्रवीद्वासुदेवः प्रहस्य
गूढोऽप्यग्निर्ज्ञायत एव राजन् ।
तं विक्रमं पाण्डवेयानतीत्य
कोऽन्यः कर्ता विद्यते मानुषेषु ॥ ७

दिष्ट्या तस्मात्पावकात्संप्रमुक्ता
यूयं सर्वे पाण्डवाः शत्रुसाहाः ।
दिष्ट्या पापो धृतराष्ट्रस्य पुत्रः
सहामात्यो न सकामोऽभविष्यत् ॥ ८

भद्रं वोऽस्तु निहितं यद्गुहायां
विवर्धध्वं ज्वलन इवेध्यमानः ।
मा वो विद्युः पार्थिवाः केचनेह
यास्यावहे शिबिरायैव तावत् ।
सोऽनुज्ञातः पाण्डवेनाव्ययश्रीः
प्रायाच्छीघ्रं बलदेवेन सार्धम् ॥ ९

C. 1. 7155
B. 1. 191. 25
K. 1. 200. 29

इति श्रीमहाभारते आदिपर्वणि त्र्यशीत्यधिकशततमोऽध्यायः ॥ १८३ ॥

---

3 K1 4 om 3[ab], Dn1 T2 G2 4 om 3 (of v l 1, 2). — [b]) B2m °रौक्मि° (of v l 2) — [cd]) After च, N (Dn1 om) ins अपि (to avoid the hiatus)

4 G2 om 4 (of. v l 1) — [a]) Ko Dn1 तत्र; T1 त च; G6 तांश्च (for ततो) T2 G4 महान् (for ऽब्रवीत्). — [b]) B6 Da कुतीपुत्रः; G6 °सुतान् G6 वरिष्ठान् — [d]) G3.4 °स्याजि°. T1 G6 तस्थौ (for राज्ञ)

5 G2 om 5 (of v l. 1) — [a]) Ś1 अपि (for एव) — [b]) Ñ1 V1 B6 Da Dn2 D1 2 S ते (for तौ) B2 कृष्णां; D1 कृष्ण (for हृष्टा) — [c]) Ñ1 T2 G1 3-5 M6-8 °ष्वसायाश्च V1 B1 3 चैव (for चापि) Ko 2 3 Ñ1 D5 T2 G1, 3-5 M6-8 मधु°; G6 नर°; M8 inf lin कुरु° (as in text) — [d]) Da D2 4 प्रागृ°.

6 G2 om 6 (cf. v 1 1) — [a]) T1 G6 तु (for च) — [b]) K1 प्रवेश्य; Ñ2 3 B1 D (except D5) विलोक्य (for निवेद्य) — [c]) K4 एव (for इह). — [d]) Ś1 K B3 M3 गूढ Ñ2 3 Dn च (for स्म)

7 G2 om 7 (of v l 1) — [c]) Ś1 K1 पाद्धसी°

8 G2 om 8 (of. v l 1) — [a]) N2 3 B (except B6) Dn D1 4 सर्वे (for तस्मात्) Ñ1 M6-8 चास्य मुक्ता; Ñ2 3 V1 B D (except D5) विप्रमुक्ता; T G (G2 om) चापि मु°; M2 5 च स्थ मु° — [b]) Ñ2 3 B D (except D5) घोरात् (for सर्वे) Ñ1 शत्रुसंघा ; V1 मित्रसाहाः; T1 शत्रुसिंहा° D2 पांडुपुत्रा सहाया — [c]) Ko 2 4 Ñ1 B5 T G4 5 M °इ सपुत्र — [d]) S (G2 om.) सामात्यो वै (for सहामात्यो) V1 भविष्यति, G6 भवेयु° — After 8, T G1 3 4 ins

1892* दिष्टया कृष्णा वीर्यमाश्रित्य लब्धा
दिष्टया भूय शक्रदेव कृतार्था° ।

9 G2 om 9 (of v. l 1) — [a]) Ñ1 परमं (for निहितं) K1 वै (for यद्) — [b]) Ko व्यवर्धध्वं; T1 G3 विवृद्धध्व; G6 विवृद्ध वै Ñ V1 B D ज्वलना (D1 °नाद्); G6 °नम् Ko 3 B1 2 6 Da D2 3 T1 °माना , K1 इवैध°; Ñ V1 B5 Dn D4 इवैधमाना ; D1 अवध्यमाना ; G1 M6-8 इवेध्यमान (G1 °ना); G6 °मान — [c]) Ñ2 V1 B1 3 Dn T2 G3-6 M3 6-8 विद्यु , D1 4 विश्व Ko B Da D2 4 5 के(B2m किं)चिदेव; Ñ2 3 V1 Dn D1 केचिदेव — [d]) Ś1 K Ñ1 D5 गच्छावहे; B3 यास्यामहे; S (G2 om) यास्यावो वां — [f]) D6 ययौ (for प्रायाद्) Ś1 साकं (for सार्धम्) — After 9, D4 (marg sec m) T G (except G2) ins.

1893* तत्रैवासन्पाण्डवाश्चाजघन्या
मात्रा सार्धं कृष्णया चापि वीरा ।

Colophon om in G2 — *Major parvan* T2 G1 3-6 M संभव° (for आदि°) — *Sub-parvan* Ś1 K Ñ2 B Da Dn1.n2 D1 2 4 T2 G4 द्रौपदीस्वयंवर; G3 M3 स्वयंवर;

१८४

वैशंपायन उवाच ।

धृष्टद्युम्नस्तु पाञ्चाल्यः पृष्ठतः कुरुनन्दनौ ।
अन्वगच्छत्तदा यान्तौ भार्गवस्य निवेशनम् ॥ १

सोऽज्ञायमानः पुरुषानवधाय समन्ततः ।
स्वयमारान्निविष्टोऽभूद्भार्गवस्य निवेशने ॥ २

सायेऽथ भीमस्तु रिपुप्रमाथी
जिष्णुर्यमौ चापि महानुभावौ ।
भैक्षं चरित्वा तु युधिष्ठिराय
निवेदयांचक्रुरदीनसत्त्वाः ॥ ३

ततस्तु कुन्ती द्रुपदात्मजां ता-
मुवाच काले वचनं वदान्या ।
अतोऽग्रमादाय कुरुष्व भद्रे
बलिं च विप्राय च देहि भिक्षाम् ॥ ४

ये चान्नमिच्छन्ति ददस्व तेभ्यः
परिश्रिता ये परितो मनुष्याः ।
ततश्च शेषं प्रविभज्य शीघ्र-
मर्धं चतुर्णां मम चात्मनश्च ॥ ५

अर्धं च भीमाय ददाहि भद्रे
य एष मत्तर्षभतुल्यरूपः ।
श्यामो युवा संहननोपपन्न
एषो हि वीरो बहुभुक्सदैव ॥ ६

सा हृष्टरूपैव तु राजपुत्री
तस्या वचः साध्वविशङ्कमाना ।
यथावदुक्तं प्रचकार साध्वी

T1 [illegible] — *Adhy. name.* D1 [illegible]; T1 [illegible], T2 G1.4 [illegible], G2 [illegible] — *Adhy. no.* (figures, words or both) [illegible] T1 150, Dam 191, D1 141, T2 G1-3 142, G2.4 144, M 143 — *Śl. no.* Dn 23 (Dn2 9), M2 10 — *Agreg. śl.* Dn2 7127.

184

1 [illegible] D1 S om. उवाच (G1 om. the ref.). — [illegible]) K (except K5) च (for तु) T2 G1.4 [illegible] — [illegible]) D1 [illegible], G1 [illegible] (for यान्तौ) — [illegible]

2 [illegible]) V1 [illegible] — [illegible]) V1 [illegible]; D1.4 G1-3.4 M [illegible]; T2 G1 [illegible]; G2 [illegible] — [illegible] V1 B D [illegible] (for [illegible]) [illegible] — [illegible]) S (except G1 M1) [illegible] — After 2, T G (except G1.4) ins.:

3 [illegible]
[illegible]

3 [illegible]) Ś1 ([illegible]) K1 [illegible] V1 B D T2 G1 M1-3 [illegible] — [illegible]) Ś1 F [illegible] D1 D1 [illegible] — [illegible]) Ś1 F1 [illegible]

4 [illegible]) Ś1 Da1 [illegible]; K1 (corrupt) [illegible]; K4 [illegible] D1 [illegible] — Before 4[illegible], Me-3 ins. कुंती — [illegible]) K1 [illegible]; Ñ2.3 V1 B D (except D1) [illegible]; T1 G1 [illegible] Ñ1 V1 T1 G1.3 M [illegible] — [illegible]) G1 [illegible] (for विप्राय) G1 [illegible] (for भिक्षाम्)

5 [illegible]) Ś1 [illegible]; K1 [illegible] (for ये चान्न) Ñ1 G1.4 (before corr.) [illegible]; T1 G1 [illegible]; G1 M [illegible] (for ददस्व) — [illegible]) Ś1 K Ñ1 [illegible] V1 [illegible] — [illegible]) Ś1 K (except K1) D1 T1 G1.4 तु (for च) Ś1 transp. [illegible] — [illegible]) K (except K1) Ñ V1 B D (except D1) G1 M चतुर्णां

6 [illegible]) Ñ V1 B D (except Da D1) तु (for च) Ś1 K D1 [illegible]; Ñ V1 B Da Dn D1.4 T1 G1.4 च [illegible] — [illegible]) Ś1 [illegible] (by transp.), Ñ V1 B D M [illegible]; T G [illegible] — [illegible]) Ñ1.3 V1 B D (except D1) G1 [illegible] (for [illegible]) — [illegible]) Ś1 K1 [illegible] (for हि) M1 [illegible]

7 [illegible]) M1 [illegible] (for सा) Ñ V1 B D (except D1) T1 G1.4 [illegible] S हि (T1 G1 च) (for तु) — [illegible]) K4 [illegible]; Ñ1 Dn D1 [illegible] — [illegible]) T1 G1 [illegible] — [illegible]) Ś1 K [illegible]; Ś1 V1 [illegible]; Ñ1.3 [illegible] Dn D1 [illegible]; Da [illegible]; G (except G1.4) [illegible].

8 [illegible]) K1 Ñ V1 Dn [illegible] — [illegible]) Only Ś1 as in

ते चापि सर्वेऽभ्यवजह्रुरन्नम् ॥ ७

कुशैस्तु भूमौ शयनं चकार
माद्रीसुतः सहदेवस्तरस्वी ।
यथात्मीयान्यजिनानि सर्वे
संस्तीर्य वीराः सुषुपुर्धरण्याम् ॥ ८

अगस्त्यशास्तामभितो दिशं तु
शिरांसि तेषां कुरुसत्तमानाम् ।
कुन्ती पुरस्तात्तु बभूव तेषां
कृष्णा तिरश्चैव बभूव पत्तः ॥ ९

अशेत भूमौ सह पाण्डुपुत्रैः
पादोपधानेव कृता कुशेषु ।
न तत्र दुःखं च बभूव तस्या
न चावमेने कुरुपुंगवांस्तान् ॥ १०

ते तत्र शूराः कथयांबभूवुः
कथा विचित्राः पृतनाधिकाराः ।
अस्त्राणि दिव्यानि रथांश्च नागा-
न्खड्गान्गदाश्चापि परश्वधांश्च ॥ ११

तेषां कथास्ताः परिकीर्त्यमानाः
पाञ्चालराजस्य सुतस्तदानीम् ।
शुश्राव कृष्णां च तथा निषण्णां
ते चापि सर्वे ददृशुर्मनुष्याः ॥ १२

धृष्टद्युम्नो राजपुत्रस्तु सर्वं
वृत्तं तेषां कथितं चैव रात्रौ ।
सर्वं राज्ञे द्रुपदायाखिलेन
निवेदयिष्यंस्त्वरितो जगाम ॥ १३

पाञ्चालराजस्तु विषण्णरूप-
स्तान्पाण्डवानप्रतिविन्दमानः ।
धृष्टद्युम्नं पर्यपृच्छन्महात्मा
क्व सा गता केन नीता च कृष्णा ॥ १४

कच्चिन्न शूद्रेण न हीनजेन
वैश्येन वा करदेनोपपन्ना ।
कच्चित्पदं मूर्ध्नि न मे निदिग्धं

C. 1. 7170
B. 1. 192. 15
K. 1. 207. 15

---

text (catalectic)। K0. 3 यथात्मदीयान्य°, K1 °त्मीयान्यप्यजि°; K2 Ñ2. 3 V1 B D यथा स्वकीयान्य°, K4 °थास्मदीयान्य°; Ñ1 °थात्मनीयान्य°; T G अथात्मनीना(G1 तथात्मदीया)न्य°; M अथात्मकी(M6–8 °नी)यान्य°. — d) K3. 4 धीरा. K0 धरिण्या

9 a) Ś1 K3 Cd °स्त्यशांता°, K0. 2 B6 D5 अगस्तिशा°; K3 sup lin °स्त्याशांता°; K4 D1 °स्त्याशा°; D4m S °स्त्यकांता° Ñ1 °स्त्यगुप्ताभिमतां दिशां तु — b) G1 अभूवन् (for तेषां) D2 पुरुषोत्तमानां (for कुरु°) — d) S (except T1 G1. 6) कृष्णापि तत्रैव Ś1 K1 T2 G2–5 M सा तु; K4 Ñ1 पादे; V1 चासे; T1 G6 पत्नी; G1 सांते (for पत्त). Ñ2. 3 B D पादांतरे चाथ (B6 Da D2. 4. 5 °रेणाथ) बभूव कृष्णा Cd cites तिर° and प(or पा)त्त.

10 b) Ś1 °पदानैव; K1. 3 G2 °पधानैव; Ñ2. 3 V1 B (except B6) D (except D5) °पधानीव ❁ Dev पादा॰ उपधानं शिर स्थानं यस्या ।❁ — c) Ñ1 मन आस; Ñ2. 3 V1 B D (except D5) मनसापि (for च बभूव) T1 G6 न तत्र तस्या मनसश्च (G6 मन आप) दु:ख; T2 G1–5 M न तत्र दु:खं च समाससाद — d) D2 चात्र मेने; T2 G4 चापि मेने

11 b) Ñ1 कथां °श्रां °कारा — c) T2 G3–5 रथाश्वनागान्
— d) Some MSS परस्व°

12 b) K0 Ñ V1 B Da D1, 3, 5 पचाल° Ś1 G2 M6–8 सुता (for सुत°) — c) S (except T1 G6 M8) श्रुत्वा च (for शुश्राव) Ñ2. 3 V1 B D तदा (for तथा). Ś1 K V1 T1 G6 अभिपन्नां (Ś1 °न्ना) (for निषण्णां)

13 a) K0. 3 च, T2 G (except G1) स (for तु) K4 वृत्त (for सर्वं) — b) K4 transp वृत्तं and तेषां D1 सर्वं, T2 G (except G1) चैषां (for तेषां) — d) Da T G (except G1) त्वरित

14 Before 14, M6–8 ins वैशं° — a) Some MSS पंचाल° G4 °ण्णचेत॰ — b) K4 °ड्वाश्चाप्रति°. — d) T1 G1 हृता (for गता) T1 G3. 5. 6 M हृता; G1 गता (for नीता)

15 K2 om 15 — b) T1 G2 वा कारणेनोप°. G1 वा मम सुता चापनीता — c) Ś1 (orig) मे न दिग्धं, Ś1m K4 Ñ3 V1 B1. 3. 6 Da D1. 2 मे निविष्ट; K1 मेनुदिग्धं; Ñ2 Dn D4. 5 पङ्कदिग्ध, T G1. 2. 5. 6 M मे विपक्तं Cd cites निदिग्धं (= विनिहित) as in text T2 G3. 4 कच्चिन्न पांसौ हविराहुतं तत् — d) K4 Ñ V1 B D G1 कच्चिन्न माला पतिता (K4 ins here वै, D5 -भूत्) श्मशाने

16 a) B2 T1 G3. 5. 6 °प्रतिमो; T2 G4 °प्रथमो; Cd

कच्चिन्माला पतिता न श्मशाने ॥ १५

कच्चिन्न वर्णप्रवरे मनुष्य
उद्रिक्तवर्णोऽप्युत वेह कच्चित् ।
कच्चिन्न वामो मम मूर्ध्नि पादः
कृष्णाभिमर्शेन कृतोऽद्य पुत्र ॥ १६

कच्चिच्च यक्ष्ये परमप्रतीतः
संयुज्य पार्थेन नरर्षभेण ।
ब्रवीहि तत्त्वेन महानुभावः
कोऽस्या विजेता दुहितुर्ममाद्य ॥ १७

विचित्रवीर्यस्य तु कच्चिदद्य
कुरुप्रवीरस्य धरन्ति पुत्राः ।
कच्चित्तु पार्थेन यवीयसाद्य
धनुर्गृहीतं निहतं च लक्ष्यम् ॥ १८

इति श्रीमहाभारते आदिपर्वणि चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥

१८५

वैशंपायन उवाच ।

ततस्तथोक्तः परिहृष्टरूपः
पित्रे शशंसाथ स राजपुत्रः ।
धृष्टद्युम्नः सोमकानां प्रबर्हा
वृत्तं यथा येन हृता च कृष्णा ॥ १

योऽसौ युवा स्वायतलोहिताक्षः
कृष्णाजिनी देवसमानरूपः ।
यः कार्मुकाग्र्यं कृतवानधिज्यं
लक्ष्यं च तत्पातितवान्पृथिव्याम् ॥ २

असज्जमानश्च गतस्तरस्वी

धृतो द्विजाग्र्यैरभिपूज्यमानः ।
चक्राम वज्रीव दितेः सुतेषु
सर्वैश्च देवैर्ऋषिभिश्च जुष्टः ॥ ३
कृष्णा च गृह्याजिनमन्वयात्तं
नागं यथा नागवधूः प्रहृष्टा ।
अमृष्यमाणेषु नराधिपेषु
क्रुद्धेषु तं तत्र समापतत्सु ॥ ४
ततोऽपरः पार्थिवराजमध्ये
प्रवृद्धमारुज्य महीप्ररोहम् ।
प्रकालयन्नेव स पार्थिवौघा-
न्क्रुद्धोऽन्तकः प्राणभृतो यथैव ॥ ५
तौ पार्थिवानां मिषतां नरेन्द्र
कृष्णामुपादाय गतौ नराग्र्यौ ।
विभ्राजमानाविव चन्द्रसूर्यौ
बाह्यां पुराद्भार्गवकर्मशालाम् ॥ ६
तत्रोपविष्टार्चिरिवानलस्य
तेषां जनित्रीति मम प्रतर्कः ।
तथाविधैरेव नरप्रवीरै-
रुपोपविष्टैस्त्रिभिरग्निकल्पैः ॥ ७
तस्यास्ततस्तावभिवाद्य पादा-
वुक्त्वा च कृष्णामभिवादयेति ।
स्थितौ च तत्रैव निवेद्य कृष्णां
भैक्षप्रचाराय गता नराग्र्याः ॥ ८
तेषां तु भैक्षं प्रतिगृह्य कृष्णा
कृत्वा बलिं ब्राह्मणसाच्च कृत्वा ।
तां चैव वृद्धां परिविष्य तांश्च
नरप्रवीरान्स्वयमप्यभुङ्क्त ॥ ९
सुप्तास्तु ते पार्थिव सर्व एव

C. 1 7183
B. 1 193 10
K. 1 203. 11

य. (for तत्)

3 a) Ñ1 B6 स सज्ज°; V1 स भ्राज°; B8m D2 4 स भाज्य°, Da D1 5 असह्य°, G2 अतर्क्य°; Cd as in text Ñ2 3 B D (except D5) G2 5 तत (for गत) T1 G1 असशय राजपुत्रस्त°. — b) V1 S द्विजातिभिस्तैर् — c) Ñ1 व्युत्क्राम, S विक्रम्य — d) T3 G4 स (for च) K1 तुष्ट, S हृष्ट ; Cd as in text — After 3, D4 (marg sec m) T G (except G2) ins

1896* श्यामो युवा वारणमत्तगामी
कृत्वा महत्कर्म सुदुष्कर तत् ।

G1 cont T G3 4 ins after 6ab

1897* विक्षोभ्य विद्राव्य च पार्थिवास्तान्
स्वतेजसा दुष्प्रतिवीक्ष्यरूपौ ।

4 a) K4 Ñ2, 3 B5 6 D (except D4) G1 प्रगृह्य; B1 3 गृहीत्वा (for च गृह्य) K0 3 4 अन्वगात् T G2-6 M कृष्णापि कृष्णाजिनिन जगाम — After 4ab, T G M3, 5 ins

1898* य सूतपुत्रेण चकार युद्ध
शक्रेऽर्जुन त त्रिदशेशवीर्यम् ।

— d) K0 3 4 Ñ3 3 B Dn D1 5 G2 वै (for त) T1 युद्धाय सर्वेषु समा°

5 a) G2, 3 4 (before corr) 5 हि य (for ऽपर) K1 °राजमान्ये; Ñ2 3 V1 B D T1 °सघ(D2 °सिंह)मध्ये — b) Ś1 K1 °माभज्य, K2-4 Ñ1 V1 Da °मारुह्य G2 महीं प्रचक्ष — c) K0 3 S प्रा(or प्र)क्रालयत्, K1 प्राक्रा° K0 3 M तेन, Dn इति, T G तत्र (for एव) T1 G6 पार्थिवात्रणे, T3 G1-5 °वौघ; M °घेन — d) T3 G4 6 भीमः (for क्रुद्ध) — After 5, M3 5 ins

1899* तं भीमसेनं परितर्कयामि
य पातयामास रणे तु शल्यम् ।

6 a) T3 G3 4 ता (for तौ) V1 प्रवरौ, G1 अधिपौ, G3 अमिता (for मिषता) V1 नृवीरौ (for नरेन्द्र) — b) M5 नरेंद्रौ (for नराग्र्यौ) — After 6ab, T G3, 4 ins 1897* (cf v 1 3) — d) Ś1 K1 G1 5 M6-8 बाह्यात्, K4 Da T3 G4 बाह्य Ś1 K1 D5 पुरा, Ñ1 इमां

7 a) T1 M6-8 ततोप° — b) D5 एष; T3 G3 4 आस (for प्र) K4 °त्री मम तत्र तर्क° — c) M6-8 °धैर्न-रवीरैरुपेतैर् — d) T1 G1 6 M3 5 °ष्टा त्रिभि°

8 a) K4 तस्याग्रतस् K0 1 3 D5 अभिवद्य — b) Da D2 4 तु (for च) Ñ3 3 B D °ष्णा त्वभि° S (except T1 M5) उपोपविष्टौ नरलोकवीरौ — c) Ñ V1 Dn D1 स्थिता, B Da D2 4 5 भिक्षा; M3 5 स्थिताश्च् K2 T1 G3 M5 निवेश्य — K1 (hapl) om 8d-9a — d) Ś1 K (K1 om) Ñ1 V1 G1 भैक्ष्य°, Ñ2 3 B D भिक्षा°.

9 K1 om 9a (cf v 1 8) — a) Some MSS भैक्ष्यं K3 परिगृह्य, V1 प्रतिहृत्य — b) K3 Ñ2 3 B D T1 दत्त्वा (for कृत्वा) S ब्राह्मणानर्चयित्वा Cd cites ब्राह्मणसात् — c) Ñ1 दत्त्वा (for वृद्धा) Ñ V1 B7 3 Dn D4 5 °वेष्य; B6 °वेश्य, D2 G6 °वेक्ष्य; G5 °भोज्य; a few MSS (incl.

कृष्णा तु तेषां चरणोपधानम् ।
आसीत्पृथिव्यां शयनं च तेषां
दर्भाजिनाग्र्यास्तरणोपपन्नम् ॥ १०
ते नर्दमाना इव कालमेघाः
कथा विचित्राः कथयांबभूवुः ।
न वैश्यशूद्रौपयिकीः कथास्ता
न च द्विजातेः कथयन्ति वीराः ॥ ११
निःसंशयं क्षत्रियपुंगवास्ते
यथा हि युद्धं कथयन्ति राजन् ।
आशा हि नो व्यक्तमियं समृद्धा
मुक्तान्हि पार्थाञ्शृणुमोऽग्निदाहात् ॥ १२
यथा हि लक्ष्यं निहतं धनुश्च
सज्यं कृतं तेन तथा प्रसह्य ।
यथा च भाषन्ति परस्परं ते
छन्ना ध्रुवं ते प्रचरन्ति पार्थाः ॥ १३
ततः स राजा द्रुपदः प्रहृष्टः
पुरोहितं प्रेषयां तत्र चक्रे ।
विद्याम युष्मानिति भाषमाणो
महात्मनः पाण्डुसुताः स्थ कच्चित् ॥ १४
गृहीतवाक्यो नृपतेः पुरोधा
गत्वा प्रशंसामभिधाय तेषाम् ।
वाक्यं यथावन्नृपतेः समग्र-
मुवाच तान्स क्रमवित्क्रमेण ॥ १५
विज्ञातुमिच्छत्यवनीश्वरो वः
पाञ्चालराजो द्रुपदो वरार्हाः ।
लक्ष्यस्य वेद्धारमिमं हि दृष्ट्वा
हर्षस्य नान्तं परिपश्यते सः ॥ १६
तदाचड्ढ्वं ज्ञातिकुलानुपूर्वीं

पदं शिरःसु द्विषतां कुरुध्वम् ।
प्रह्लादयध्वं हृदयं ममेदं
पाञ्चालराजस्य सहानुगस्य ॥ १७
पाण्डुर्हि राजा द्रुपदस्य राज्ञः
प्रियः सखा चात्मसमो बभूव ।
तस्यैष कामो दुहिता ममेयं
स्नुषा यदि स्यादिति कौरवस्य ॥ १८
अयं च कामो द्रुपदस्य राज्ञो
हृदि स्थितो नित्यमनिन्दिताङ्गाः ।
यदर्जुनो वै पृथुदीर्घबाहु-
र्धर्मेण विन्देत सुतां ममेति ॥ १९
तथोक्तवाक्यं तु पुरोहितं तं
स्थितं विनीतं समुदीक्ष्य राजा ।
समीपस्थं भीममिदं शशास
प्रदीयतां पाद्यमर्घ्यं तथास्मै ॥ २०
मान्यः पुरोधा द्रुपदस्य राज्ञ-
स्तस्मै प्रयोज्याभ्यधिकैव पूजा ।
भीमस्तथा तत्कृतवान्नरेन्द्र
तां चैव पूजां प्रतिसंगृहीत्वा ॥ २१
सुखोपविष्टं तु पुरोहितं तं
युधिष्ठिरो ब्राह्मणमित्युवाच ।
पाञ्चालराजेन सुता निसृष्टा
स्वधर्मदृष्टेन यथानुकामम् ॥ २२
प्रदिष्टशुल्का द्रुपदेन राज्ञा
सानेन वीरेण तथानुवृत्ता ।
न तत्र वर्णेषु कृता विवक्षा

C 1 7197
B 1 193 24
K 1 208 25

जातीं च कुला° — ^{b}) S (except T3) शिर सु पाद द्वि° — ^{d}) K0 2 Ñ V1 B D (except D4) पचा° Ś1 K B5 Dn D1 5 च सानुग(K2 3 °ज)स्य, T1 सहात्मजस्य; T3 G M (except M3) सहानुजस्य

18 ^{d}) B1 3 इह; M6–8 यदि (for इति) Ñ2, 3 B5 Da1 Dn D1 4 स्नुषां प्रदास्यामि हि कौरवाय

19 ^{a}) Ñ1 स; Ñ2 3 V1 B D (except D5) हि (for च) — ^{b}) B1 5 °तार्गी, B3 G2 °ताग — ^{c}) S1 K0 1 3 यदि, K2, 4 अपि (for यद्) K2 4 असौ, Ñ1 S मे (G2 अय) (for वै) — ^{d}) K4 Ñ2 3 B D ममैतां, V1 समेता, S (except G2 6) इहेति — After 19, T1 ins

1900* तद्वै श्रुत्वा पाण्डवा॰ सर्वे एव
राज्ञा यदुक्त द्रुपदेन वाक्यम् ।
कुन्त्या सार्धं मानया चापि चक्रु
पुरोहित ते पुरुषप्रवीरा ।,

while N ins

1901* कृत हि तस्यात्सुकृत ममेद
यशश्च पुण्य च हित तदेतत् ।
[(L 1) Ś1 K मयेद]

20 Before 20, T1 ins युधिष्ठिर॰ — ^{a}) Ñ B D अथो° (Da यथो°) K4 Ñ V1 B1 6 D (except D1 2) हि (for तु) K2 Ñ V1 B1 Dn2 D1 2 °हित स्थित B3 °क्य नृपते पुरोहित; T1 द्विजस्य वाक्य तु निशम्य त च — G1 (hapl) om 20^b–22^a — ^{b}) K3 तथा, Ñ V1 B Da1 Dn D1 ततो (for स्थित) T3 G (G2 om) M6–8 विधिज्ञ (for विनीत) D2 विनीतवाक्य; T1 पुरोहित चै (for स्थितं वि°) V1 M3 5 प्रसमीक्ष्य — K0 (? hapl) om 20^c–21^b — ^{c}) K4 पार्श्वे स्थित, Ñ V1 B D (except D5) समीपतो (Ñ1 B3 °गं) K4 T3 G3 4 भीमसेन (for भीममिद)

21 G2 om. 21, K0 om 21^{ab} (cf v l 20) — ^{b}) Ñ1 तस्मात् (for तस्मै) D2 प्रयुज्या, D4 प्रदेया. T3 G3 4 ins हि after प्रयोज्या Ñ2 3 B1 3 6 D T1 हि, B5 T3 G (G2 om) M च (for एव) — ^{c}) K1 Ñ V1 B D (except D5) ततस् (for तथा) T G1 3 4 6 M3 तां, G5 M6–8 त (for तत्) — ^{d}) T1 स (for ता) K1 एव, S (except T1, G2 om) चापि (for चैव) Ś1 K1 प्रगृहीत॰वान्स , K2 अपि सम्प्रगृह्य, K3 प्रतिसनिगृह्य, K4 Ñ1 V1 B1 3 G5 6 M6–8 प्रतिसगृहाण, Ñ2 3 B5 6 D (except D5) प्रतिगृह्य हर्षात्, T G1 3 4 M3 प्रतिगृह्य तम; M3 (*inf lin*) 5 प्रतिजग्राह चैव (for प्रतिसगृहीत्वा as in K0 D5)

22 G2 om 22^a (cf v l 20) — ^{a}) Ñ2 3 B1 3 Dn D1 5 °हित तदा — ^{c}) K3 Ñ V1 B1 3 5 D2 5 पचाल°. K1 B3, 6 Da Dn3 D2 4 5 विसृष्टा — ^{d}) G1 °संनिष्टेन K3 पथानु°; Ñ2 3 V1 B D (except D5) यथा (B Da2 D4 पथा) न कामात्, T1 G6 यथानिकाम, T3 G1–5 M य(G1, 5 M3 5 प)थाद्य काम

23 ^{a}) Ś1 K1 प्रतिष्ठितो यो द्रुपदेन शुल्क — ^{b}) Ś1 K1 सोनेन, K2 Ñ2 3 D (except D1 2 4) S सा तेन Ś1 K1 यथानुवृत्त , K0 °वृत्त ; T G M3 5 तथा गृहीता

C. 1. 7209
B. 1. 194. 7
K. 1. 209. 10

धनूंषि चाग्र्याणि शराश्च मुख्याः
शक्त्यृष्टयः काञ्चनभूषिताश्च ॥ ७
प्रासा भुशुण्ड्यश्च परश्वधाश्च
सांग्रामिकं चैव तथैव सर्वम् ।
शय्यासनान्युत्तमसंस्कृतानि
तथैव चासन्विविधानि तत्र ॥ ८
कुन्ती तु कृष्णां परिगृह्य साध्वी-
मन्तःपुरं द्रुपदस्याविवेश ।
स्त्रियश्च तां कौरवराजपत्नीं
प्रत्यर्चयांचक्रुरदीनसत्त्वाः ॥ ९
तान्सिंहविक्रान्तगतीनवेक्ष्य
महर्षभाक्षानजिनोत्तरीयान् ।
गूढोत्तरांसान्भुजगेन्द्रभोग-
प्रलम्बबाहून्पुरुषप्रवीरान् ॥ १०
राजा च राज्ञः सचिवाश्च सर्वे
पुत्राश्च राज्ञः सुहृदस्तथैव ।
प्रेष्याश्च सर्वे निखिलेन राज-
न्हर्षं समापेतुरतीव तत्र ॥ ११
ते तत्र वीराः परमासनेषु
सपादपीठेष्वविशङ्कमानाः ।
यथानुपूर्व्या विविशुर्नराग्र्या-
स्तदा महार्हेषु न विस्मयन्तः ॥ १२
उच्चावचं पार्थिवभोजनीयं
पात्रीषु जाम्बूनदराजतीषु ।
दासाश्च दास्यश्च सुमृष्टवेषाः
भोजापकाश्चाप्युपजह्रुरन्नम् ॥ १३

Ñ1.2 V1 Dn D1 S सर्वाणि कृत्यानि; B5 कृत्यानि सर्वाणि Ś1 D1 G2 अखिलानि Ś1 K D2 चैव (for तत्र) — c) K1 Ñ3 V1 B1 Dn D1 T2 G3-5 M2 अपि (for च) Ñ1 यानि, Ñ2 3 V1 B D (except D5) तत्र (for तानि)

7 a) K (except K1) रथाश्च व(K2 च)र्माणि; Ñ Dn D1 वर्माणि चर्माणि, V1 गदाश्च चर्माणि, B Da D2.4 5 चर्माणि वर्माणि, S अस्त्राणि (T1 धनूंषि) शस्त्राणि — b) B5 Da D4 शस्त्रा, G2 खड्गा (for खड्गा) T2 G2-4 महत्यो B5 Da S अथ (for अश्व) D2 T2 G (except G1 6) -रथान् Ñ3 B Da D4 विचित्रा°; D2 G (except G1.6) च चित्रान् — c) D1 om. 7c S (except T1) चोग्राणि K3.4 T2 G2.4 5 शरांश्च मुख्यान् Ñ2 V1 Dn चित्रा (for मुख्या°) — d) Ñ2 Dn °भूषणाश्च

8 a) K2 T2 G2.4-6 प्रासान् Ko 2 3 भुसंढ्यश्च, K1 भुसुंढ्य°; K4 भृशंढ्य°, B1.3.6 भुषुढ्य°, D1 5 भुशाढ्य°; T1 भुसुंढ्य°, T2 G4 भुसुढी°, G1 भुसढ्य°, G2 भुसढी; G3 भुसुंढ्य°; G5 M5 भुसढ्य°; G6 भुसंढ्य°, M2 6-8 भुसढ्य° Ko 2.4 Da D1.2 परश्वधा°, D4 G1 °श्वधा°, T1 तथा शतघ्न्य; T2 G2 4 6 परश्वधा°, G3 5 °श्वघा° — b) Ś1 K4 D1 G6 समग्रामिकं; Ñ1 S सांग्रामिका(Ñ1 T1 G1 M2.6-8 °का)श्चैव Ñ1 V1 D1 तथेह, T G2-6 तथापि (for तथैव) S चान्ये (T2 G2-6 °न्यान्) (for सर्वम्) — c) Ñ2 Dn °वस्तुवति, D4 °सत्कृतानि (for °संस्कृतानि) — d) T2 G (except G1) राजन् (for चासन्) Ś1 K1.2 4 D5 तथैव चापानि (D5 चासानि) महांति तत्र; Ñ2 3 Da Dn D1.2 4 तथैव वासो विविधं च तत्र.

9 a) T1 G1 M5 च (for तु) — b) Ś1 K (except K3) स्त्रियश्च ता, T1 G6 राजस्त्रिय — c) Ñ2 Dn प्रत्यर्चयामासुर्; T2 G2-5 प्रत्युद्ययौचक्रुर् Ś1 K1 Ñ3 G2 3.5 6 अदीनसत्त्वां

10 a) K (except K1) D5 S उदी(G2 °दै)क्ष्य, Ñ1 समी°, Ñ3 3 V1 B Da Dn D1.2 4 निरी° — b) K3 3 मत्तर्षभा° — c) Ko 4 गूढोत्तमांगान्, K2 3 B5 D2 गू(K3 स्यू)ढोन्नतासान्, S व्यूढा(G3° ढा)तरासान्; Cd as in text K2 Ñ1 G1.3 M3.6 °गेंद्रभोगान् — d) G5 प्रगल्भयाहून्

11 a) Ñ1 मजना° (for सचिवा°) — b) Ś1 K D5 पौत्रा° (for राज्ञ) Ś1 प्रसवाश्च सर्वे (m as in text) — d) B5 Da D2 समापेदु°; M5 समासेदु°

12 a) K2 वीराश्च सर्वे परमा° — b) G1 पात्रो(! read °ढो)पपीठेषु, M2 8 सपादपी° — c) Ñ2.3 B (except B6) Dn D1 2 4 यथानुपूर्वं, T1 G1 °पूर्व्याद्, T2 G2.4 °पूर्व्ये — d) Ñ3 3 B1.2 3 Dn D1.4.5 G6 M6 7 तथा B6 Da D2 सिंहासनेषूत्तमभूमिपा यथा

13 b) Ś1 K1.4 V1 T1 G1.2.6 पात्रेषु Ś1 K1 V1 T1 G1.6 °राजतेषु — c) Ś1 K D5 सूदा° (for दासा°) D5 दासा° (for दास्य°) V1 प्रहृष्टरूपा A few MSS -वेशाः — d) Ś1 K2 भोज्या(K2 °जा)पका°; K1 भोज्येनका, K3.4 Ñ2.3 V1 B D समोजका°, S भोज्य पर T1 चाप्यवजह्रुर्, T2 G1 च व्यप°, G2 च न्युप°; G6 चाप्यप°. Ñ1 भोज्यप्रकारानुपजह्रुरन्न

14 b) Ñ B1 6 D (except D2.4 5) यथास्मकामं, V1

ते तत्र भुक्त्वा पुरुषप्रवीरा
यथानुकामं सुभृशं प्रतीताः ।
उत्क्रम्य सर्वाणि वसूनि तत्र
सांग्रामिकान्याविविशुर्नृवीराः ॥ १४

तल्लक्षयित्वा द्रुपदस्य पुत्रो
राजा च सर्वैः सह मन्त्रिमुख्यैः ।
समर्चयामासुरुपेत्य हृष्टाः
कुन्तीसुतान्पार्थिवपुत्रपौत्रान् ॥ १५

इति श्रीमहाभारते आदिपर्वणि षडशीत्यधिकशततमोऽध्यायः ॥ १८६ ॥

१८७

वैशंपायन उवाच ।
तत आहूय पाञ्चाल्यो राजपुत्रं युधिष्ठिरम् ।
परिग्रहेण ब्राह्मेण परिगृह्य महाद्युतिः ॥ १
पर्यपृच्छददीनात्मा कुन्तीपुत्रं सुवर्चसम् ।
कथं जानीम भवतः क्षत्रियान्ब्राह्मणानुत ॥ २
वैश्यान्वा गुणसंपन्नानुत वा शूद्रयोनिजान् ।
मायामास्थाय वा सिद्धांश्चरतः सर्वतोदिशम् ॥ ३
कृष्णाहेतोरनुप्राप्तान्दिवः संदर्शनार्थिनः ।
ब्रवीतु नो भवान्सत्यं संदेहो ह्यत्र नो महान् ॥ ४
अपि नः संशयस्यान्ते मनस्तुष्टिरिहाविशेत् ।
अपि नो भागधेयानि शुभानि स्युः परंतप ॥ ५
कामया ब्रूहि सत्यं त्वं सत्यं राजसु शोभते । C 1 7223 B 1 195. 6 K 1. 210 6

°वकाशं; B8 यथा स्वकाम; B5 °थैकाम T8 G1-4 सहश — K2 om 14c-15b — c) Ś1 K (K2 om) Ñ2 3 V1 Dn D1 5 राजन् (for तत्र) — d) Cd cites साम्रामिकानि (as in text) K1 साम्रामिकान्यामुसुदुरु, Ñ1 2 V1 Dn D1 °मिक ते (D1 वै) विविशुर्

15 K2 om 15ab (cf. v 1 14). — a) Ś1 K1 D2 तान्; B5 6 Dn8 D4 स; Da स (for तल्ल). — b) T G3-6 सर्वे G6 °मुख्या. — c) Ko 3 Dn D1 समर्थया° Ñ1 B D2 4 समर्च(Ñ1 B1 °र्थ)यामास उपेत्य हृष्ट — d) Ś1 °पुत्रपौत्रै°; K1 2 Ñ8 °पुत्रपौत्रा ; Ñ2 Dn D1 °राजपुत्रान्, T1 °मुख्यपौत्रान्

Colophon *Major parvan* T8 G M सभव° (for आदि°) — *Sub-parvan* Ś1 द्रौपदीविवाह, K1-4 Ñ8 B Da Dn1.n2 D2 4.5 T8 G1 3 4 M5 द्रौपदी(Da1 D5 M6 om.)स्वयवर, T1 सभव — *Adhy name* Ko यज्ञासा (read जिज्ञासा); K4 D5 वर्णजिज्ञासा; T8 G1.3.4 पाढवपरिज्ञान — *Adhy no* (figures, words or both) Dn2 T1 193, D1m 197, D5 G2 144, T8 G1-6 145, G1 3 147, M 146 — *S'loka no* Da1 Dn 15, M5 16 — *Aggregate s'loka no* Dn2 7199.

187

1 Ś1 K (except Ko) Da1 D2 S om उवाच — a) D5 S पाचाल्यो — c) D1 प्रतिग्रहेण, G2 परिग्रहाणा — d) D1 प्रतिगृह्य K Da D2 5 महामति ; Ñ1 समद्युति..

2 a) Ś1 K D5 M5 °पृच्छदमेयात्मा — b) Ś1 T G3-5 M5 5 °पुत्रं युधिष्ठिर — Before 2cd, T1 ins द्रुपद — d) Ś1 K D5 ब्राह्मणान्क्षत्रियान् (by transp). G2 ब्राह्मणानुगान्

3 b) K2 Ñ V1 B D G2 6 M7 अथ वा — c) Ś1 G2 वै, Ñ1 व° (for वा) Ñ2 3 V1 B D (except D5) वा विप्रान् (D2 विप्राय) — d) B D2 4.5 G1 M6-8 चरत. K4 °तो दिश

4 a) Ñ V1 B (except B6) D (except Da) G2 M5 °प्राप्ता — b) K2 B6 Da देवान्, Ñ2 3 V1 B1 2 5 Dn D1 3 4 5 देवा (for दिव) — c) T2 G2.4 प्रचीहि D5 यथासत्य — d) Ñ1 S ह्य(M8 5 -प्य)स्ति (for ह्यत्र) Ko विद्यते, K3 4 वर्तते (for नो महान्)

5 b) K2 T8 G1(by corr) 5 6 मनस्तुष्टिमिहा°, K4 मनस्तुष्टेरिहाविशत्, Ñ V1 B D मन संतुष्टिमावहेत् (V1 °विशेत्, Dn8 D4 °हरेत्), T1 G8 °ष्टिरिवाविशेद्; G2 °ष्टिरयाविशत्

6 a) Ś1 T1 G1 कामये, K1 D5 काम्यया, K4 Ñ2 3 V1 B Da Dn D1.2 4 इच्छया Ñ2 V1 Dn D1 तत्सत्य (for सत्य त्व) T8 G2-5 कामयानस्य ब्रूहि त्वं (G5 मे ब्रूहि), G6 कामयेय ब्रूहि सत्य — b) B5 साधुषु (for राजसु) Ś1 K D5 पूज्यते M7 सत्य ब्रूहि सुशोभते — c) Ko 3 4 D5 तु; M6-8 न (for च) — d) S °स्य नानृत भवेत्

7 a) Ś1 स्वमर°, K1 परम°, Ñ1 °सकाश, D1 ह्यमृत°.

C. 1. 7223
B. 1. 195. 6
K. 1. 210. 6

इष्टापूर्तेन च तथा वक्तव्यमनृतं न तु ॥ ६
श्रुत्वा ह्यमरसंकाश तव वाक्यमरिंदम ।
ध्रुवं विवाहकरणमास्थास्यामि विधानतः ॥ ७

युधिष्ठिर उवाच ।

मा राजन्विमना भूस्त्वं पाञ्चाल्य प्रीतिरस्तु ते ।
ईप्सितस्ते ध्रुवः कामः संवृत्तोऽयमसंशयम् ॥ ८
वयं हि क्षत्रिया राजन्पाण्डोः पुत्रा महात्मनः ।
ज्येष्ठं मां विद्धि कौन्तेयं भीमसेनार्जुनाविमौ ।
याभ्यां तव सुता राजन्निर्जिता राजसंसदि ॥ ९
यमौ तु तत्र राजेन्द्र यत्र कृष्णा प्रतिष्ठिता ।
व्येतु ते मानसं दुःखं क्षत्रियाः स्मो नरर्षभ ।
पद्मिनीव सुतेयं ते ह्रदादन्यं ह्रदं गता ॥ १०
इति तथ्यं महाराज सर्वमेतद्ब्रवीमि ते ।
भवान्हि गुरुरस्माकं परमं च परायणम् ॥ ११

वैशंपायन उवाच ।

ततः स द्रुपदो राजा हर्षव्याकुललोचनः ।
प्रतिवक्तुं तदा युक्तं नाशकत्तं युधिष्ठिरम् ॥ १२
यत्नेन तु स तं हर्षं संनिगृह्य परंतपः ।
अनुरूपं ततो राजा प्रत्युवाच युधिष्ठिरम् ॥ १३
पप्रच्छ चैनं धर्मात्मा यथा ते प्रद्रुताः पुरा ।
स तस्मै सर्वमाचख्यावानुपूर्व्येण पाण्डवः ॥ १४
तच्छ्रुत्वा द्रुपदो राजा कुन्तीपुत्रस्य भाषितम् ।
विगर्हयामास तदा धृतराष्ट्रं जनेश्वरम् ॥ १५
आश्वासयामास च तं कुन्तीपुत्रं युधिष्ठिरम् ।
प्रतिजज्ञे च राज्याय द्रुपदो वदतां वरः ॥ १६
ततः कुन्ती च कृष्णा च भीमसेनार्जुनावपि ।
यमौ च राज्ञा संदिष्टौ विविशुर्भवनं महत् ॥ १७
तत्र ते न्यवसन्राजन्यज्ञसेनेन पूजिताः ।

— d) G4 आस्थास्याम; M6-8 °स्यति, Cd as in text

8 Ś1 K1.2 S om उवाच — a) G2 दुर्मना (for वि°) — b) D5 S पांचाल — c) Ś1 K ध्रुवं काम.. — d) K3 न संशय, B3 अशेषत° (for अस°)

9 a) Some MSS मा (for मां) — e) K4 Ñ3 Dn D1.5 आभ्यां — f) B1m विजिता G2 जन°

10 a) Ñ1 तत्र तु (by transp) Ñ2.3 V1 B D (except D5) M-3 च, T G2-6 M2.5 तौ (for तु) Ñ2.3 V1 B D (except D5) कुंती च (for राजेन्द्र) K3 G1 इमौ यमौ च राजेंद्र (G1 माद्रेयौ) — b) Ñ2 Dn D1 व्यवस्थिता (for प्रति°) — c) M व्येतु — d) K3.4 S स्म (for स्मो) B3 S (except G2) नराधिप — f) Ñ V1 B3 Dn1.n3 D1 G1 M7 अन्यहृद Ś1 K D5 T1 हृदाद्ध्रदमि(K2 °द् ह्)वागता

11 a) Ś1 K D5 G2 इति सत्य, T2 G3.4 इति तस्व B3 महाभाग — b) K0.2 B Da D4 G1 M5 सत्यम् (for सर्वम्) M6-8 एव (for एतद्) — c) Ś1 K D5 5 च (for हि)

12 Ś1 K1.2 D5 S om. उवाच (M2.5 om. the ref.) — T1 (hapl.) om. 12b–13a — b) G1 हर्षगाकुल° — cd) Ñ2 प्रतिवाक्यं, D1 °वक्तुं, T1 °युक्त. K3 तया युक्त; Ñ3 V1 Dn D1.2.5 मुदा युक्तो (D5 °क्तं) (for तदा युक्त) Ś1 K1.2 Ñ1 V1 नाशक्नोच S (T1 om) °क्तुं न शशाकोमूढ़° मेसूनु तदानघ

13 a) T1 om 13abc (cf. v. l. 12) K0.4 च (for तु) Da D2 स तु (by transp) K0.2.3 स (K3 प्र-) हर्षं वै, T2 G3.4 परं हर्षं — b) Ñ3 B6 Da D1.5 त्रिनि°. B5 T2 G (except G6) M6-8 °तप — c) K3 Ñ1.2 V1 Dn D1 तदा (for ततो) Ś1 K1 Ñ3 V1 B D (except D5) वाचा; Ñ1 वाक्य, Ñ2 सार्धं (for राजा)

14 a) K0.4 Ñ1 D5 पप्रच्छैनं स धर्मात्मा, S (G3 corrupt) पर्यपृच्छद्दीनात्मा — b) G2 यथा ते प्रद्रुत K (except K1) Ñ V1 B Dn D1.4.5 M पुरात् — c) S तयास्ते S आचष्ट (for आचख्यौ) — d) Ś1 K (except K3) B1.3 Da1 D1.2.5 G1.2 °पूर्वेण B5 पार्थिव, G1 भारत.

15 c) Ñ1.2 V1 Dn D1 S (except M5) नरे°.

16 a) K0 D5 G1.2.6 तदा, K3 स तं — c) T1 G (except G2.4) M2.5 °जज्ञे स, M6-8 °जज्ञेय M3 राष्ट्राय K2 °जज्ञे वराहाय — d) S (except T1 G3 M5) ददतां

17 Before 17, M6-8 ins वैश° — c) G2 राज्ञा च (by transp) K0.2.4 Ñ3 Dn D1.4 T1 M5 सदिष्टं; B (except B5) Da D2 निर्दिष्ट, T2 G (except G2.4) M2.6-8 सदिष्टा — d) K3 भुवनोत्तमं

18 c) K1.4 Ñ3 V1 B D प्रत्याश्वस्त(K1.4 °श्वस्ता; D1 °गत)स्ततो, K3 प्रत्याम्वस्यास्ततो; S पर्याश्वस्ता(T2 G2-4 °श्वस्त; G1 °श्वस्ता)स्तदा (M5 प्रत्याश्वास्य ततो) — d) Ñ2 V1 B D त (for तान्)

19 Before 19, T2 G2-6 M6-8 ins. द्रुपद G2

प्रत्याश्वस्तांस्ततो राजा सह पुत्रैरुवाच तान् ॥ १८
गृह्णातु विधिवत्पाणिमद्यैव कुरुनन्दनः ।
पुण्येऽहनि महाबाहुरर्जुनः कुरुतां क्षणम् ॥ १९
ततस्तमब्रवीद्राजा धर्मपुत्रो युधिष्ठिरः ।
ममापि दारसंबन्धः कार्यस्तावद्विशां पते ॥ २०

द्रुपद उवाच ।

भवान्वा विधिवत्पाणिं गृह्णातु दुहितुर्मम ।
यस्य वा मन्यसे वीर तस्य कृष्णामुपादिश ॥ २१

युधिष्ठिर उवाच ।

सर्वेषां द्रौपदी राजन्महिषी नो भविष्यति ।
एवं हि व्याहृतं पूर्वं मम मात्रा विशां पते ॥ २२
अहं चाप्यनिविष्टो वै भीमसेनश्च पाण्डवः ।
पार्थेन विजिता चैषा रत्नभूता च ते सुता ॥ २३
एष नः समयो राजन्रत्नस्य सहभोजनम् ।
न च तं हातुमिच्छामः समयं राजसत्तम ॥ २४
सर्वेषां धर्मतः कृष्णा महिषी नो भविष्यति ।
आनुपूर्व्येण सर्वेषां गृह्णातु ज्वलने करम् ॥ २५

द्रुपद उवाच ।

एकस्य बह्व्यो विहिता महिष्यः कुरुनन्दन ।
नैकस्या बहवः पुंसो विधीयन्ते कदाचन ॥ २६
लोकवेदविरुद्धं त्वं नाधर्मं धार्मिकः शुचिः ।
कर्तुमर्हसि कौन्तेय कस्मात्ते बुद्धिरीदृशी ॥ २७

युधिष्ठिर उवाच ।

सूक्ष्मो धर्मो महाराज नास्य विद्मो वयं गतिम् ।　C. 1. 7240　B. 1. 195. 29　K. 1. 210. 29

(? hapl) om 19–20 — ^{b}) Ñ2.3 B (except B6) Dn D1.4 S (except G6) अद्यायं K (except K1) D2 T3 G4.5 M6.8 °नंदन — ^{c}) Ś1 K D5 महाराज — ^{d}) K2.3 फाल्गुन B6 D4 क्रियतां B6 क्षण

20 G2 om 20 (of v. l. 19) Before 20, Ñ2.3 V1 B D ins वैश° उ° (D2 om उ°), S (except G2 M8.6) वैश°. — ^{a}) Ñ V1 B D (except D5) तमब्रवीत्ततो राजा (Ñ1 राजन्) — ^{b}) Ś1 K Ñ1.2 V1 Dn D1.5 धर्मात्मा स (Ñ1.2 V1 Dn च), Ñ3 धर्मराजो — After 20^{ab}, M6–8 ins 1904* — Before 20^{cd}, M5 ins युधिष्ठिर — ^{c}) V1 D4 ममापि — ^{d}) Ś1 M5 तात (for तावद्) S (except G2) ins after 20 (M6–8, after 20^{ab})

1904* तस्मात्पूर्वं मया कार्यं यद्भवाननुमन्यते ।
[M6–8 °मस्यते]

21 Ś1 K1 S om उवाच — ^{ab}) Ñ3 B Da D2.4 transp विधिवत् and दुहितु° — ^{d}) D5 तस्मै Ñ3 B Da D2.4 कृष्णा (B3 कन्या) प्रदीयतां

22 Ś1 K1.3 S om उवाच — ^{ab}) Ś1 K Ñ2 V1 Dn D1.5 transp द्रौप° and महि° — ^{c}) Ñ2.3 V1 B Dn D1 प्र (B5 च) (for हि) — ^{d}) Ñ3 B (except B5) D3 महीपते

23 ^{a}) K0 चास्यनि°, D4 चास्या नि° — ^{c}) Ś1 K1 M5 पार्थेनाव(M5 °पि)जिता Da चैव; M8 राजन्, M6–8 कृष्णा (for चैषा) — ^{d}) K0.2.4 D5 हि ते सुता, Ñ2.3 V1 B Da Dn D1.2.4 सुता तव

24 G2 M6–8 om 24 — ^{b}) K2 T3 G1.3.4 लब्ध°; K3 D3 अस्त्र° (for रत्न°) — ^{c}) S (G2 M6–8 om) न चैन Ś1 K1 N1 T1 G3 M5 °मिच्छामि — ^{d}) D4 परम (for समय) — After 24, S (except G2 M6–8) ins.

1905* अक्रमेण निवेशे च धर्मलोपो महान्भवेत् ।
निर्जिता चैव पार्थेन रत्नभूता च ते सुता ।
[L. 2 = (var) 23^{cd}]

25 ^{ab}) Ś1 D5 transp धर्म° and महि°. — ^{cd}) K (except K3) Da1 D1 G3 आ(K2 D1 अ)नुपूर्वेण. T1 G1 सर्वे हि गृह्णीमो ज्वलने, T3 G2–6 M गृह्णतु सर्वेशौ (M5 सर्वेशौ गृह्णनु) ज्वलिते K (except K1) Ñ V1 B D करान्

26 Ś1 K1 S om उवाच — ^{c}) Ñ3 V1 B Da D2.4 तात; Cd Arjp पुंस° (as in text) — ^{d}) K2 प्रशमति कदा°, Ñ2.3 V1 B D श्रूयते पतयः क्वचित् — After 26, S ins

1906* सोऽयं न लोके वेदे वा जातु धर्मः प्रशस्यते ।

27 ^{a}) B5 त; T G च (for त्व) — ^{b}) Ś1 K अधर्मं (see below), Ñ1 नाधर्मो Ñ2.3 V1 B D धर्मवि(Da °व)च्छुचि (D1 धर्मक शुचि) — ^{c}) Ś1 K (except K1) कर्तुमिच्छसि (see above) — ^{d}) K0 कथ, K2 यस्मात् K3 B5 मतिर्; B3 भक्तिर् (m as in text), T1 कीर्तिर्

28 Ś1 K1.3 S om उवाच (G1 om the ref) — S ins after युधि° (G1, which om the ref., after 27)

1907* लोकधर्मविरुद्धोऽयं धर्मो धर्मभृतां वर ।
[T1 G1 M5 लोकवेदवि°, M8 लोकवेदावि°, M6–8 °वेदाद्वि°]

— ^{b}) S विद्म गतिं वय (T3 G3.4 स्वय) — ^{c}) Ś1 K (except K1) N2.3 सर्वेषाम् K0.2.4 Da Dn1 D1.2.5 °पूर्वेण — ^{d}) B3 चरमोन्वयामहे, S तमनु(M5 तैरनु)यामहे

C. 1. 7246 B. 1. 195. 29 K. 1. 20. 29

पूर्वेषामानुपूर्व्येण यातं वर्त्मानुयामहे ॥ २८

न मे वागनृतं प्राह नाधर्मे धीयते मतिः ।
एवं चैव वदत्यम्बा मम चैव मनोगतम् ॥ २९

एष धर्मो ध्रुवो राजंश्चरैनमविचारयन् ।
मा च तेऽत्र विशङ्का भूत्कथंचिदपि पार्थिव ॥ ३०

द्रुपद उवाच ।

त्वं च कुन्ती च कौन्तेय धृष्टद्युम्नश्च मे सुतः ।
कथयन्त्वितिकर्तव्यं श्वः काले करवामहे ॥ ३१

वैशंपायन उवाच ।

ते समेत्य ततः सर्वे कथयन्ति स्म भारत ।
अथ द्वैपायनो राजन्नभ्यागच्छद्यदृच्छया ॥ ३२

इति श्रीमहाभारते आदिपर्वणि सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥

१८८

वैशंपायन उवाच ।

ततस्ते पाण्डवाः सर्वे पाञ्चाल्यश्च महायशाः ।
प्रत्युत्थाय महात्मानं कृष्णं दृष्ट्वाभ्यपूजयन् ॥ १

प्रतिनन्द्य स तान्सर्वान्पृष्ट्वा कुशलमन्ततः ।
आसने काञ्चने शुभ्रे निषसाद महामनाः ॥ २
अनुज्ञातास्तु ते सर्वे कृष्णेनामिततेजसा ।

---

29 Before 29, G1 ins युधि°. — 29^ab–1 188 13^ab — ^b) Ś1 K1 नीयते Ko 2.4 N1 B Da D2 4 5 मन ; G3 गति.. — ^c) K1 एवमेव, Ñ1 एव च मे; D5 एव चैषा K2 मत मह्यं — ^d) Ñ V1 B Dn D1 2 4 मम चैतन्; Da सर्वमेतन्, S ममापि च — After 29, S ins
1908* आश्रमे रुद्रनिर्दिष्टाद्व्यासादेतन्मया श्रुतम् ।

30 T1 om 1. 187 30–188 6 — ^a) Ñ1 धर्म एव, S धर्म एष (G2 विद्धि, G3 -विरवा) — ^b) Ko Da चरेयम्; K2 चरित्रम्, K4 Ñ1 चरेनम्, B6 D2.5 चरेमम् K4 B6 Da D2 5 मा विचारयन् (Da °रय) S (T1 om) विचार्यैव (G6 °र्यैव, M6 यस्मादेवं) करोम्यहं — ^c) Ñ3 S (except G1, T1 om) तत्र (for तेऽत्र) Ñ1 मा च तत्र विशङ्को भू , Ñ2 3 V1 Dn D1 मा च शङ्का तत्र ते स्यात् — Ko om from ऽत्र (in 30^c) up to 31^a — ^d) Ñ1 कदाचिदपि S (T1 om.) न ह्यधर्मे मतिर्मम

31 T1 om. 31, Ko om. 31^a (cf v 1. 30) Ś1 K1 S om उवाच (T1 om the ref) — ^a) Ś1 कौंतेय कुन्ती च (by transp). — ^c) S (T1 om.) कथयित्वेति°. — ^d) Ko यत् (for श्व) K1 S (except G5 6 M6, T1 om) काल्ये

32 T1 om 32 (cf v 1 30) Ś1 K1 3 D2 S om उवाच — ^a) Ñ1 वच सर्वे — ^b) Ś1 K1 तानुत, M6–8 पाण्डवा (for भारत) — ^c) S (T1 om) ततो (for अथ) — ^d) S (T1 om) आजगाम (G1 M6 8 °गामा) विचिंतित (G3 आससाद महामुनि)

Colophon om. in T1 — *Major parvan* T2 G M समव° (for आदि°) — *Sub-parvan* Ś1 K3 द्रौपदी विवाह, Ko–2 4 Ñ3 B Da Dn1. n2 D2 4. 5 T2 G3.4 M7 8 द्रौपदीस्वयंवर — *Adhy name* Ko 3 4 द्रुपदविमर्शे , T2 G3 4 द्रुपदयुधिष्ठिरसंवाद° — *Adhy no* (figures, words or both) Dn2 194, D4m 198, D5 G2 145, T2 G4–6 146, G1.3 148, M 147 — *S'loka no.* Dn 33, M8 36 —*Aggregate s'loka no* Dn2 7232

188

1 T1 om 1 (cf. v 1 1 187 30) Ś1 K1.3 D2 S om उवाच — ^b) Ś1 K D5 द्रुपद°; S (T1 om) पाचाल° (G2 पार्थिव°) S (T1 om) महारथ — ^d) Ś1 K व्यास (for कृष्ण) Ñ2 3 B D (except D5) सर्वे (for दृष्ट्वा) N (except V1) भ्यवाद(K1 °च)यन्

2 T1 om 2 (cf v 1 1) — ^a) T2 G (except G1.6) प्रत्यनन्दत् Ñ2 3 B Dn D1.3 4 स तां पूजा K2 तेनाभि नन्दिता सर्वे — ^b) Ko Da Dn1 दृष्ट्वा K2 3 D2 S (T1 om) च कुशलं तत — ^c) K1 Ñ2 3 B6 Dn शुद्धे K2 आसनेषु महार्हेषु; V1 आसने रुचिरे मृष्टे — ^d) S (T1 om) °मुनि (M8 °मति) K2 निषेदुस्ते परतपा

3 T1 om 3 (cf. v 1. 1), K2 om 3, G2 om 3–4 — ^a) Ñ1 तत ; G6 च ते (for तु ते) — ^b) Ś1 K (K2 om) व्यासेन (for कृष्णेन) K3 अमितबुद्धिना, D5 अक्लिष्टकर्मणा — ^d) Ś1 K (K2 om.) ते परतपा (Ś1 K1 °प); D5 ते महातपा (for द्विपदां वरा)

आसनेषु महार्हेषु निषेदुर्द्विपदां वराः ॥ ३
ततो मुहूर्तान्मधुरां वाणीमुच्चार्य पार्षतः ।
पप्रच्छ तं महात्मानं द्रौपद्यर्थे विशां पतिः ॥ ४
कथमेका बहूनां स्यान्न च स्याद्धर्मसंकरः ।
एतन्नो भगवान्सर्वं प्रब्रवीतु यथातथम् ॥ ५

व्यास उवाच ।

अस्मिन्धर्मे विप्रलब्धे लोकवेदविरोधके ।
यस्य यस्य मतं यद्यच्छ्रोतुमिच्छामि तस्य तत् ॥ ६

द्रुपद उवाच ।

अधर्मोऽयं मम मतो विरुद्धो लोकवेदयोः ।
न ह्येका विद्यते पत्नी बहूनां द्विजसत्तम ॥ ७
न चाप्याचरितः पूर्वैरयं धर्मो महात्मभिः ।
न च धर्मोऽप्यनेकस्थश्चरितव्यः सनातनः ॥ ८
अतो नाहं करोम्येवं व्यवसायं क्रियां प्रति ।
धर्मसंदेहसंदिग्धं प्रतिभाति हि मामिदम् ॥ ९

धृष्टद्युम्न उवाच ।

यवीयसः कथं भार्यां ज्येष्ठो भ्राता द्विजर्षभ ।
ब्रह्मन्समभिवर्तेत सद्वृत्तः संस्तपोधन ॥ १०
न तु धर्मस्य सूक्ष्मत्वाद्गतिं विद्मः कथंचन ।
अधर्मो धर्म इति वा व्यवसायो न शक्यते ॥ ११
कर्तुमस्मद्विधैर्ब्रह्मंस्ततो न व्यवसाम्यहम् ।
पञ्चानां महिषी कृष्णा भवत्विति कथंचन ॥ १२

युधिष्ठिर उवाच ।

न मे वागनृतं प्राह नाधर्मे धीयते मतिः ।
वर्तते हि मनो मेऽत्र नैषोऽधर्मः कथंचन ॥ १३
श्रूयते हि पुराणेऽपि जटिला नाम गौतमी ।

C 1 7235
B 1 190 14
K. 1 211 14

---

4 T1 G2 om 4 (of v l 1, 3) — b) G6 वाचम्. — c) B1 3 पर्यपृच्छन्महा°. — d) Ñ1.2 V1 Dn D1 S (T1 G2 om) द्रौपद्यर्थे K (except K1) Ñ1 2 V1 Da Dn D1 विशा पते, Ñ3 B D4 स्वयवरे; D2 5 महामते; S (T1 G2 om) महामुनिं

5 T1 om 5 (of v l 1) Before 5, S (except T1) ins द्रुपद — a) V1 न चैवैका य° — b) Ś1 K1 वा (for च) Ñ2 Dn D1 धर्मपत्नी न संकर — c) Ñ2 3 Dn D1 5 एतन्मे

6 T1 om 6 (of. v. 1 1) K1.2 S om उवाच — a) D5 विरुद्धे हि; G1 M विप्रलुप्ते; Cd as in text Cf Winternitz, *JRAS* 1897 740 (footnote 1) — b) K4 कथं (for लोक) K (except K2) °धिनि, B5 °धने; D2 °विरुद्धके; S (T1 om) °धिते — d) K2 4 M (except M5) तत्वत (for तस्य तत्)

7 Ś1 K1 2 S om उवाच — a) K0 4 मम मति N1 अधर्मोय मतो विद्धि — b) K0 विरुद्धो वेदलोकयो, G2 लोकवेदविरुद्धयो — c) Ñ1 युज्यते T1 भार्या (for पत्नी)

8 G2 om 8c–11b — c) Ś1 K0 1 3 अनेक सन्, K3 अनेकस्मिन् K4 Ñ V1 B D न चाप्यधर्मो विद्धि — d) Ñ V1 B D कथचन (for सना°)

9 G2 om 9 (of v 1 8) — a) K0 4 Ñ2 V1 D1 T1 G1 ततो; Ñ3 कथ (for अतो) Ñ2 3 V1 Dn D1 2 S °म्येन (M6–8 °म्येतत्); B °म्येत — b) T2 G3–6 सुतां प्रति, G1 तु यां प्रति — c) Ñ2 3 V1 Dn धर्मं सदैव सदिग्ध — d) B Da D2 4 च; T1 G6 इ (for हि) K2 मम त्विदं; Ñ1 हि मापि च; Ñ2 3 Dn D1 हि मे स्वयं

10 G2 om 10 (of v 1 8) Ś1 K1 S om. उवाच — b) G5 भ्राता ज्येष्ठो (by transp) Ś1 K1 नरर्षभ — d) N3 सम्मृत सन्, V1 न सद्वृत्तस्

11 G2 om 11ab (of v. 1. 8) — a) D5 सूक्ष्मस्य — b) K2 T2 G1 3–5 विद्म, D5 T1 G6 वेद्मि, M5 विदु B3 D2 न क(D2 कां)चन — Ñ1 (hapl) om 11c–12d. — c) T1 G1 5 6 M च (for वा) G2 न च धर्मोधर्म इति.

12 Ñ1 om 12 (of v 1 11) — a) V1 °द्विधैर्युक्त. — b) T2 G3–6 अतो न; M6–8 ततोन्य (M6 °न्यद्) Ñ2 B (except B6) D ततोयं न (D6 च) व्यवस्यते (B3 D1 °ति), T1 न व्यवस्याम्यह तत°

13 13ab =1 187 29ab — Ś1 K1.3 S om उवाच — b) K0 3 4 विद्यते (for धीयते) Ñ1 3 B Da D2 4 मन — c) S (except T1) च (for हि) K4 निमित्तो मे; B5 मनो मे तु — d) Ś1 K1 4 G2 नैष धर्म, Da1 नैको धर्म°

14 a) K4 D5 transp हि and अपि S पुराणेषु — b) S जटिलो नाम गौतम — After 14ab, S ins
1909* तस्य पुत्री महाप्राज्ञा गौतमस्य यशस्विनी ।
[T2 G3.4 जटिलस्य (for गौतम°) G2 यशस्विन]
— c) K2 ऋषि मे ध्यायिनवती (sic), B1m Cd ऋषी नुद्वाहितवती — d) K0 2 4 Ñ2 3 V1 B1.3 Dn D1 2 S सप्त (as in text), the rest सर्व K0 यरे, K2 3 Ñ V1

C. 1. 7255 B. 1. 195. 14 K. 1. 211 14

ऋषीनध्यासितवती सप्त धर्मभृतां वर ॥ १४
गुरोश्च वचनं प्राहुर्धर्मं धर्मज्ञसत्तम ।
गुरूणां चैव सर्वेषां जनित्री परमो गुरुः ॥ १५
सा चाप्युक्तवती वाचं भैक्षवद्भुज्यतामिति ।
तस्मादेतदहं मन्ये धर्मं द्विजवरोत्तम ॥ १६

कुन्त्युवाच ।

एवमेतद्यथाहायं धर्मचारी युधिष्ठिरः ।
अनृतान्मे भयं तीव्रं मुच्येयमनृतात्कथम् ॥ १७

व्यास उवाच ।

अनृतान्मोक्ष्यसे भद्रे धर्मश्चैष सनातनः ।
न तु वक्ष्यामि सर्वेषां पाञ्चाल शृणु मे स्वयम् ॥ १८
यथायं विहितो धर्मो यतश्चायं सनातनः ।
यथा च प्राह कौन्तेयस्तथा धर्मो न संशयः ॥ १९

वैशंपायन उवाच ।

तत उत्थाय भगवान्व्यासो द्वैपायनः प्रभुः ।
करे गृहीत्वा राजानं राजवेश्म समाविशत् ॥ २०
पाण्डवाश्चापि कुन्ती च धृष्टद्युम्नश्च पार्षतः ।
विचेतसस्ते तत्रैव प्रतीक्षन्ते स्म तावुभौ ॥ २१
ततो द्वैपायनस्तस्मै नरेन्द्राय महात्मने ।
आचख्यौ तद्यथा धर्मो बहूनामेकपत्निता ॥ २२

इति श्रीमहाभारते आदिपर्वणि अष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥

B Dn D1 2 4 5 वरा, Da1 वरा, Da2 वर ; S (except G3) वरान् — After 14, K4 Ñ1 2 V1 (om line 1) Dn D4 5 S ins

1910* तथैव मुनिजा वार्क्षी तपोभिर्भावितात्मन ।
संगताभूद्दश भ्रातॄनेकनाम्न प्रचेतस ।

[(L. 1) K4 मनुजा वार्क्षी, T G2 4 (by corr) 6 मृगशावाक्षी G1 साक्षी; G3 दक्षी (for वार्क्षी) S भावि तान्मुनीन् (M3 °नृपीन्) — (L 2) T1 G1 M दशो- पतस्थुषी भ्रा°, T2 G4-6 दशात्मजदपीन्भ्रा°; G3 दशागच्छत्सु महर्षीन्; G2 दश प्राचेतसो भ्रा°]

15 a) K2 तद्, Ñ2 3 Dn D1 हि (for च) — b) Ś1 K Ñ2 3 Da Dn धर्म्यं B3 D1 S धर्मभृता वरा (B3 D1 T1 M3 वर, G3 वर ; G6 वर) — c) D4 T1 G1 जननी (for जनित्री) Ñ2. 3 Dn D1 माता परमको गुरु

16 a) Ś1 K D5 राजन्; Ñ1 वाक्य, V1 पार्थ, S वाचा — b) Some MSS भैक्ष्यवद् — c) K0 2 4 Ñ B (except B6) Da D4 एतमह, V1 एतन्मत — d) K1 2 धर्म्यं Ñ2 V1 Dn D1 S पर धर्मं द्विजो(G4 नृपो)त्तम (T1 पर द्विजवरोत्तम)

17 S1 K1 S कुन्ती (T1 पृथा) (all om. उवाच) — After the ref., S (except T1 G2 5 6) ins

1911* मुच्यतां भ्रातृभि· सार्धमित्यर्जुनमचोदयम् ।

— a) K2 (sup lin) Ñ2 3 B D यथा प्राह (D5 चाह), K3 4 T3 यथा चाह, G3 यथाहायं G4 यथाभार्या, G6 यथाभार्य — d) Ś1 K1 Ñ2 3 V1 B3 D (except Da) मुच्येहम्

18 Ś1 K1 S om उवाच — a) Some MSS मोक्षसे — b) Ñ1 धर्मश्चापि, D2 धर्म एष — D2 3 (hapl) om 18c-19b — c) K4 Ñ2. 3 V1 B Dn1 D4 T2 G2-6 ननु, Ñ1 न प्र; T1 न हि Ś1 प्रेक्ष्यामि; K1 प्र , M3 पश्यामि (inf lin as in text) — d) K V1 Da पाचाल्य S वच

19 D2 3 om 19ab (cf v. l 18) — b) B5 6 Da D2 4 प्राह च (by transp), S चाप्याह (G1 चाह स)

20 K1 2 4 D2 S om उवाच — a) M6-8 अथ उ° — b) S कृष्णद्वैपायन Ñ3 स्वय; B Da D2 4 शुचि (for प्रभु) — d) V1 वासवेश्म

21 a) K3 B5 6 Da स्वपि; K4 चैव; D5 S स्वथ (for चापि) — b) K2. 4 पार्थिव (for पार्षत) — c) K4 Ñ V1 B D विविशुस्तेपि (Dn D1 °श्चैत्र) तत्रैव; S मिथ कथाभिस्ते तत्र — d) D5 S (except T1 G6) °क्षति

22 a) T G (except G1) द्वैपायनस्ततस्तस्मै (by transp) — b) S विशा पते — c) K1 तत्र यो धर्मो; Ñ1 D2 तद्यथाधर्म; V1 तद्यथावृत्तं — After 22, K4 D4 S ins

1912* यथा देवा ददुश्चैव राजपुत्र्या पुरा वरम् ।
धर्माद्यास्तपसा तुष्टा पञ्चपत्नीत्वमीश्वरा ।

[(L 2) K4 विप्राद्या ; D4 ब्रह्माद्या K4 ईश्वरात्]

Colophon *Major parvan* T2 G M संभव (for आदि°) — *Sub-parvan* Ś1 K1. 2 B1 Dn D4 T2 G2 4 M2. 5 द्रौपदी(M5 om.)स्वयंवर; K3 द्रौपदीविवाह, B5 वैवाहिक; T1 संभव; to it B1. 6 add पर्वेंद्रोपाख्यान Ñ2 B3 6 Da D2 4 (all om the sub-parvan name) mention only पर्वेंद्रो(B3. 6 °द्रियो)पाख्यान — *Adhy name* K0 2 4 व्यासागमन, T2 G1. 2 4 व्यासद्रुपदसंवाद — *Adhy no* (figures, words or both) Dn2 195,

१८९

व्यास उवाच ।
पुरा वै नैमिषारण्ये देवाः सत्रमुपासते ।
तत्र वैवस्वतो राजञ्शामित्रमकरोत्तदा ॥ १
ततो यमो दीक्षितस्तत्र राज-
न्नामारयत्किंचिदपि प्रजाभ्यः ।
ततः प्रजास्ता बहुला बभूवुः
कालातिपातान्मरणात्प्रहीणाः ॥ २
ततस्तु शक्रो वरुणः कुबेरः
साध्या रुद्रा वसवश्चाश्विनौ च ।
प्रणेतारं भुवनस्य प्रजापतिं
समाजग्मुस्तत्र देवास्तथान्ये ॥ ३
ततोऽब्रुवँल्लोकगुरुं समेता
भयं नस्तीव्रं मानुषाणां विवृद्ध्या ।
तस्माद्भयादुद्विजन्तः सुखेप्सवः
प्रयाम सर्वे शरणं भवन्तम् ॥ ४
ब्रह्मोवाच ।
किं वो भयं मानुषेभ्यो यूयं सर्वे यदामराः ।
मा वो मर्त्यसकाशाद्वै भयं भवतु कर्हिचित् ॥ ५
देवा ऊचुः ।
मर्त्या ह्यमर्त्याः संवृत्ता न विशेषोऽस्ति कश्चन ।
अविशेषादुद्विजन्तो विशेषार्थमिहागताः ॥ ६
ब्रह्मोवाच ।
वैवस्वतो व्यापृतः सत्रहेतो-
स्तेन त्विमे न म्रियन्ते मनुष्याः ।

C. 1. 7291
B. 1. 197. 7
K. 1. 214. 7

D4 m 199, D6 G2 146, T1 175 (read 195), T3 G4-6 147, G1 3 149, M 148 — *S'loka no* Dn 23, M3 24. — *Aggregate s'loka no* Dn1 7255

☞ A passage of nearly 120 lines, comprising two addl adhy, given in App. I (No 100), is ins. in D4 S after adhy 188, in K4 after 1. 189 49 ❁Nil अत्र यत्तद्देवा ददुरित्यादिना त्रिपथगा नदीमित्यन्तो नारायण्युपाख्यानमन्योऽध्यायद्वयात्मक. क्वचित्पुस्तके पठ्यते।❁ Nil's यत्तद्देवा is no doubt a v l of यथा देवा of 1912*

189

1 Ś1 K1 D4 S om उवाच — a) Many S MSS नैमिशा°; cf v l 1 1 1 etc — b) B Da D2.4 सत्र समासते

2 ab) K0 1 4 Ñ2 3 B1 3 6 Dn D3 G3 5 6 M6-8 कच्चिद् K0 3 4 इह; B5 इव (for अपि) K1 प्रजासु, Ñ2 3 B3.6 D (except D4 5) G1 प्रजानां; T3 G4 प्रजा हि Ñ1 ततो यमो दीक्षितोत्र राजन्नामारयत्प्रजा (anuṣṭubh !) — d) K4 कालोपि यातो K0 3.4 Ñ B D G1 मरण प्रहीणा — For 2, V1 subst a (fragm) anuṣṭubh stanza

1913* स तत्र दीक्षितस्तात यमो नामारयत्प्रजा ।
प्राणिनोऽथ न मृताश्च * * * * * * * * ।

3 a) Ñ2 3 V1 B D सोमश्च (D5 °स्तु), S (except M8 5) ततश्च — b) V1 साध्यादित्या K2 3 Ñ V1 B D T1 वसवोथाश्वि° — c) Ñ2 B3.6 Da Dn3 D1 2 प्रजापतिर्भुवनस्य प्रणेता

4 b) Ñ1 B1 5 भय तीव्र, Ñ2 3 V1 B3 6 D (except D5) भयात्तीव्रान् K1 S प्रवृध्द्या. — c) Ś1 सर्वे स्म (m as in text), K2 सुखेच्छा, D5 स्म सर्वे (for सुखे°) — d) Ś1 K1 2 इयाम, K0 3 4 याता° स्म, D5 व्रजाम, G1 भजाम (for प्रयाम) G1 भजत. (for भवन्तम्) Ñ1 व्रजाम भो परेश वै भवत

5 N पितामह उ° (Ś1 K1 om उ°) S ब्रह्मा (G3 6 om the ref) — G2 (hapl) om 5-6 — b) Ś1 सदामरा — c) K2 Ñ1 S (G2 om, G3 before corr.) न (for मा) — d) S (G2 om) भवति V1 कुत्रचित् Ś1 K N Dn D1 2 5 भयं भवितुमर्हति

6 G2 om 6 (cf v l 5) Ś1 K1 S om ऊचु — a) K2 मर्त्यव्यमर्त्या, Ñ2 3 V1 B D (except D5) मर्त्या अमर्त्या Ś1 सपत्ना; K2 B3 D2 °भूता; Da °जाता — b) Ñ3 V1 B5 विशेषो नास्ति (by transp) — d) B3 5 Da D2 4 उपागता B6 विपाद समुपागता

7 Ś1 K1-3 Ñ B3 5 6 D भगवानुवाच, K0 4 V1 B1 पितामह उ°, S ब्रह्मा — b) K0 3 4 तस्मादिमे — c) T2 G4 तस्मिन्हि कार्ये (810) D5 कृतसत्र° — d) Ś1 T1

C. 1. 7231
B. 1. 197. 7
K. 1. 214. 7

तस्मिन्नेकाग्रे कृतसर्वकार्ये
तत एषां भवितैवान्तकालः ॥ ७
वैवस्वतस्यापि तनुर्विभूता
वीर्येण युष्माकमुत प्रयुक्ता ।
सैषामन्तो भविता ह्यन्तकाले
तनुर्हि वीर्यं भविता नरेषु ॥ ८

व्यास उवाच ।

ततस्तु ते पूर्वजदेववाक्यं
श्रुत्वा देवा यत्र देवा यजन्ते ।
समासीनास्ते समेता महाबला
भागीरथ्यां ददृशुः पुण्डरीकम् ॥ ९
दृष्ट्वा च तद्विस्मितास्ते बभूवु-
स्तेषामिन्द्रस्तत्र शूरो जगाम ।
सोऽपश्यद्योषामथ पावकप्रभां
यत्र गङ्गा सततं संप्रसूता ॥ १०
सा तत्र योषा रुदती जलार्थिनी
गङ्गां देवीं व्यवगाह्यावतिष्ठत् ।
तस्याश्रुबिन्दुः पतितो जले वै
तत्पद्ममासीदथ तत्र काञ्चनम् ॥ ११
तदद्भुतं प्रेक्ष्य वज्री तदानी-
मपृच्छत्तां योषितमन्तिकाद्वै ।
का त्वं कथं रोदिषि कस्य हेतो-
र्वाक्यं तथ्यं कामयेह ब्रवीहि ॥ १२

स्त्र्युवाच ।

त्वं वेत्स्यसे मामिह यासि शक्र
यदर्थं चाहं रोदिमि मन्दभाग्या ।
आगच्छ राजन्पुरतोऽहं गमिष्ये
द्रष्टासि तद्रोदिमि यत्कृतेऽहम् ॥ १३

M6-8 तत एवैषा, K2 G8 ततस्त्वेषा, Ñ1 तत्र एषां; B6 तच्च एषां, T2 G4 स चैतेषां, G5 ततश्चैतेषां K3 Ñ3 B Da D2 4 भविता ह्यतकाल°, K8 Ñ1 भवितास°; K4 भवितेति काल ; G1 भवितैषांत°

8 ᵃ) K3 Ñ V1 B D S एव (T1 इह) (for अपि) K1 हि भूता; K2 Ñ1 3 B1m. 2. 5 Dn1 D1 विभूपिता; Ñ2 B1. 6 Da Dn2 n3 D2. 4. 5 विभक्ता; V1 प्रयुक्ता; S हि भूत्वा (for विभूता) — ᵇ) V1 अशेन (for वीर्येण) Ś1 K0 2. 4 Ñ1 इति, K1 अति-; K3 D1 T1 अनु- (for उत) Ś1m K1 Ñ2 3 B (except B6) D °वृद्धा, Ñ1 °वृत्ता, V1 °भूता (for °युक्ता) — ᶜ) G2 यसो; M5 ह्यतो Ś1 K1 स्थिता (for भविता) K3 सत्रकाले — ᵈ) K2. 3 Ñ2 3 V1 B D (D4 by corr) न तत्र (D1 तेनात्र), Ñ1 मेने हि (for तनुर्हि) K1 भवितामरेषु; K3 भविता वै न° S नियच्छन्च मोहममित्रसाहा

9 Ś1 K1 S om. उवाच (T2 G2-4. 6 M3 om the ref.) — ᵃ) B5 6 Da D2 4 च (for तु) B3 तद् (for ते) Ś1 T2 G2. 4 पूर्वजं, Ñ1 पूर्वजा; G1 पूजयन् — ᵇ) N2 3 Dn S जग्मुर् (M6-8 गता) (for the first देवा) — ᶜ) G3 समवेता K3 महातो K2 °सीनास्तेपि महाबलाय — ᵈ) B3 भीमरथ्यां (m as in text)

10 ᵇ) Ñ1. 3 B (except B6) D2 वीरो; B3m Cd शूरो (as in text). — ᶜ) D5 पावकाभां K3 योषामपश्यत्स च पावकाभां — ᵈ) D. गंगा यत्र (by transp) S वै प्रसूता (for संप्र°) K0 संप्रसूता सततं यत्र गंगा; K2. 4 Ñ2. 3 V1 B1. 2. 5 Dn D1. 4 Ar)p यत्र देवी गंगा सततं प्रसू(B1 3 संप्रसू; D4 प्रभू)ता; B6 Da D2 सा तत्र देवी सततं बभूव

11 ᵃ) K3 जलांतर्; T1 जलार्थां; G1 जलांतरे — ᵇ) Ś1 व्यवगाढावतिष्ठत्; K0 4 अवगाह्यावति°; K1 Ñ V1 B Da1 Dn व्य(Ñ1 चा; V1 अ)वगाह्य व्यति°, K3 विगाह्यावति°, D1 व्यवगाह्य ति° — ᶜ) K1 V1 B3 Da T G (except G1. 6) तद्(T3 °दा)श्रु°. K3 Ñ2 3 V1 B D M3 जले यस्

12 ᵇ) K2 शुभे; K2m Ñ2 3 V1 B D (except D4) भद्रे; S कुतो (for कथ) — ᵈ) Ś1 K2-4 Ñ V1 B1. 3 5 D (except Da2 D1) T3 G (except G2) कामयेहं, K1 °यैतद्, T1 °ये प्र- V1 B3 D1 2 G1 ब्रवीमि; D5 °षि B6 D4 ब्रूहि वरांगने त्व (for कामयेह ब्र°)

13 S (but not Ś1 K1!) om उवाच — ᵃ) V1 त्व पृच्छसे — ᵇ) Ś1 K0 1. 3 V1 वा, K4 वै (for चाह) T2 G3-5 M मदभागा — ᶜ) V1 त्वरितो (for पुरतो) N (except Ñ1) G2 om. अहं — ᵈ) Ś1 K0 1. 4 Da D4 T G3 4 यद् (for तद्) Ś1 K (except K3) Ñ1 D4 यस्य हेतो, Da तत्कृतेह (Da1 °ते ह)

14 Ś1 K1 S om उवाच — ᶜ) Ñ2 3 V1 B1. 6 D (except Da1 D1) सिंहासनस्थं — ᵈ) G1 6 (*sup lin*) क्रीडतमैक्षद्

15 ᵇ) K3 विद्धीह विश्वं Ñ2 3 Dn1. n3 D1 विद्वन्, Cd

व्यास उवाच ।

तां गच्छन्तीमन्वगच्छत्तदानीं
सोऽपश्यदारात्तरुणं दर्शनीयम् ।
सिंहासनस्थं युवतीसहायं
क्रीडन्तमक्षैर्गिरिराजमूर्ध्नि ॥ १४

तमब्रवीद्देवराजो ममेदं
त्वं विद्धि विश्वं भुवनं वशे स्थितम् ।
ईशोऽहमस्मीति समन्युरब्रवी-
द्दृष्ट्वा तमक्षैः सुभृशं प्रमत्तम् ॥ १५

क्रुद्धं तु शक्रं प्रसमीक्ष्य देवो
जहास शक्रं च शनैरुदैक्षत ।
संस्तम्भितोऽभूदथ देवराज-
स्तेनेक्षितः स्थाणुरिवावतस्थे ॥ १६

यदा तु पर्याप्तमिहास्य क्रीडया
तदा देवीं रुदतीं तामुवाच ।
आनीयतामेष यतोऽहमारा-
न्मैनं दर्पः पुनरप्याविशेत ॥ १७

ततः शक्रः स्पृष्टमात्रस्तया तु
स्रस्तैरङ्गैः पतितोऽभूद्धरण्याम् ।
तमब्रवीद्भगवानुग्रतेजा
मैवं पुनः शक्र कृथाः कथंचित् ॥ १८

विवर्तयैनं च महाद्रिराजं
बलं च वीर्यं च तवाप्रमेयम् ।
विवृत्य चैवाविश मध्यमस्य
यत्रासते त्वद्विधाः सूर्यभासः ॥ १९

स तद्विवृत्य शिखरं महागिरे-
स्तुल्यद्युतींश्चतुरोऽन्यान्ददर्श ।
स तानभिप्रेक्ष्य बभूव दुःखितः
कच्चिन्नाहं भविता वै यथेमे ॥ २०

ततो देवो गिरिशो वज्रपाणिं
विवृत्य नेत्रे कुपितोऽभ्युवाच ।
दरीमेतां प्रविश त्वं शतक्रतो
यन्मां बाल्यादवमंस्थाः पुरस्तात् ॥ २१

उक्तस्त्वेवं विभुना देवराजः
प्रवेपमानो भृशमेवाभिषङ्गात् ।
स्रस्तैरङ्गैरनिलेनेव नुन्न-
मश्वत्थपत्रं गिरिराजमूर्ध्नि ॥ २२

स प्राञ्जलिर्विनतेनाननेन

C. 1. 7223
B. 1. 197. 23
K. 1. 214. 23

विश्वं (as in text) K3.4 वशे स्थितं भुवनं विद्धि सर्वं — d) Ñ1 समक्षैस्तु भृशं, Da D3.4.5 M5 तमक्षेषु भृशं Ś1 प्रदीवितं; K (except K2) Ñ1 D5 प्रसक्तं

16 a) K0 Ñ2.3 V1 B D च; Ñ1 S (except M3.5) स (G2 सु-) (for तु) — b) Ñ1 D5 शनकैर् (for च शनैर्) Ś1 K Ñ1 D5 G6 उदीक्ष्य; B6 D2 उदैक्षत् — c) K4 G3 स स्तंभितो

17 a) Ś1 K0.1.4 च (for तु) Ś1 पर्याप्तिम्, K0 Ñ1 S (except G4) पर्याप्तिर्; Cd as in text Ś1 K0.1 इहास्य क्रीडया (K0 दीव्यत); S (except G4) इहा(T3 इहा)क्षक्रीडया (G1 °क्षविक्रियाया; G3 °क्षक्रीडावान्, G6 °क्षक्रीडाया; M °क्षक्रीडायास्) (for इहास्य क्री°) — b) Ś1 K (except K3) Ñ1 तदा स (Ñ1 तु) देवीं G3 कुमतीं (for रुदतीं) M3.5 तामवोचत् — c) T G2-6 ततोम(T1 G3.6 °ह)मारान्; G1 यमोहमारान् — d) Ś1 K1 Ñ1 D1 G1 मैवं; Ñ2.3 Dn T1 M3.6 नैनं Ś1 K1 Ñ1 पुनरस्याविशे°; K4 पुनरेवाविशे°; B3 पुनराविशे°; D4.5 पुनरभ्याविशे°; T1 °विशेद्दै, G1 पुनराविवेश; G2 पुनरप्याविवेश

18 a) S तदा K4m दृष्टमात्रस्तु तेन — c) K2 D2 ततोब्रवीद्. Ñ3 उग्रकर्मा — d) T3 G3 जातु (for शक्र)

19 a) K4 Ñ2 V1 B3 Dn D2.4.5 निवर्तय, Cd as in text V1 B (except B1) Da1 D4 एत K2 महेंद्रराजं — b) Dn1 n2 D1 तथाप्र°; G1 तदाप्र°. — c) K2 Ñ2.3 V1 B D छिद्रस्य (for विवृत्य) T3 G4 च त्व विश Ś1 (by corr) K1 चैवावगमय्य सम्यग्

20 a) K3.3 Ñ2.3 V1 B D (except D2) विवरं (for शिखरं) — b) S om अन्यान् — c) Ñ1 D5 अभिज्ञाय य° — d) S (except M5) कथ नाहं

21 b) T1 G6 रुपितोभ्युवाच — c) T1 दरीं गिरेस्ता — d) K1 G1 M3.5 यन्मा; G2 यदा, M6-8 यस्माद्

22 b) K Ñ V1 B1.3 Da Dn D1.2.4 M3 प्रा(D1 Dn1 प्र)वेपनार्तो (K1 प्रवेपज्जार्तो), B3.6 D5 M6 प्रवेपि(B3 D5 °प)तांगो. — c) K2 D2.4 G1 अनिलेनैव, D1 T3 G4 अनिलैरेव — d) D2.4 अश्वत्थपर्णं B2.6 Da M6-8 °मूर्धनि

प्रवेपमानः सहसैवमुक्तः ।
उवाच चेदं वहुरूपमुग्रं
द्रष्टा शेषस्य भगवंस्त्वं भवाय ॥ २३
तमब्रवीदुग्रधन्वा प्रहस्य
नैवंशीलाः शेषमिहाप्नुवन्ति ।
एतेऽप्येवं भवितारः पुरस्ता-
त्तस्मादेतां दरिमाविश्य शेध्वम् ॥ २४
शेषोऽप्येवं भविता वो न संशयो
योनिं सर्वे मानुषीमाविशध्वम् ।
तत्र यूयं कर्म कृत्वाविषह्यं
वहूनन्यान्निधनं प्रापयित्वा ॥ २५
आगन्तारः पुनरेवेन्द्रलोकं
स्वकर्मणा पूर्वजितं महार्हम् ।
सर्वं मया भाषितमेतदेवं
कर्तव्यमन्यद्विविधार्थवच्च ॥ २६
पूर्वेन्द्रा ऊचुः ।
गमिष्यामो मानुषं देवलोका-
द्दुराधरो विहितो यत्र मोक्षः ।
देवास्त्वस्मानादधीरञ्जनन्यां
धर्मो वायुर्मघवानश्विनौ च ॥ २७
व्यास उवाच ।
एतच्छ्रुत्वा वज्रपाणिर्वचस्तु
देवश्रेष्ठं पुनरेवेदमाह ।
वीर्येणाहं पुरुषं कार्यहेतो-

---

23 a) Ś1 निर्गतेन, Ś1m K1 निष्प्रभेन, K0 विगतेन (for विनतेन) K2 आननैक्षत् Ñ2.3 V1 D (except D1.4) °रिवैं वृषवाहनेन — b) Ñ B1 D (except D1.2.4) T1 G1 M देव (for चेदं) K3 °रूपं तमुग्र — d) K2 हृष्टा; K3 स्रष्टा, K4 द्रष्टासि, B5 S (except M5) दृष्ट्वा (for द्रष्टा) Ñ2 Dn1 अथाशेषस्य (for द्रष्टा शे°) S शेषं (for शेषस्य) Ñ V1 B D भुवनस्य (for भगवन्) Ñ V1 B Dn1 n2 D2.5 भवाय, T1 G1.2.5.6 प्रसीद, T2 G3.4 प्रयच्छ Cd द्रष्टाशेषस्य (=सर्वज्ञ) — Cf. Winternitz, *JRAS* 1897 743 (and footnote 2).

24 a) Ñ1.2 Dn D1 Cd तमब्रवीं — b) Ñ1 S नै(Ñ1 ए)वविधा, Cd as in text K0.4 क्लेशम्, K1 श्रेष्ठम्; D5 श्रेय (for शेषम्) K2 D5 इव, G6 अथ (for इह) K3 °शीला क्लेशमाप्नो भवंति — c) T2 G4 भवत पुरस्तात्, G2 भगवन्वै पुर° — d) D4 om तस्माद्, B2.6 om. एता K4 Ñ1 एनां; D6 एता स्व, S एते (G6 एनद्) (for एता) Ś1 K1 D1.3 आविशध्वं (D4 °स्व), K0 आविशेष, K2.4 आविश्यसेध (K4 °से स्व), K3 Ñ2.3 B1.3m Dn आविश्य शेध्व, Ñ1 एवाविशाथ, V1 B4 आविश्य विष्ट, B2 आविश्येह शेध्व, B3m.6 Da D4 आविशाग्रेव शेध्व, D2 आविशेध्वेव, S एनां प्रविष्टा

25 a) K0.2.4 Da D2 शेषा (Da1 D2 °षो) ह्येव, Ñ V1 B (B2 marg) Dn D1 तत्र ह्येव (B2 orig शेषाप्येव); D4 (by corr) S एषा भार्या K4 Ñ V1 B Dn D1.2 भवितारो न Ś1 K1 नैव (for वो न) K2 तामसंशय — b) S °र्वी भविश° — c) K2 तत्ते, T1 तत्रापि (for तत्र) — d) T2 G3.4 वहूनां राज्ञां, G1.2.5 वहूनसा; G6 भूभारस्य K2 V1 B (except B5) D2 प्राप्य चैव — After 25, D4 (marg *sec m*) S ins

1914* शस्त्रैर्दिव्यैर्मानुषान्योधयित्वा
शूरान्सर्वानाहवे तान्विजित्य ।

26 b) K3 वै पूर्वजित, S पूज्यमाना Ś1 K1 M3 महार्हां, K0.2.4 वै यथार्हं, M6 यथार्हं — c) K1.3 Ñ1 D5 सर्वे मया भाषिता Ś1 एवमेव, K0.3.4 B6 Da D2.4.5 G3 M (except M3) एतदेव, K1 एव देव; Ñ1 तत्र देव — d) K3 B5 D4 एतद्, B3 Da एव; G2 अन्य K2 Ñ2.3 V1 B D °र्थयुक्त

27 Ś1 S om ऊचु. — a) T1 नरकं (for मानुष). K2 D1.2 देवलोक, V1 °रूप B6 देवलोकाद्भूलोक; Da (corrupt) देवलोकादन्यलोक (both om मानुष) — b) K1 परावरो, K2 Dn1 दुराधारो, B5 °राघो; S °वा(M2.6-8 °व)रो, Cd as in text. T2 G3-5 निहितो Ñ1 यत्र लोक; D5 यत्र धर्म — c) Ś1 K M7 तस्माद्; G2 अस्मान् — d) Ś1 K1 भगवानश्विनौ च — After 27, K4 Ñ V1 B D G1 ins

1915* अस्त्रैर्दिव्यैर्मानुषान्योधयित्वा
आगन्तार पुनरेवेन्द्रलोकम् ।
[Cf 1914*]

28 Ś1 K1 S om उवाच — a) Da2 G1 (by corr) वज्रपाणेर्, T1 यज्ञपाणेर् — b) G1 एतद् (for इदम्) — c) Ś1 K (except K2) Ñ1 D5 Cd पुरुष कर्महेतोर्; B6 Da D2 कर्महेतोर्मनुष्य — d) K0.2.4 दास्याम्येषा; K3 Ñ1.2 B6 D2.4 उदास्येषा Ś1 D1 पञ्चमस्य Ś1 K1 तत्प्रसूतां (K1 °त), D1 मत्प्रसूत. — After 28, N ins. (a

देद्यामेषां पञ्चमं मत्प्रसूतम् ॥ २८
तेषां कामं भगवानुग्रधन्वा
प्रादादिष्टं सन्निसर्गाद्यथोक्तम् ।
तां चाप्येषां योषितं लोककान्तां
श्रियं भार्यां व्यदधान्मानुषेषु ॥ २९
तैरेव सार्धं तु ततः स देवो
जगाम नारायणमप्रमेयम् ।
स चापि तद्व्यदधात्सर्वमेव
ततः सर्वे संबभूवुर्धरण्याम् ॥ ३०
स चापि केशौ हरिरुद्बबर्ह
शुक्लमेकमपरं चापि कृष्णम् ।
तौ चापि केशौ विशतां यदूनां
कुले स्त्रियौ रोहिणीं देवकीं च ।
तयोरेको बलदेवो बभूव
कृष्णो द्वितीयः केशवः संबभूव ॥ ३१
ये ते पूर्वं शक्ररूपा निरुद्धा-
स्तस्यां दर्यां पर्वतस्योत्तरस्य ।
इहैव ते पाण्डवा वीर्यवन्तः
शक्रस्यांशः पाण्डवः सव्यसाची ॥ ३२
एवमेते पाण्डवाः संबभूवु-
र्ये ते राजन्पूर्वमिन्द्रा बभूवुः ।
लक्ष्मीश्चैषां पूर्वमेवोपदिष्टा
भार्या यैषा द्रौपदी दिव्यरूपा ॥ ३३
कथं हि स्त्री कर्मणोऽन्ते महीतला-
त्समुत्तिष्ठेदन्यतो दैवयोगात् ।
यस्या रूपं सोमसूर्यप्रकाशं
गन्धश्चाग्र्यः क्रोशमात्रात्प्रवाति ॥ ३४
इदं चान्यत्प्रीतिपूर्वं नरेन्द्र

C 1 7312
B 1 197 37
K 1 214 37

---

s'loka 1)

1916* विश्वभुग्भूतधामा च शिबिरिन्द्रः प्रतापवान् ।
शान्तिश्चतुर्थस्तेषां वै तेजस्वी पञ्चमः स्मृतः ।

[(L 1) Ś1 K1 V1 धृतधामा; K0 क्रतु°, K3 Ñ2 Dn D1.5 भूत°, Ñ1.3 B3 D1 धृत° K2 शुचिरिंद्र]

29 Before 29, D5 ins व्यास उ°; G5 व्यास — a) T1 तेषा कर्म S उग्रकर्मा, Cd as in text. — b) K1.3 स निसर्गाद्, Ñ1 स विस°, B3 D2 सन्नियोगाद् (B3 m °सगाद्); D4 सविस°; G2 सन्निसर्गं — c) Da D4 तां चाप्येना D2 लोककर्ता — d) Ñ1 श्रिय देवीं K4 विदधन्; G6 विदधान्; M1 आददान् M6-8 मानवेषु — After 29, T1 ins 1918*

30 After 30ab, K4 Ñ2.3 V1 Dn D1.4 (marg sec m) ins

1917* अनन्तमव्यक्तमजं पुराणं
सनातनं विश्वमनन्तरूपम् ।

— S ins after 30 (T1, after 29)

1918* नरं तु देवं विबुधप्रधान-
मिन्द्रो जिष्णुं पञ्चमं कल्पयित्वा ।

31 a) M3.5 द्वौ चापि. G2 (hapl) om. from हरिर् up to केशौ (in c) G3 हरिरुद्बृहत्सदात् — b) K0.3.4 T1 शुक्ल चैकम् K2 Ñ3 B Da D2.4 एक कृष्णमपर चैव शुक्ल — c) Ś1 K Ñ1 आ(K2 निर्)विशेता, Ñ2.3 V1 B D निविशेता; G1 विहितौ — d) S कुलस्त्रियौ K2 Ñ V1 B D M5 देवकीं रोहिणीं (by transp) — e) S (except T2 G4) तयो श्वेतो T1 बलभद्रो — N ins after 31e

1919* योऽसौ श्वेतस्तस्य देवस्य केश ।,

and after 31f

1920* केशो योऽसौ वर्णत कृष्ण उक्त ।

32 a) S (except G2.3.6) एते पूर्वं K0 इन्द्रभूता निरुद्धा K1 Ñ2.3 V1 Dn1 n2 D1 नियद्धा — b) S उत्तम° (for उत्तर°) — c) K1.2 B5.6 Da D1.2.4 G2.6 एते (for ते) — T3 G4 (hapl) om from वीर्य° up to पाण्डवा (in 33a)

33 T3 G4 om up to पाण्डवा (of V 1 32) — b) K4 T1 G2.6 M एते राजन् — c) M6-8 लक्ष्मीश्चैवं — d) K0 Ñ1 B5.6 D2 T G1-4 M6-8 चैषा, K2.4 B1 D5 G5.6 चैषां; M3 कृष्णा M5 व्यक्तरूपा

34 a) K0 D1 T3 G om हि K3 Ñ2.3 B1 Da कर्मणा ते, Ñ1 धर्मणोंते; M6-8 कर्मतोंते — b) Ś1 देवलोकात् (m दैवयोगात् as in text) — d) Ś1 Ñ2 B3 Dn3 D1.3 T2 G3-5 M (except M5) गधश्चास्या, G1 गंध चाग्र्य, G2 °श्चाय; G6 श्च य° K2 क्रोशमगात्, D2.4 T2 G2.3.5 °मात्रं, T1 G6 °मस्या Ś1 Ñ3 T2 G3 (inf lin as in text) 4 प्रयाति; K3 प्रभावात्

35 a) Ś1 K (except K2) D2 चाहं; Ñ1 त्वहं, T1 चान्यं — b) Ś1 K0.3 Ñ V1 B1 Dn D1 T G (except G2.6) M6-8 ददानि Ś1 K (except K2) D2 ते, Ñ1 मे

C. 1. 7312
B. 1. 197. 37
K. 1. 214. 37

दद्यामि ते वरमत्यद्भुतं च ।
दिव्यं चक्षुः पश्य कुन्तीसुतांस्त्वं
पुण्यैर्दिव्यैः पूर्वदेहैरुपेतान् ॥ ३५

वैशंपायन उवाच ।
ततो व्यासः परमोदारकर्मा
शुचिर्विप्रस्तपसा तस्य राज्ञः ।
चक्षुर्दिव्यं प्रददौ तान्स सर्वा-
न्राजापश्यत्पूर्वदेहैर्यथावत् ॥ ३६
ततो दिव्यान्हेमकिरीटमालिनः
शक्रप्रख्यान्पावकादित्यवर्णान् ।
बद्धापीडांश्चारुरूपांश्च यूनो
व्यूढोरस्कांस्तालमात्रान्ददर्श ॥ ३७
दिव्यैर्वस्त्ररजोभिः सुवर्णै-
र्माल्यैश्चाग्र्यैः शोभमानानतीव ।
साक्षात्त्र्यक्षान्वसवो वाथ दिव्या-
नादित्यान्वा सर्वगुणोपपन्नान् ।
तान्पूर्वेन्द्रानेवमीक्ष्याभिरूपा-
न्प्रीतो राजा द्रुपदो विस्मितश्च ॥ ३८
दिव्यां मायां तामवाप्याप्रमेयां
तां चैवाग्र्यां श्रियमिव रूपिणीं च ।
योग्यां तेषां रूपतेजोयशोभिः
पत्नीमृद्धां दृष्टवान्पार्थिवेन्द्रः ॥ ३९
स तद्दृष्ट्वा महदाश्चर्यरूपं
जग्राह पादौ सत्यवत्याः सुतस्य ।
नैतच्चित्रं परमर्षे त्वयीति
प्रसन्नचेताः स उवाच चैनम् ॥ ४०

(for ते) Ś1 K0.1.4 Ñ1 D5 सुम्यम्, K2.3 Dn1 n2 S (except G1.6) दिव्यन्; D5 रूपम् (for वरम्) — c) G5 °सुतांश्च, M6-8 °सुतांस्तान् — d) K1 पुण्यैर्देहै° Ś1 पूर्वरूपैर्; B3 (m as in text) 5 Da पुण्यदेहैर्

36 Ś1 K D2 S om. उवाच (K2 T2 G1-4 om. the ref.) — b) M5 शुचिर्दिव्यस् — c) K0.2 N V1 B D सांश्च (D5 °स्तु), K3.4 तान् (om स), S तेन — d) T G M5 रूपेतान् (M5 inf lin as in text), M6-8 यदावत्

37 b) Ś1 K1 D1 शक्रप्रमुख्यान् (D1 °ख्यान्); G2 शारप्रमुख्यान् Ś1 सुदिवस्थान्ददर्श, K1 पच चैवेंद्रकल्पान्; M5 पावकदीप्तवर्णान्; M6-8 शुचि चादित्यव° — c) Ñ1 चंद्रापीडान् K4 चातिरूपांश्च, D5 चानुरूपांश्च — d) T G साल° (for ताल°) Ñ1 °स्कांस्तानपश्यन्महेंद्रान्

38 a) Ñ1 Da1 Dn1 G1 अम्बर्, T2 G3-4 वर्णैर् (for वस्त्रैर्) Ñ1 V1 विरजोभि°, G2 न रजोभि° K2 Ñ2.3 V1 B D सुगंधैर् — b) Dn D4 माल्यैश्चोग्रै.. — c) K2 G1.2 यक्षान्, T1 प्रेक्षान् (for त्र्यक्षान्) Ś1 वापि (for वाथ) K2 Ñ1 तान् (Ñ1 वा) वसूश्चापि दिव्यान्, K3 वा वसून्वाथ दिव्यान्, Ñ2.3 V1 B D वा (D5 om. वा) वसूश्चा(B1.3 °सून्वा)पि रुद्रान्, T G M5 वासवान्वाथ दिव्यान्; M6-8 वासवा(M8 वा वसू)न्दिव्यरूपान् — d) Ś1 आदित्यान्वै, B3 Da D2 अ(D3 त)थादित्यान् — e) T2 G1-6 पूर्वेंद्रान्तान् (by transp), G2 पूर्वानिंद्रान् Ś1 K1 D5 समवेक्ष्य, K0.3.4 प्रसमी°, K2 स समी , Ñ2.3 B Da Dn D1.2.4 अभिवी° (for एवमीक्ष्य) Ś1 अभिपूर्णान्, D5 अनुरूपान् Ñ1 तान्सर्वान्समालक्ष्याभिरूपान्, V1 तान्पूर्वेंद्रानेव पूर्वाभि° — After 38e, N ins

1921* शक्रात्मजं चेन्द्ररूपं निशम्य ।

[See below — K2 B Da D2.4 °स्तथं चापि निरीक्ष्य पार्थं]
— M5 (? hapl.) om. from 38f up to 40a

39 M5 om 39 (cf. v l. 38). — a) Ś1 K1 दिष्टा मायां Ś1 K1.4 ता समीक्ष्य, K0.3 प्रसमीक्ष्य, K2 Ñ V1 B D G1 तामवेक्ष्य — b) K2 तथैवाग्र्यां, B3 तां वै चाग्र्या K2 Ñ2.3 V1 B (except B3) D (except Dn) स्त्रियम् (for श्रियम्) Ś1 K Ñ1 V1 B Da D3.4.5 अभि(K0.2-4 B3 D2.4.5 °ति)रूपजुष्टां, Dn D1 अति(D1 °भि)रूपयुक्तां — After 39ab, N ins

1922* दिव्या साक्षात्सोमवह्निप्रकाशा ।

[See above K2 सोमरूपप्र°; Dn2 सोमसूर्यप्र°.]
— d) K3 सृष्टा; K4 दृष्टां, Ñ2 B1 Dn D1 मत्वा (for ऋद्धां) K2 पत्नीं दृष्ट्वा दृष्टवान्पा°

40 M5 om 40a (cf. v l. 38) — a) K4 V1 D1.2 त; S (M5 om) तान् (for तद्) Ś1 K (except K2) परमाश्चर्य°, S (M5 om) °रूपान् — c) M5 नैकश्चित्र K4 G1 त्वयेति — d) M1.5 तमुवाच चै° — After 40, D4 (marg. sec. m) S ins an addl colophon [*Adhy name* S पंचेंद्रोपाख्यान — *Adhy no* T1 198, T2 G2-6 150, G1 152, G3 149, M 151 — *Śloka no* M5 40]
After this colophon, D4 (marg sec. m) S ins an (addl.) adhy of 25 lines, given in App I (No 101).

व्यास उवाच ।

आसीत्तपोवने काचिदृषेः कन्या महात्मनः ।
नाध्यगच्छत्पतिं सा तु कन्या रूपवती सती ॥ ४१
तोषयामास तपसा सा किलोग्रेण शंकरम् ।
तामुवाचेश्वरः प्रीतो वृणु काममिति स्वयम् ॥ ४२
सैवमुक्ताब्रवीत्कन्या देवं वरदमीश्वरम् ।
पतिं सर्वगुणोपेतमिच्छामीति पुनः पुनः ॥ ४३
ददौ तस्यै स देवेशस्तं वरं प्रीतिमांस्तदा ।
पञ्च ते पतयः श्रेष्ठा भविष्यन्तीति शंकरः ॥ ४४
सा प्रसादयती देवमिदं भूयोऽभ्यभाषत ।
एकं पतिं गुणोपेतं त्वत्तोऽर्हामीति वै तदा ।
तां देवदेवः प्रीतात्मा पुनः प्राह शुभं वचः ॥ ४५
पञ्चकृत्वस्त्वया *उक्तः पतिं देहीत्यहं पुनः ।
तत्तथा भविता भद्रे तव तद्भद्रमस्तु ते ।
देहमन्यं गतायास्ते यथोक्तं तद्भविष्यति ॥ ४६
द्रुपदैषा हि सा जज्ञे सुता ते देवरूपिणी ।
पञ्चानां विहिता पत्नी कृष्णा पार्षत्यनिन्दिता ॥४७
स्वर्गश्रीः पाण्डवार्थाय समुत्पन्ना महामखे ।
सेह तप्त्वा तपो घोरं दुहितृत्वं तवागता ॥ ४८
सैषा देवी रुचिरा देवजुष्टा
पञ्चानामेका स्वकृतेन कर्मणा ।
सृष्टा स्वयं देवपत्नी स्वयंभुवा
श्रुत्वा राजन्द्रुपदेष्टं कुरुष्व ॥ ४९

C 1 7323
B 1 107 53
K 1 214 67

इति श्रीमहाभारते आदिपर्वणि एकोननवत्यधिकशततमोऽध्यायः ॥ १८९ ॥ समाप्त द्रौपदीस्वयंवरपर्व ॥

☞ St 41–47 are a variant of 1 157 6–14

41 Ś1 K1 S om उवाच — a) K3 तपोधना का°. — b) S (except M2.3) नाभ्यगच्छत् D1 सा वै, T2 G3.4 सापि

42 b) Da1 Dn3 किलोग्रेण च शंकरं; T1 G1.5.6 M सा तु देव महेश्वरं, T2 G2–4 प(G2 प्री)त्यर्थं त्रिपुरांतक — c) T2 G2–4 तामुवाच ततस्; G6 तपसा चेश्वरस् S तुष्टो (for प्रीतो) — d) K0.3 स्मयन्, K2 स्मरन् S वृणीष्व कामभीप्सित

43 ab) S अथेश्वरमुवाचेदमात्मनो यद्धित (T1 वर्धित) वच

44 ab) Ś1 K1.2 V1 च (K3 स) तस्यै; K0 तस्यैव, Ñ1 च तस्या (for तस्यै स) K3 तद्वरं K0 प्रीतिपूर्वकं, K2 Ñ2.3 B Dn D1.3.4 प्रीतमानस (for प्रीतिमां°) K3.4 प्रीतिमास्तद्वर तदा S एवमुक्तस्तदा देव इद वचनमब्रवीत् — c) K2 Ñ2.3 B D (except D5) पतयो भद्रे — d) S इत्युक्ता सा तु (T1 G6 सा च, T2 G2.4 साधु) भामिनी

45 S om 45 — a) K3.4 प्रसादयती सा देवम् — c) K0 पतिमेक (by transp), D1 एवं पतिं — d) K2 Ñ2.3 B D शकर (for वै तदा) — e) Ś1 K1 तदैव देव

46 Before 46, Ś1 ins महादेव ; K1 श्रीदेवदेव , V1 देवदेव उ°; B6 देव उ°, D2 महादेव उ° — a) Cf. 1 157. 13 Ś1 K0 M त्वयाप्युक्त , K1.3.4 त्वयास्म्युक्त.; K2 त्वयैवोक्त ; Ñ1 त्वया ह्युक्त , V1 त्वया प्रोक्त , Ñ2.3 B D त्वयोक्तोह; T G त्वया चोक्त (all avoiding the hiatus in different ways!) — b) K3 Ñ2.3 B D देहीति वै S शुभे (M5 पुन also) — S om 46ef — d) Ñ1 तदेतद्; Ñ2.3 V1 Dn D1.4 वचस्तद् (for तव तद्). — f) S वै (for तद्) K3 भविष्यति न संशय , K3m Ñ2.3 V1 B D सर्वमेतद्भविष्यति — After 46, T2 G2–4.6 ins. a passage of 32 lines given in App I (No 102)

47 Before 47, K3 V1 Da Dn3 D2.4.5 ins व्यास उ°. G6 om 47ab. — a) B1m D4 द्रौपद्येषा S (G6 om) ततो — b) K3 Ñ2.3 B6 D (except D2.3) वै (for ते) — c) S कृष्णा — d) B6 दृष्टा, S पुरा (for कृष्णा). K3 कृष्णानिंद्या भविष्यति

48 T2 G4 om 48 — a) S (T2 G4 om) स्वर्गाच्छ्री . Ñ2.3 B D (except D5) पांडवार्थं तु K2 द्रुपद श्री पांडवार्थं, K4 स्वर्गलक्ष्मी पांडवाय — b) S (T2 G4 om) तपोध(G6 °ध)ने — c) K3 Ñ1.2 V1 B (except B1) D1 D2.4.5 सेय, S (T2 G4 om) सैव (G6 सैतत्, M5 सव) — d) G2.3 दुहितात्व K3 उपागता, S (T2 G4 om.) गता तव

49 a) G4 पापजुष्टा V1 सैषा पंचानां पांडवाना भविन्नी — b) Ñ1 सु- (for स्व). K3 कर्मणा स्वेन राजन्, Ñ2.3 V1 B D स्व(B2.6 Da D4 सु)कृतेनेह क°; T G स्वकृतेनैव क° — c) S सृ(T1 द)ष्टा पूर्वं G1 स्वय हि, M3 स्वय वा — d) K3 कुरु त्वं — After 49, K4 ins a passage

१९०

C. 7229 B. 1. 198. 1 K. 1. 215. 1

द्रुपद उवाच ।

अश्रुत्वैवं वचनं ते महर्षे
मया पूर्वं यतितं कार्यमेतत् ।
न वै शक्यं विहितस्यापयातुं
तदेवेदमुपपन्नं विधानम् ॥ १

दिष्टस्य ग्रन्थिरनिवर्तनीयः
स्वकर्मणा विहितं नेह किंचित् ।
कृतं निमित्तं हि वरैकहेतो-
स्तदेवेदमुपपन्नं बहूनाम् ॥ २

यथैव कृष्णोक्तवती पुरस्ता-
न्नैकान्पतीन्मे भगवान्ददातु ।
स चाप्येवं वरमित्यब्रवीत्तां
देवो हि वेद परमं यदत्र ॥ ३

यदि वायं विहितः शंकरेण
धर्मोऽधर्मो वा नात्र ममापराधः ।
गृह्णन्त्विमे विधिवत्पाणिमस्या

---

of 114 lines, comprising two adhyāyas, given in App I (No 100), which are ins. in S after adhy 188

Colophon om. in K4. — *Major parvan* T2 G M संभव° (for आदि°) — *Sub-parvan* K3 द्रौपदीविवाह, B1 Dn3 D5 द्रौपदीस्वयंवर, Dn1 n2 स्वयंवर; T1 संभव; to these K3 B1 Dn D5 add पंचेन्द्रोपाख्यान Ś1 Ko-2 Ñ3 B2.3.6 Da D2.4 (all om the sub-parvan name) mention only पंचेन्द्रोपाख्यान — *Adhy no* (figures, words or both) Dn3 196, D4m 203, D5 147, T1 200, T2 G4-6 152, G1.3 154, G2 151, M 153 — *Śloka no* Da 52, Dn 53, M3 8. — *Aggregate śloka no* Dn3 7308

190

1 Ś1 K1 S om उवाच — Ñ1 V1 B2 subst. for 1[ab] Da Dn3 ins. before 1[ab]

1923* श्रुत्वा वचनत्व्यमिदं महार्थं
नष्टप्रमोहोऽस्मि महानुभाव ।

— [a]) Ś1 Ko अश्रुत्वैव, K2 श्रुत्वा त्वेद, K3 अश्रुत्वैतद्, T2 G (except G1.3) श्रुत्वैवैव — [b]) T G2-4 यदिदं, G1 गदित, G6 विदितं K3 Ñ2.3 B1.2.3 D (except D5) सविधातु (K2 °नं), S वर्जयित्वा — [c]) K1 नैवं, Ñ1 D1 नैव, S न हि (for न वै) K3 Ñ2.3 V1 B Dn D1.2.4 विहितस्यापयान, S °तात्यापयातु — [d]) Ś1 K1 तदेवैतदुप° Ñ1 B1 निधान Cf 2[d]

2 [a]) Ś1 Ko.1.2 Ñ1 T1 अनुवर्त°, B1 न निवर्त° — [b]) Ś1 चेह, K2 तत्र, K3 वेह; S चैव (M6-8 त्वेव) B6 कश्चित्; D5 कंश्चित्, M3 *inf lin* सर्वं — [c]) Ñ3 कृतं प्रयत्न — [d]) Ko.2.4 तथैवेदम्; G1 तदेवेनम्; M2.3 तदेव चेद् K3 Ñ2.3 B1m.3.5 Dn D1 विधानं (for बहू°), cf. 1[d]

3 [a]) Ś1 K1 यदैव — [b]) K2 नैकं पतिं मे, K3 एतान्पतीन्मा, G1 नैतान्पतीन्मे Cd cites नैकान् — [c]) M6-8 न (for स) B2 चाप्येन, S चाप्येतद् Ś1 Ko.1.4 T1 परमित्यब्र°; B5 वरमब्र°; B6 वरमित्येवाब्र° G5.6 M3 (*inf lin* as in text) तदा (for तां) — [d]) D2 इ, M2.3 अपि (for हि) Ñ2.3 V1 B1.5 Dn D1 वेत्ता, D2 वै (for वेद)

4 D1 reads 4 after 6 — [a]) B6 Da D2 यदै(Da °दे)वेदं Ś1 वेय, K (except K1) Ñ2.3 B1.2.3 Dn D1.4.5 चैव, Ñ1 चेद्, V1 सार, S त्वय (M3 त्विय) (for वाय) Ś1 K (except K1) विहिता, B6 Ñ1 V1 Da D2 °तं — [b]) K1 मे (for वा) D5 om वा Ko.2 वै मे, D5 मे वै (for मम) — [c]) S पाडवा पाणिमस्या (T1 पाणिमस्या यथावद्) — [d]) Ñ1 D1 यथायोग, S यथाजोष (G1 °न्याय, M5 as in text). Ś1 K1.4 Ñ1 विहितंपा G1 विहितां हि कृष्णां — After 4, K4 (marg.) D4 (marg. *sec m.*) ins

1924* नाय विधिर्मानुपाणा विवाहे
देवा ह्येते द्रौपदी चापि लक्ष्मी ।
प्राक्कर्मण स्वकृतात्पञ्च भर्तॄ-
नवाप्येषा देवदेवप्रसादात् ।
नैषामेवाय विहित सद्विवाहो
यद्भार्यैषा द्रौपदी पाण्डवानाम् ॥

K4 cont.:

1925* अन्येऽप्येव स्युर्मनुष्या स्त्रियश्च

यथोपजोषं विहितैषां हि कृष्णा ॥ ४

वैशंपायन उवाच ।

ततोऽब्रवीद्भगवान्धर्मराज-
मद्य पुण्याहमुत पाण्डवेय ।
अद्य पौष्यं योगमुपैति चन्द्रमाः
पाणिं कृष्णायास्त्वं गृहाणाद्य पूर्वम् ॥ ५

ततो राजा यज्ञसेनः सपुत्रो
जन्यार्थयुक्तं बहु तत्तदग्र्यम् ।
समानयामास सुतां च कृष्णा-
माप्लाव्य रत्नैर्बहुभिर्विभूष्य ॥ ६

ततः सर्वे सुहृदस्तत्र तस्य
समाजग्मुः सचिवा मन्त्रिणश्च ।
द्रष्टुं विवाहं परमप्रतीता
द्विजाश्च पौराश्च यथाप्रधानाः ॥ ७

तत्तस्य वेश्मार्थिजनोपशोभितं
विकीर्णपद्मोत्पलभूषिताजिरम् ।
महार्हरत्नौघविचित्रमावभौ
दिवं यथा निर्मलतारकाचितम् ॥ ८

ततस्तु ते कौरवराजपुत्रा
विभूषिताः कुण्डलिनो युवानः ।
महार्हवस्त्रा वरचन्दनोक्षिताः
कृताभिषेकाः कृतमङ्गलक्रियाः ॥ ९

पुरोहितेनाग्निसमानवर्चसा
सहैव धौम्येन यथाविधि प्रभो ।
क्रमेण सर्वे विविशुश्च तत्सदो
महर्षभा गोष्ठमिवाभिनन्दिनः ॥ १०

C 1 7338
B 1 198. 10
K. 1 215 15

न धर्मः स्यान्मानवोक्तो नरेन्द्र ।

5 Ś1 K (except K0) S om. उवाच For S see below. — a) Ś1 भार्गवो धर्मं — b) K4 Ñ V1 B6 Dn D2 4 अद्यैव (for अद्य) K0 D5 उत्तमं; K2 Ñ V1 B6 Dn D4 उत वः, B5 शुभ व. (for उत) K0 4 Ñ2.3 V1 B5 6 Dn D4 5 पाण्डवेया B1 3 Dn D1.2 पुण्याहमद्यैव युधिष्ठिरेति — c) Ś1 K4 V1 पुण्यं योगम्, K1 पुण्ययोगम्, K2 योग पुण्यम्, Ñ1 पुण्ये योगम् K2 Ñ1 चन्द्र K0 3 पौष्य योग चाद्य चन्द्रोऽभ्युपैति N1lp पौष्प (for पौष्य) — d) K2 om त्व Ñ1 D1 om अद्य B6 ब्राह्मो मुहूर्तश्च तथैव राजन् — After 5, B5 ins

1926* पाणिं गृहाण प्रथम त्वमस्याः
पाञ्चालराजस्य नरेन्द्र पुत्र्याः ।

S subst for 5 D4 ins after 1924*

1927* तत आजग्मतुस्तत्र तौ कृष्णद्रुपदावुभौ ।
कुन्ती सपुत्रा यत्रास्ते धृष्टद्युम्नश्च पार्षतः ।
ततो द्वैपायन कृष्णो युधिष्ठिरमथाब्रवीत् ।
अद्य पुण्यमहश्चन्द्रो रोहिण्या च समेष्यति ।
क्रमेण मनुजव्याघ्रा पाणिं गृह्णन्तु पाण्डवा । [5]
द्रौपद्या धर्मत सर्वे दृष्टमेतत्पुरानघ ।

[(L. 5) G1 6 मनुजव्याघ्र — (L 6) G1-4 धर्मतश्चेमे]

6 b) Ś1 K1 ज्ञानार्थयुक्तं; Ñ2 3 V1 B1 3 Dn D2 4 5 जन्यार्थमुक्त; T1 G1-4 M जन्यर्थयुक्त; G1 कन्यार्थमुक्त Cd cites जन्य (=जामाता) D3 बहुरत्नमग्र्य; G5 6 M6-8 बहु तत्तदाग्र्य. — c) B6 D2 ससज्जयामास, T G1-6 संभाव°, G1 M समर्थं°. — d) Ś1 K V1 आप्लुत्य, Ñ1 आसिच्य. Ś1 विभूष्या; K2 D2 विभूषितां (for विभूष्य) — After 6, D1 reads 4

7 a) K2 Ñ2 3 B D (except D5) ततस्तु सर्वे सुहृदो नृपस्य — b) K2 B3.6 D (except D5) सहिता; B1 5 मुदिता (for सचि°) — d) Ś1 K1 Ñ1 V1 B6 Dn °प्रधानं; K2 °प्रवीरा°

8 a) K2 Ñ2 3 V1 B D G1 2 ततोस्य Ś1 K0 1.3 4 Ñ1 D5 आर्थिजनोपपन्न; K2 Ñ2 3 V1 B Dn Dn D1 2 4 अग्र्य(K2 Dn Dn8 °ग्र)जनो° — b) Ś1 K1 °भूषित नव, Ñ1 विकीर्णपुष्पोत्करभू°, Ñ2 3 B6 Dn D5 विस्तीर्ण°, V1 प्रकीर्ण°; T3 G °शोभिताजिर (G5 6 °ताग्रिक) — c) K Ñ2 3 V1 B D यत्नौघ; T3 G M2 5 बभूव, T1 M6-8 अनेक (for महार्ह) — d) Ś1 K2 Ñ V1 B D (except D5) नभो यथा Ñ2 3 Dn2 n3 D5 T3 G5-6 °तारकान्वित

9 b) S सुवेषा — c) B6 °चदनाक्ता ; Dn °चदनोक्ता Ś1 K (except K2) Ñ1 D5 महार्हमाल्याम्बर°, Ñ2 3 V1 B1 3 Dn D1 °वस्त्राम्बर° — d) S °कौतुक°

10 a) S °समान(G6 M °समेन)तेजसा — b) Dn सदैव धौ°. S तथा यथा(G5 यथा तथा; M तदा यथा)विधि (G3 तथाविधिर्यथा) — c) K2 ततस्तदा; Ñ2 3 V1 B1 3 Dn D1 2 तत सदो; B6 ततश्च तन् — d) K2 मत्तर्षभा K1 D5 °नदिता , K3 M6-8 °नदित , Ñ1 3 V1 B1 (m ns in text) Dn3 D3 °नर्दिन K3 महर्षिमग्नुष्टमतीव नदिता

11 a) K2 अवनीय, Ñ1 B D1.2 3 G1 2 M5 अनु°; Dn

C. 1 7339 B. 1 198. 11 K. 1 21* 15

ततः समाधाय स वेदपारगो
  जुहाव मन्त्रैर्ज्वलितं हुताशनम् ।
युधिष्ठिरं चाप्युपनीय मन्त्रवि-
  न्नियोजयामास सहैव कृष्णया ॥ ११

प्रदक्षिणं तौ प्रगृहीतपाणी
  समानयामास स वेदपारगः ।
ततोऽभ्यनुज्ञाय तमाजिशोभिनं
  पुरोहितो राजगृहाद्विनिर्ययौ ॥ १२

क्रमेण चानेन नराधिपात्मजा
  वरस्त्रियास्ते जगृहुस्तदा करम् ।
अहन्यहन्युत्तमरूपधारिणो
  महारथाः कौरववंशवर्धनाः ॥ १३

इदं च तत्राद्भुतरूपमुत्तमं
  जगाद विप्रर्षिरतीतमानुषम् ।
महानुभावा किल सा सुमध्यमा
  बभूव कन्यैव गते गतेऽहनि ॥ १४

कृते विवाहे द्रुपदो धनं ददौ
  महारथेभ्यो बहुरूपमुत्तमम् ।
शतं रथानां वरहेमभूषिणां
  चतुर्युजां हेमखलीनमालिनाम् ॥ १५

शतं गजानामभिपद्मिनां तथा
  शतं गिरीणामिव हेमशृङ्गिणाम् ।
तथैव दासीशतमग्र्ययौवनं
  महार्हवेषाभरणाम्बरस्रजम् ॥ १६

Dn1.n3 T2 G3.4 मप°

12 a) B6 प्रगृहीतपाणिकौ; S परिगृह्य पाणिना — b) K2 Ñ1.3 B D (except D3 5) परी(K2 Da1 °रि)णयामास, Ñ2 परिणाय्यया°; V1 प्रणीयया° — After 12ab, D4 (marg. sec. m) S ins

1928* विप्रांस्तु संतर्प्य युधिष्ठिरोऽन्नै-
  र्गोभिश्च रत्नैर्विविधैरपूर्वैः ।
जग्राह पाणिं नरदेवपुत्र्या
  धौम्येन मन्त्रैर्विधिवद्धुतेऽग्नौ ।
ततोऽन्तरिक्षात्कुसुमानि पेतु
  र्ववौ च वायुः सुमनोज्ञगन्धः ॥

[(L. 1) D4 T G3-5 धनैं (for अन्नैः) — (L. 2) M6-8 गोभिर्हिरण्यैर् T2 G विविधैश्च पूर्वं — (L. 3) T1 G2 M5-8 नरदेवजाया, T2 G2.4.6 M8 नरदेवकन्यया]
— c) Ś1 K (except K2) ममभ्यनु° K2 समाजशोभित, Ñ1 B6 G2.6 °शोभन, Da1 D1.3 G1 °शोभित

13 a) K3.8 चान्येन; Ñ2 B1 (m as in text) 3 चान्ये च Ñ1 °धिपा ये, B6 D3 नृपाधिपा° — b) K0.2 Ñ2.3 B1 Dn1 n2 G1.2.3 M6-8 वरस्त्रियस्ते S (except G2 M5) कर तदा (by transp). — c) K2 T1 उत्तमवेष°; K4 अद्भुतरूप° — d) Ñ1 D3 महाबला

14 b) V1 जगाम Ñ2 Dn D3 देवर्षिर् K0.1 V1 B1 (m as in text) Dn1.n2 D3 अतीव मानुष; K2.4 अमानुषं तदा S दधार कृष्णा वपुषातिमानुष — c) K2 G2.3 किल माधुम° — d) T2 G (except G1) कन्येव K2 गतेहनि ध्रुव — After 14, D4 marg sec m ins (the śloka!)

1929* पतिश्वशुरता ज्येष्ठे पतिदेवरतानुजे ।
मध्यमेषु च पाञ्चाल्या त्रितय त्रितयं त्रिषु ।

15 b) K4 बहुरत्नमुत्तम — c) Ś1 K1 महारथानां K1 °रूपिणां; K2.3 Ñ2.3 V1 B D M5 °मालिना (D5 °भूषणां); Ñ1 °भूषण; T G M5.6-8 °भूषित — d) Ś1 K1 चतुःशत K2.3 B Da Dn3 D2.4 °खलीनशालिनां; S °विचित्रमालिनां

16 a) Cf 1 178 9 for अभिपद्मिन् Ś1 K1.2.4 Ñ V1 B D G2 M6-8 अपि (for अभि) V1 पद्मिनां च; B6 पद्मिनां शतं, Dn2 D2 G5 पद्मिनीनां; T G1-4.6 M पद्मजा(M8 °का)नां — b) S यथा (G3 महा) — After 16ab, S (except M5) ins.

1930* शतं दशाश्वान्मणिहेमभूषणा
  न्मनोजवान्द्वादशवार्षिकान्यथा ।

[a) G1 °हेमभूषिणा, M6-8 °हेमभूषिणो — b) G1 पङ्क्तिशताननेकान्; M6-8 द्वादशवार्षिकान्वरान्]
— d) Some MSS (mostly B) °वेशा° — After 16, D4 (marg sec. m) S ins

1931* हैमानि शय्यासनभाजनानि
  द्रव्याणि चान्यानि महासनानि ।

[b) G2 दिव्यानि (for द्रव्याणि) G1 महाधनानि; M5.6 च गोधनानि]

17 M6-8 om. 17a–18c — a) Ś1 K1 Ñ1 चैव दशाय(Ñ1 °यु)त ददौ; K0.3 V1 चैव दशायुतार्पित; K2.4 B1.2.3 D1.2 चैव दशायुतायु(D1.2 °न्वि)त; Ñ2.3 B6 Da Dn दिव्यदशा पुनर्ददौ, D4.5 चैव दशान्वितायुत, S (M6-8 om) चैव दशायुता(T1 °धा-; G1 °गा)नि — b) K3.4 D1.5 T1 ददौ धनं (by transp), Ñ1 धन तदा, N2.3 V1 Da Dn

पृथक् पृथक् चैव दशायुतान्वितं
धनं ददौ सौमकिरग्निसाक्षिकम् ।
तथैव वस्त्राणि च भूषणानि
प्रभावयुक्तानि महाधनानि ॥ १७

कृते विवाहे च ततः स पाण्डवाः
प्रभूतरत्नामुपलभ्य तां श्रियम् ।
विजह्रुरिन्द्रप्रतिमा महाबलाः
पुरे तु पाञ्चालनृपस्य तस्य ह ॥ १८

इति श्रीमहाभारते आदिपर्वणि नवत्यधिकशततमोऽध्यायः ॥ १९० ॥

१९१

वैशंपायन उवाच ।
पाण्डवैः सह संयोगं गतस्य द्रुपदस्य तु ।
न बभूव भयं किंचिद्देवेभ्योऽपि कथंचन ॥ १
कुन्तीमासाद्य ता नार्यो द्रुपदस्य महात्मनः ।
नाम संकीर्तयन्त्यस्ताः पादौ जग्मुः स्वमूर्धभिः ॥ २
कृष्णा च क्षौमसंवीता कृतकौतुकमङ्गला ।
कृताभिवादना श्वश्र्वास्तस्थौ प्रह्वा कृताञ्जलिः ॥ ३
रूपलक्षणसंपन्नां शीलाचारसमन्विताम् ।
द्रौपदीमवदत्प्रेम्णा पृथाशीर्वचनं शुभाम् ॥ ४
यथेन्द्राणी हरिहये स्वाहा चैव विभावसौ ।

C. 1 7351
B. 1 199 5
K. 1 216 5

M₃ तदा धन; B₆ तथा धनं A few MSS सोमकिर् K₀ ₃ D₅ अग्निमौलिक; K₃ अग्निसायक Ś₁ K₁ धनेन सौवर्णिकमुक्तमालिक — ᶜ) K₃ Ñ₂.₃ B D (except D₅) T₁ वि; Ñ₁ स (for च) — ᵈ) Ś₁ K₁ स्वभाव°; V₁ प्रताप°. K₃ Ñ₃ ₃ V₁ B D (except D₅) महानुभाव, Ñ₁ °नृपस्य; T₂ G₂–₄ महासनानि, G₁ °रथानि

18 M₆–₈ om 18ᵃᵇ (of v 1 17) — ᵃ) B₁ ₃ D (except Dn) तु (for च) K₃ Ñ₂ ₃ B D (except D₅) T G₃–₆ तु, V₁ अथ (for स) — ᵇ) G₁ महारथा — ᵈ) Ś₁ K₀ ₁ Ñ₁ T₁ पुरे स, K₆ पुरे च, V₁ पुरेषु A few MSS पचाल° Ś₁ K₀ ₃.₄ D तस्य (om ह), K₁ तस्य तु, T₁ तत्र ह, M₆ तत्र स — After 18, D₄ (marg. sec m) S ins

1932* सर्वेऽप्यनुप्यन्नृप पाण्डवेया
स्वस्या शुभे शीलसमाधिवृत्तैः ।
सा चाप्येषां याज्ञसेनी तदानीं
विवर्धयामास मुदं स्ववृत्तैः ॥
[ᵃ) T₁ सा चारुवेषा — ᵈ) T₁ G₃–₄.₆ सुवृत्तैः]

Colophon *Major parvan* T₂ G M संभव° (for आदि°) — *Sub-parvan* Ś₁ K Ñ₃ B₃ ₅ ₆ Dn Dn D₂ ₄ द्रौपदीविवाह (K₀ °दीवैवाहिक); B₁ D₅ द्रौपदीस्वयंवर (D₅ °स्वयंविवाह); Ñ₃ B₆ D₄ add समाप्त — *Adhy name* T₂ G₁ ₃ ₄ M द्रौपदीविवाह — *Adhy no* (figures, words or both) Dns 197, D₄m 204, D₃ 148, T₁ 201, T₂ G₄–₆ 153, G₁.₃ 155, G₂ 150, M 154. — *S'loka* no Dn 17, M₈ 24 — *Aggregate s'loka no* Dn₂ 7325.

191

1 K₁.₂ D₂ S om उवाच — After the ref., D₄ (marg sec m) S ins

1933* एवं विवाहं कृत्वा ते वीरा द्रुपदवेश्मनि ।
ऊषुः सर्वे यथा पुण्यं कृतवन्तोऽन्तरिक्षगाः ।

— ᵇ) T₂ G₂–₄ कृत°; Cd गत° (as in text). Ś₁ K₁ Ñ₃ च; K₀ ₂ Ñ B D G₅ ₆ ह (Ñ₁ D₂ चैव); Cd तु (as in text). — ᵈ) K₀ ₄ कदाचन

2 ᶜᵈ) K₁ स्व, Ñ V₁ B D अस्या (for ता) Ś₁ नाम संकीर्त्य स्वं तस्या (for °) Ś₁ जह्रु, K₁ चक्रु (for जग्मु) Ñ V₁ B D जग्मुः पादौ (by transp) Ś₁ K₁ Ñ₃ Dn₂ स्व(Ñ₃ स)मूर्धनि, B₁m स मूर्धभि S पादौ ववन्दिरे दृष्टाः शिरोभिर्नाम कीर्तयन्

3 ᵃ) S द्रौपदी (for कृष्णा च) — ᶜ) K₀ स्वस्त्रा; K₁ स्वश्र्वा; K₄ स्वस्ता; Ñ₂ ₃ V₁ B₁ ₃ Dn D₂ ₄ श्वश्र्वा. Ñ₁ कृत्वाभिवादनं श्वश्र्वा, S अभिवाद्य तदा (T₁ M₁ तथा; G₃ कृता) श्वश्रू

4 ᵃ) V₁ °सवीतां, T₁ G₁.₂ °यौवन° — ᵇ) T₁ °चारवतीं शुभां — ᵈ) K₃ °दीं प्रावदत्

5 Before 5, S (except T₁ M₅) ins कुन्ती — ᵃ) K₃ हरिगृहे — ᵇ) Ś₁ K (except K₂) D₃ M₁ चन्द्रे (for सोमे)

6 ᵇ) Some MSS वशिष्ठे — After 6ᵃᵇ, K₀ ₂ D₅ ins

C 1. 7351
B 1. 199. 5
K. 219. 5

रोहिणी च यथा सोमे दमयन्ती यथा नले ॥ ५
यथा वैश्रवणे भद्रा वसिष्ठे चाप्यरुन्धती ।
यथा नारायणे लक्ष्मीस्तथा त्वं भव भर्तृषु ॥ ६
जीवसूर्वीरसूर्भद्रे बहुसौख्यसमन्विता ।
सुभगा भोगसंपन्ना यज्ञपत्नी स्वनुव्रता ॥ ७
अतिथीनागतान्साधून्बालान्वृद्धान्गुरूंस्तथा ।
पूजयन्त्या यथान्यायं शश्वद्गच्छन्तु ते समाः ॥ ८
कुरुजाङ्गलमुख्येषु राष्ट्रेषु नगरेषु च ।
अनु त्वमभिषिच्यस्व नृपतिं धर्मवत्सलम् ॥ ९
पतिभिर्निर्जितामुर्वीं विक्रमेण महाबलैः ।
कुरु ब्राह्मणसात्सर्वामश्वमेधे महाक्रतौ ॥ १०
पृथिव्यां यानि रत्नानि गुणवन्ति गुणान्विते ।
तान्याप्नुहि त्वं कल्याणि सुखिनी शरदां शतम् ॥ ११
यथा च त्वाभिनन्दामि वध्वद्य क्षौमसंवृताम् ।
तथा भूयोऽभिनन्दिष्ये सूतपुत्रां गुणान्विताम् ॥ १२
ततस्तु कृतदारेभ्यः पाण्डुभ्यः प्राहिणोद्धरिः ।
मुक्तावैडूर्यचित्राणि हैमान्याभरणानि च ॥ १३
वासांसि च महार्हाणि नानादेश्यानि माधवः ।
कम्बलाजिनरत्नानि स्पर्शवन्ति शुभानि च ॥ १४
शयनासनयानानि विविधानि महान्ति च ।
वैडूर्यवज्रचित्राणि शतशो भाजनानि च ॥ १५
रूपयौवनदाक्षिण्यैरुपेताश्च स्वलंकृताः ।

1934* यथा दाशरथौ सीता यथा रुद्रे नगात्मजा ।; while T2 G (except G1) ins

1935* लोपामुद्रा यथागस्त्ये यथा रामे च जानकी ।
— After 6^{c}, T2 G2-4 ins

1936* वाग्देवी चतुरानने ।
गिरिजा गिरिशे यद्वदुषा भानौ यथा स्थिरा ।
स्थिरा च वसुभा च त्व

— ^{d}) T2 G2-4 सुप्रीता (for तथा त्व)

7 ^{a}) Ś1 K1 जीव त्व. — ^{b}) K3 Ñ3 B Da D2 4 °गुणान्विता; S °पुत्र°. — ^{c}) Ko 2 3 D5 धर्मपत्नी; Ñ3 याज्ञसेनि K2 B D2 4 5 व्रत°; Ñ1 अनु°; Ñ2 3 V1 Da Dn D1 पति°; S भयानघे

8 ^{a}) K3 Ñ3 B Da D2 4 बालान् (for साधून्) — ^{b}) M1 3 तथा गुरून् (by transp.) K3 Ñ3 B Da D2.4 साधून्मूर्खांस्तथा गुरून्; Ñ1 2 V1 Dn D1 वृद्धान्बालां स्तथा गुरून् — ^{c}) G1 M पूजयित्वा

9 ^{a}) Some MSS °जाङ्गल°; K3 °मध्येषु — ^{b}) K3 नगरेषु अनुत्तम — ^{c}) B6 तत्र; D1 अत्र (for अनु) Ś1 Ko 3 4 D5 त्वाम् Ś1 Ko 1 3 4 D5 °षिचतु; D1 G1 2 °षिचस्व; Cd as in text K3 अभिषिच्यस्व नृपतिं — ^{d}) M5 राजानं Ñ2 3 V1 B6 Dn D1 4 °वत्सला K3 स्वपतिं धर्मवत्सला; T G M6-8 नृपतीन्धर्मवत्सलान् Cd cites नृपतिं अनु

10 ^{a}) Ñ1 पुनः विनिर्जिताम्; B3 पतिभिर्विजिताम् — ^{b}) Ś1 K1 क्रमेण च महा°; D2 °मेण महारणे — ^{c}) S (except T1 G2 3 M3) सर्वम्

11 ^{c}) K3 तानि प्राप्नुहि क° — ^{d}) Ś1 स्याच्छरच्छत; Ko 1 3 Cd शरद् शत

12 ^{a}) Ko 3 4 G3 M6-8 यथा त्वा(M6-8 -द)मभिन°. — ^{b}) Da मध्यच; D5 विशुद्ध K3 Ñ3 B Da D2 4 क्षौमवाससं — ^{c}) Ś1 S -पि (for ऽभि) — ^{d}) K2 3 Ñ2 3 B D जातपुत्रां; Cd as in text V1 S सूतान्पुत्रा न्गुणान्वितान्

13 Before 13, all MSS except K4 ins वैश° उ° (Ś1 K1.3 D2 S om उ°) — ^{ab}) Ś1 पार्थे° (for पाण्डु°) K3 Ñ1 धन; Ñ3 inf lin विभु (for हरि°) S प्राहिणो द्वासुदेवश्च (M °स्तु) पांडवेभ्यो रिपुंजय — ^{c}) Ñ2 3 Dn D1 वैडूर्यमणि°; M3 °रत्नानि — D2 (hapl.) om. 13^{c}-15^{c}, M2 5 transp 13^{d} and 15^{d}

14 D2 om 14 (cf v. l. 13) — ^{b}) T1 भूषणान्युत्तमानि च — ^{c}) Ñ1 V1 M2 5 कवचानि च Ko 3.4 °मुख्यानि; G1 °चित्राणि; M2 5 °दिव्यानि (for °रत्नानि) — ^{d}) T1 स्वर्णवति; G1 रत्नानि च Ko 3 Ñ1 सुखानि च

15 D2 om 15^{ab} (cf. v. l. 13) — ^{a}) B1 शयनानि च या° — ^{c}) Ko 3.4 वज्रवैडूर्य° (by transp.), Ñ1 D4 T2 G (except G6) °रत्न°; D2 मुक्तावैडूर्य° — ^{d}) M2.5 transp 13^{d} and 15^{d}

16 ^{a}) K3 °लावण्यैर् — ^{b}) K3 उपेतास्यो ह्यलंकृता — After 16^{ab}, T2 G2-4 (G3 om. line 4, G4 om line 7) ins

1937* राकाशशाङ्कवदना पद्मिनीजातिसंभवा ।
पद्मगन्धा पद्ममुखी पद्मपत्रनिभेक्षणा ।
मुक्तागुच्छसुकर्णाश्च सत्यविन्दुललाटिका ।
पीवरस्तनभारार्ता चारुकण्ठ्य सुनासिका ।
कृष्णदीर्घसुकेशिन्यो मुष्टिमात्रसुमध्यमाः । [5]
मृगाक्षिरोमलतिका ह्यावर्तनिभनाभिका ।

प्रेष्याः संप्रददौ कृष्णो नानादेश्याः सहस्रशः ॥ १६
गजान्विनीतान्भद्रांश्च सदश्वांश्च स्वलंकृतान् ।
रथांश्च दान्तान्सौवर्णैः शुभैः पट्टैरलंकृतान् ॥ १७
कोटिशश्च सुवर्णं स तेषामकृतकं तथा ।
वीतीकृतममेयात्मा प्राहिणोन्मधुसूदनः ॥ १८
तत्सर्वं प्रतिजग्राह धर्मराजो युधिष्ठिरः ।
मुदा परमया युक्तो गोविन्दप्रियकाम्यया ॥ १९

इति श्रीमहाभारते आदिपर्वणि एकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥ समाप्तं वैवाहिकपर्व ॥

१९२

वैशंपायन उवाच ।
ततो राज्ञां चरैराप्तैश्चारः समुपनीयत ।
पाण्डवैरुपसंपन्ना द्रौपदी पतिभिः शुभा ॥ १
येन तद्धनुरायम्य लक्ष्यं विद्धं महात्मना ।
सोऽर्जुनो जयतां श्रेष्ठो महाबाणधनुर्धरः ॥ २
यः शल्यं मद्रराजानमुत्क्षिप्याभ्रामयद्बली ।
त्रासयंश्चापि संक्रुद्धो वृक्षेण पुरुषान्रणे ॥ ३
न चापि संभ्रमः कश्चिदासीत्तत्र महात्मनः ।

C 1 7393
B 1 200 4
K 1 217 4

विपुलश्रोणिफलका रम्भास्तम्भोरुयुग्मका॰ ।
[G3 om line 4 and reads line 7 in its place]
— K4 (? hapl) om 16ᵉ–17ᵇ — ᶜ) B3 m 3 (m as in text) 6 दृष्टो (for कृष्णो) — ᵈ) K2 Ñ2 B3 Dn1 n2 D1 4 स्वलंकृता ; B1 गुणान्विता॰ (for सह॰)

17 K4 om. 17ᵃᵇ (of v. l. 16), K3 (hapl) om 17ᶜᵈ. — ᶜ) T2 G (except G1) M2 3 सौवर्णान् K2 प्रादाद्दांतान्सुवर्णांश्च, B1 3. 5 D4 3 प्रांशुदां(D3 ॰द)तैः सुवर्णैश्च; B6 Da D2 रथानुदारान्सौवर्णैः. — ᵈ) Ñ1 2 V1 Da2 Dn D1 शुभ्रैः॰ Ñ3 रंगैर्; V1 भल्लैर्, T2 G M3 पत्रैर्, M3 पादैर् K2 B (except B6) D4 5 रथानश्वैरलंकृ॰

18 ᵃ) S सुवर्णानां K2 B1 5 तु; Ñ3 V1 B3 6 D (except D5) च (for स) — ᵇ) Ñ1 अकृतवत्; Cd as in text. Ś1 K3. 4 Ñ1 V1 तदा, Ko ददौ S तथैवाकृतक यदु. — ᶜ) Ś1 K Ñ2 3 Da D4 रीतीकृ॰, Ñ1 V1 D5 T G2–6 M2 6 7 Nilp कृताकृ॰, Dn D3 वीथीकृ॰, M5 कृती कृ॰, M3 कृत कृ॰; Nilp राशीकृ॰ (also) G1 कृतक यद्दमेयात्मा

19 ᶜ) S अर्चयिष्यन् (G2–5 ॰यित्वा) हृषीकेश

Colophon om in K2 D4 — *Major parvan* T2 G M संभव॰ (for आदि॰) — *Sub-parvan* Ko विदुरागमन, Dn1 n2 M6–8 द्रौपदीस्वयंवर, T1 सभव, to it Dn1 n2 M6–8 add समाप्त — *Adhy name* Ś1 राज्यलाभ , Ko 4 दाशार्हप्रीतिदाय ; K3 पांडवस्य श्रीकृष्णेन प्रीतिदान प्रेषित; B3 कृष्णोपायनप्रवेशन; D5 द्रौपदीविवाह ; T2 G1 3 4 कृष्णा दीर्वचनं — *Adhy no* (figures, words or both) Dn2 198, D5 149, T1 202, T2 G4–6 154, G1 3 156, G2 153, M 155. — *S'loka no* Da1 Dn 19, M3 20. — *Aggregate s'loka no* Dn2 7345

192

1 Ś1 K1–3 D2 S om उवाच — ᵃ) Ś1 Cd राज्ञश्चैर्. — ᵇ) Ñ1 ज्ञानं, G1 वार्ता; Cd चार (as in text) K (except K1) S (except M3) Cd समुपनीयते N2 B3 D (except Da) प्रवृत्तिरुपनीयत — ᵈ) K3 transp द्रौप॰ and पति॰ S बलिभिस्त्विति

2 ᵃ) K1 4 Ñ3 Da D2 4 5 G1 M5 ॰नस्य, Ñ2 V1 ॰दाय (for ॰यम्य) — ᵇ) S1 K (except K2) Ñ1 D4 विद्ध लक्ष्यं (by transp) Some MSS लक्षं — ᵈ) Ñ3 B1 (m as in text) ॰बल, S ॰बाहुर्

3 ᵃ) K2 Ñ2 3 V1 B D (except D5) ॰राजं वै (D4 च) — ᵇ) K2 Ñ2 3 V1 B D प्रोत्क्षिप्यापातयद्बली (D5 समुत्क्षिप्याहनद्बली), Ñ1 S उत्क्षिप्य न्यहनद्बली (G3 ॰ल) — ᶜ) Ś1 K1 भ्रा(K1 भ्र)मयश्चापि; K2 Ñ2 3 B D त्रासयामास V1 सत्रासयन्सुसंक्रुद्धो

4 ᵃ) Ś1 K (except K2) Ñ1 2 V1 B6 D (except D4) M5 न चास्य; M2 6–8 न चात्र — ᵇ) M3 6–8 तस्य (for तत्र) Ś1 Ko 1 4 Ñ3 D3 D5 धृतात्मन — ᶜ) Ś1 ॰सस्पर्ध ; Ñ1 M3 ॰सकाश , T G ॰सनाद — ᵈ) Ś1 ॰सेनाविपातन , K1 ॰सेनानिबर्हण , K3 D1 5 ॰सेनागतापन ; Ñ1 ॰सेनाग्रतापन , V1 ॰सेनागपाटक , S ॰सैन्या(M3 5 ॰सेना) गमर्दन — After 4, D4 (marg sec m) S ins

C. 1 7468
B. 1. 200. 4
K. 1 217 4

स भीमो भीमसंस्पर्शः शत्रुसेनाङ्गपातनः ॥ ४
ब्रह्मरूपधराञ्श्रुत्वा पाण्डुराजसुतांस्तदा ।
कौन्तेयान्मनुजेन्द्राणां विस्मयः समजायत ॥ ५
सपुत्रा हि पुरा कुन्ती दग्धा जतुगृहे श्रुता ।
पुनर्जातानिति स्मैतान्मन्यन्ते सर्वपार्थिवाः ॥ ६
धिक्कुर्वन्तस्तदा भीष्मं धृतराष्ट्रं च कौरवम् ।
कर्मणा सुनृशंसेन पुरोचनकृतेन वै ॥ ७
वृत्ते स्वयंवरे चैव राजानः सर्व एव ते ।
यथागतं विप्रजग्मुर्विदित्वा पाण्डवान्वृतान् ॥ ८
अथ दुर्योधनो राजा विमना भ्रातृभिः सह ।
अश्वत्थाम्ना मातुलेन कर्णेन च कृपेण च ॥ ९
विनिवृत्तो वृतं दृष्ट्वा द्रौपद्या श्वेतवाहनम् ।
तं तु दुःशासनो व्रीडन्मन्दं मन्दमिवाब्रवीत् ॥ १०
यद्यसौ ब्राह्मणो न स्याद्विन्देत द्रौपदीं न सः ।
न हि तं तत्त्वतो राजन्वेद कश्चिद्धनंजयम् ॥ ११
दैवं तु परमं मन्ये पौरुषं तु निरर्थकम् ।

1938* योऽस्मावत्स्यक्रमीयुद्धे युध्यन्दुर्योधन तदा ।
स राजा पाण्डवश्रेष्ठ श्रेष्ठभाग्बुद्धिवर्धन ।
दुर्योधनादयस्जैर्यौ युध्येतां प्रतीतवत् ।
तौ यमौ वृत्तसपक्षौ सपक्षयलविक्रमौ ।
चारैं प्रणिहिते चारे राजानो विगतज्वरा ।

[(L 1) D4 G2 योसौ वीतक्रमो यावद् — (L 2) D4 T1 श्रेष्ठवान्; G3-5 श्रेष्ठवाग् D4 बुद्धिमत्सु च; T1 कुरुपुगव']

5 a) Ñ1 3 दृष्ट्वा; S बुद्धा (for श्रुत्वा) — b) K2 Ñ2 3 V1 B D प्रशांतान्पांडुनंदनान् (D5 राज्ञ पांडो सुतांस्तदा), Ñ1 श्रुत्वा पांडुसुतांश्च तान्; S तत्र तान्वृ(T1 M °नृ)पमेक्षणान् — cd) V1 °पद्यत (for °जायत) S पांडवान्मनुजेंद्रास्ते समपद्यन्त विस्मिता

6 a) K3 ससुता हि; T2 G3-6 मा सपुत्रा T1 G1 M2 3 पतिता; T2 G3-6 हि सदा; M6-8 घातिता (for हि पुरा) — b) Ñ1 युता; B5 m मता; B6 Da1 D4 शुभा (for श्रुता) — After 6ab, S ins

1939* सर्वभूमिपतीनां च राष्ट्राणां च यशस्विनाम् ।

— c) Ś1 K1 पुनर्जातानिव स्मेरा ; K0 4 °जाता इति स्मैनां (K4 °तां); K2 Ñ2 B D °जातामि(Dn3 °नि)व च तां (B2 3 m तान्); Ñ1 °जातामिव स्मैनां; Ñ3 V1 °जातानिव च तान् — d) Ś1 K1 तेमन्यन्सर्वपार्थिवा ; K2 Ñ2 3 B D तेमन्यत (D5 मन्यत ते) नराधिपा ; V1 ते त्वमन्यत पार्थिवा

7 a) K3 N2 V1 B D धिग(D5 धिग्धिक्)कुर्वन्, K4 Ñ1 धिक्कुर्वंश्च; S व्य(G3 अ; M6-8 वि)निंदश्च K0 4 T1 M तथा V1 अन्योन्य (for भीष्म) — c) K3 ते कर्मणा नृश°; N2 B Da Dn D1 3 4 कर्मणातिनृश° — d) Here and below Ś1 K1 (mostly) प्ररोचन° — After 7, K4 D4 (both suppl fol) S ins a passage given in App I (No 103)

8 Before 8, D4 S ins वैश° (D4 cont उवाच) — a) S तत स्वयवरे वृत्ते — b) T1 G1 3 5 6 हि; T2 G2, 4 M6-8 ह (for ते). — d) V1 ब्राह्मणान् (for पाण्डवान्) D1 च तान्; T2 G3-4 हि तान् — After 8 (i e before 9), Ñ1 D5 ins वैश° उ°

10 a) G1 M6-8 तथा रणे (for विनि°) K4 धृतो; G2 3 4 (before corr) [ऽ]पि त — c) K4 ततो; D2 त तद्; S अथ (for त तु) Ñ2 3 V1 B1 Dn2 n3 D1 [ऽ]व्रीडो; T G राजा; M (except M8) राजन् ❀Nil अव्रीड इति छेद' । व्रीडन्नित्येव पाठ । अन्यथा मन्दमन्द मित्यस्यानुपपत्ति ।❀ — d) G2 अथ (for इव) K4 इद वचनमब्रवीत् — After 10, T G3-4 ins

1940* विवक्षुप्यन्मुखो राजा दूयमानेन चेतसा ।

11 a) Ś1 K (except K3) यदि विप्रो नाभविष्यत् D1 corrupt — b) Ś1 K (except K2) नावेत्स्यद्द्रौपदीम् असौ (K0 4 स्वय; K3 अय); Ñ1 3 S न च विंदेत द्रौपदीं (G2-4 न विंदेद्द्रुपदात्मजा). — c) T G राजा (for राजन्)

12 S transp 12ab and 12cd — a) K0 3.4 हि; K2 N V1 B Dn D1 3 4 G3 5 6 च (for तु) T G1 3 4 M दैवमेव पर मन्ये — b) K (except K1) Ñ1 3 V1 च; G2 हि (for तु) Ñ2 B D T2 G5 6 चाप्यनर्थक (for तु निर°) — c) K2 Ñ2 3 V1 B D (except D5) M6-8 धिगस्तु T2 G3 4 पौरुष मम; G1 5 6 M8 पौरुष त(G5 य)था; M6-8 चास्मपौरुष्य — d) K2 Ñ2 B D G4 ध्रियते यत्र पांडवा ; K4 यद्वि जीवति पां°; Ñ1 3 V1 यद्ध्रियते हि (Ñ3 ह) पां°; T2 G3 4 बुद्धिं नीतिं च मातुल, M6-8 यज्जीवतीह पां° Cd cites धरति (as in text) ❀Arj धरत (sic) इति पाठे प्रसिद्ध एवार्थे ।❀ — After 12, T2 G3-4 ins

1941* चक्षुषा चक्षूपि न पार्थो राज्ञां च द्रुपदात्मजाम् ।
उद्वाह्य राज्ञां सैन्यंस्तु पादं वाम पृथासुते ।
विमुक्ता कथमेतेन जतुवेश्मदर्यिर्भुजा ।
अस्माक पौरुष सर्वं बुद्धिश्चापि गता कुत ।
वय हता मातुलाथ विश्वस्य च पुरोचनम् ।
अदग्ध्वा पाण्डवान्दग्ध्वा स्वय दग्धो हुताशने ।
मत्तो मातुल मन्येऽह पाण्डवा बुद्धिमत्तरा ।

धिगस्तपौरुषं तात यद्वर्धन्तीह पाण्डवाः ॥ १२
एवं संभाषमाणास्ते निन्दन्तश्च पुरोचनम् ।
विविशुर्हास्तिनपुरं दीना विगतचेतसः ॥ १३
त्रस्ता विगतसंकल्पा दृष्ट्वा पार्थान्महौजसः ।
मुक्तान्हव्यवहाच्चैनान्संयुक्तान्द्रुपदेन च ॥ १४
धृष्टद्युम्नं च संचिन्त्य तथैव च शिखण्डिनम् ।
द्रुपदस्यात्मजांश्चान्यान्सर्वयुद्धविशारदान् ॥ १५
विदुरस्त्वथ ताञ्श्रुत्वा द्रौपद्या पाण्डवान्वृतान् ।
व्रीडितान्धार्तराष्ट्रांश्च भग्नदर्पानुपागतान् ॥ १६
ततः प्रीतमनाः क्षत्ता धृतराष्ट्रं विशां पते ।
उवाच दिष्ट्या कुरवो वर्धन्त इति विस्मितः ॥ १७
वैचित्रवीर्यस्तु नृपो निशम्य विदुरस्य तत् ।
अब्रवीत्परमप्रीतो दिष्ट्या दिष्ट्येति भारत ॥ १८
मन्यते हि वृतं पुत्रं ज्येष्ठं द्रुपदकन्यया ।
दुर्योधनमविज्ञानात्प्रज्ञाचक्षुर्नरेश्वरः ॥ १९
अथ त्वाज्ञापयामास द्रौपद्या भूषणं बहु ।
आनीयतां वै कृष्णेति पुत्रं दुर्योधनं तदा ॥ २०
अथास्य पश्चाद्विदुर आचख्यौ पाण्डवान्वृतान् ।
सर्वान्कुशलिनो वीरान्पूजितान्द्रुपदेन च ।
तेषां संबन्धिनश्चान्यान्बहून्बलसमन्वितान् ॥ २१

C. 1 7335
B. 1 200. 22
K. 1 219. 25

तेषां नास्ति भयं मृत्योर्मुक्तानां जतुवेश्मनः ।

13 G2 om 13ᶜ–14ᵇ — ᵃ) Da च (for ते) — ᵇ) Ś1 K Ñ1 8 V1 निंदमाना॰ (K2 निंदतं च); D1 निंदिते च; T1 निंदतस्त — After 13ᵃᵇ, T2 G3.4 ins

1942* पञ्चपुत्रां किरातीं च विदुरं च महामतिम् ।

— ᵉ) Most S MSS हस्तिनपुर — ᵈ) K4 °चेतना°

14 Ś1 K1 G2 om 14ᵃᵇ (cf. v 1. 13) — ᵃ) G1 8 M2 त्रस्तान्विगतसंकल्पान् — ᵇ) Ko 3 4 Ñ1 D2 श्रुत्वा (for दृष्ट्वा) — ᶜ) Ko 3.4 T1 G1.5 6 M मुक्तान्वै (T1 G1 5 6 M विमुक्तान्) हव्यवाहाच्च, K2 Ñ2 3 V1 B D मुक्तान्हव्यभुजश्चैव (Ñ3 °श्चैतान्), Ñ1 मुक्तान्हव्यवहो ह्येनान्; T2 G2–4 विमुक्तान्महतो वह्नेः — ᵈ) M6–8 हृ (for च)

15 ᵃ) B (except B1) D2 Dn1.n2 D1 2 G1 तु (for च) — ᶜ) T2 G2–4 om च K2 चैव; Da चासन्; M3 सर्वान् (for चान्यान्) — ᵈ) D2 5 T1 G1 5 6 सर्वान्युद्ध°; T2 G2–4 तथा युद्धि° — After 15, T2 G2–4 ins

1943* सुखानि धार्तराष्ट्राणां दृष्ट्वा क्षत्ता मुदान्वित ।
विकसद्वक्त्रमुखाम्भोज पद्म दृष्ट्वेव भास्करम् ।

16 ᵃᵇ) Ko 3 4 D1.5 G5 6 तां, Ñ1 G1 M तत् (for तान्) K2 Ñ2 B D (except D5) द्रौपदीं पांडवैर्वृता T2 G2–4 द्रौपद्या संवृतान्पार्थाञ्श्रुत्वाथ विदुरो मुदा (G2 °रस्तदा) — After 16ᵃᵇ, K1 ins

1944* सर्वांस्तु बलिनो वीरान्संयुक्तान्द्रुपदेन च ।

— ᵈ) Ñ1 भग्नगर्भान्; G6 हीनदर्पान्

17 ᵃ) D3 4 श्रुत्वा (for क्षत्ता) — ᵇ) T2 G2–4 विशां पतिं. — ᶜ) S उवाच कुरवो (G1 कुपितो) दिष्ट्या — ᵈ) T2 G2–4 वर्धन्ते भुवि विश्रुता° — After 17, T2 G2–4 (which om 18ᵃᵇ) ins

1945* सर्वापद्भ्यो विमुक्ताश्च विमुक्ता राजसगरात् ।
कृष्णया संवृताश्चैव वीरलक्ष्म्या तथैव च ।
वैशंपायन ।
विदुरोक्त वच श्रुत्वा सामान्यात्कौरवा इति ।
उल्लास स हर्षेण संतोषभरितो नृप ।
प्रहर्षहरितो राजा स्तम्भीभूत इव क्षणम् ।

18 T2 G2–4 om 18ᵃᵇ. — ᵃ) K2 वचो, T1 G1 5 6 M तदा (for नृपो) — ᶜ) T2 G2–4 तथाब्रवीत्सुसंप्रीतो — ᵈ) Ś1 K1 पार्थिव°, S कौरव

19 ᵃ) K2 सु; Ñ2 3 V1 B Da2 Dn2 D2 4 स; Da1 Dn1 n2 D1 स (for हि) T2 G2–4 मन्यमानो (for °ते हि) — ᶜ) G1 °धनमविज्ञाय — ᵈ) K3 जनेश्वर.; B1 नराधिप

20 ᵃ) Ko 3 4 T2 G2–4 आज्ञापयामास तदा — ᵇ) Ś1 K1 भूषणं परं, T2 G2–4 भूषणादिक — After 20ᵃᵇ, T2 G2–4 ins

1946* पुत्राणां च तथा सर्वं विचित्राभरणं परम् ।

— ᶜ) T2 G2–4 सा (for वै) — ᵈ) Ś1 K (except K2) B5 D5 M3 पुत्रो दुर्योधनस्तथा (Ko 3 4 °नो मम); T2 G2–4 पुत्रा दुर्योधनादय

21 ᵃ) T2 G2–4 अथ स Ko विदुर पश्चात् (by transp) D1 अथ पश्चाद्विदुरश्च — ᵇ) T2 G2–4 आचख्यावधिकासजं — After 21ᵃᵇ, T2 G2–4 ins

1947* पुत्राभिवृद्धिसंतोषश्रवणानन्दनिर्भरम् ।
कौरवा इति सामान्यात्स मन्येथास्त्ववात्मजान् ।
वर्धिता इति महाक्यादृर्धिता पाण्डुनन्दना ।
कृष्णया संवृता पार्था विमुक्ता राजसगरात् ।

— ᶜ) T2 G2.4 दिष्ट्या, G3 पार्थान् (for सर्वान्) Ś1 K1 तु बलिनो. S (except G2) राजन् (for वीरान्) — ᵈ) Ś1 K (except K2) संयुक्तान्; Da संगतान् (for पूजितान्)

C. 1. 7357
B. 1. 200. 23
K. 1. 219. 27

धृतराष्ट्र उवाच ।
यथैव पाण्डोः पुत्रास्ते तथैवाभ्यधिका मम ।
सेयमभ्यधिका प्रीतिर्वृद्धिर्विदुर मे मता ।
यच्चे कुशलिनो वीरा मित्रवन्तश्च पाण्डवाः ॥ २२
को हि द्रुपदमासाद्य मित्रं क्षत्तः सबान्धवम् ।
न बुभूषेद्भवेनार्थी गतश्रीरपि पार्थिवः ॥ २३

वैशंपायन उवाच ।
तं तथा भाषमाणं तु विदुरः प्रत्यभाषत ।
नित्यं भवतु ते बुद्धिरेषा राजञ्शतं समाः ॥ २४
ततो दुर्योधनश्चैव राधेयश्च विशां पते ।
धृतराष्ट्रमुपागम्य वचोऽब्रूतामिदं तदा ॥ २५
संनिधौ विदुरस्य त्वां वक्तुं नृप न शक्नुवः ।

Ko 2.3 Ñ2 3 B D (except D4) हृ; Ñ1 हे. — After 21cd, D4 (marg sec m.) ins.

1948* सकर्पणेन कृष्णेन सत्कृतान्पाण्डुनन्दनान् ।

D4 (marg sec. m) cont. S ins after 21cd.

1949* धृतच्छ्रुत्वा तु वचन विदुरस्य नराधिप ।
आकारच्छादनार्थं तु दिष्ट्या दिष्ट्येति चाब्रवीत् ।
एवं विदुर भद्रं ते यदि जीवन्ति पाण्डवा ।
साध्वाचारा तथा कुन्ती संबन्धो द्रुपदेन च ।
अन्ववाये वसोर्जात प्रवरो मात्स्यके कुले । [5]
वृत्तविद्यातपोवृद्ध पार्थिवानां धुरंधर ।
पुत्राश्चास्य तथा पौत्रा सर्वे सुचरितव्रता ।

[Before line 3, D4 ins धृतराष्ट्र उ°. — After line 3, T3 G2-4 ins

1950* न ममौ मे तनौ प्रीतिस्त्वद्वाक्यामृतसभवा ।
आलिङ्गस्वेति मां क्षत्त पुन पुनरभाषत ।
दुर्भावगोपनार्थाय बाहू विस्तार्य दूरत ।
एह्येहि विदुर प्राज्ञ मामालिङ्गितुमर्हसि ।
इत्युक्त्वाकृष्य विदुर ज्ञात्वान्तर्भावमात्मन ।
आलिलिङ्गे दृढं दोर्भ्यां निरुच्छ्वास दुरात्मवान् ।

— (L. 5) D4 M2.3 प्रवहौ; G6 °कुष्टो (for °वरो) — (L 6) D4 G2.4 M2.3 च संमत (for धुर°)]
— e) S अन्ये (for अन्यान्) — f) Da घन° (for बल°) S यद्दव सुमहायला — After 21, N ins.

1951* समागतान्पाण्डवेयैस्तस्मिन्नेव स्वयवरे ।
यथा समुद्रोऽतिमहान्यथा च हिमवान्गिरि ।
ख्यातौ रत्नाकरौ तद्वन्महाभारतमुच्यते । [25]
नाप्रीतिरुपपद्येत यथा प्राप्य त्रिविष्टपम् ।
पुण्यं तथेदमाख्यानं श्रुत्वा प्रीतिर्भवत्युत ।
स्त्रियश्च शूद्रा शृण्युः पुरस्कृत्य द्विजोत्तमान् ।
प्राप्नुवन्ति यथोक्तानि फलान्यविकलानि च ।
कुलस्य वृद्धये राजन्नायुषे विजयाय च । [30]
शृणु कीर्तयतः कृत्स्नमितिहासं पुरातनम् ।
यश्चेदं श्रावयेच्छ्राद्धे ब्राह्मणान्पादमन्ततः ।
अक्षय्यमन्नपानं तत्पितॄंस्तस्योपतिष्ठति ।
य इदं श्रावयेद्विद्वान्यश्चेदं शृणुयान्नर ।
स ब्रह्मण स्थानमेत्य प्राप्नुयाद्देवतुल्यताम् । [35]
प्रातर्यदेन कुरुते इन्द्रियैर्ब्राह्मणश्चरन् ।
महाभारतमाख्याय पश्चात्सन्ध्यां प्रमुच्यते ।
रात्र्या यदेन कुरुते इन्द्रियैर्ब्राह्मणश्चरन् ।
महाभारतमाख्याय पूर्वां सन्ध्यां प्रमुच्यते ।
भारतानां महज्जन्म महाभारतमुच्यते । [40]
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ।
त्रिभिर्वर्षैर्महाभाग कृष्णद्वैपायनोऽब्रवीत् ।
नित्योत्थितः सदा योगी महाभारतमादित ।

33

After 1 56 31, N (Ś1 missing, for K0–4 see footnotes) ins

भरतानां यतश्चायमितिहासो महाद्भुत ।
महतो ह्येनसो मर्त्यान्मोचयेदनुकीर्तित ।
त्रिभिर्वर्षैर्लब्धकाम कृष्णद्वैपायनो मुनि ।
नित्योत्थित शुचि शक्तो महाभारतमादित ।
तपो नियममास्थाय कृतमेतन्महर्षिणा । [5]
तस्मान्नियमसंयुक्तै श्रोतव्यं ब्राह्मणैरिदम् ।
कृष्णप्रोक्तामिमां पुण्यां भारतीमुत्तमां कथाम् ।
श्रावयिष्यन्ति ये विप्रा ये च श्रोष्यन्ति मानवा ।
सर्वथा वर्तमाना वै न ते शोच्या कृताकृतै ।

32

G1 2 read line 3 after line 6, M, after 11 — (L. 6) D3 T G2.4 5 शूद्राश्च द्विजसंश्रितान् — (L. 9) D3 T2 G1–6 भूयो वा य° Some MSS transp गच्छेत् and स Lines 12, 17–18, 22–23 occur (with v l) in passage No 1 of this App — (L. 13) D3 T1 इह मन्त्र पदन् ज्ञात्वा, T2 G3 4.5 इह मन्त्राणि ज्ञात्वा, M इह मन्त्र वर्ं ज्ञेय (M3 इम मत्र परं ज्ञात्वा) — (L. 17) G4–6 देशानां (for दर्शनं) D3 T1 G2.6 कीर्तनं — (L. 19) G1.2 6 पुण्यानां (for दिव्यानां) — (L. 20) D3 G1–3 °यमप्यतिमां°. — (L 22) T2 G4–6 रथाश्वेभनरेंद्राणां, G3 रथाश्वानां नरेंद्राणां T1 G1 कल्पनां युद्ध° — With lines 24–25, 31–32, 40–41, 42–43 cf 1 56 27, 29, 31–32 — T1 G2 M om lines 28–29 — Lines 36–39 = (var) 190*

नरेण धर्मकामेन सर्वं श्रोतव्य इत्यपि ।
निखिलेनेतिहासोऽयं ततः सिद्धिमवाप्नुयात् ।
न तां स्वर्गगतिं प्राप्य तुष्टिं प्राप्नोति मानव ।
यां श्रुत्वैव महापुण्यमितिहासमुपाश्नुते ।
शृण्वञ्श्राद्धं पुण्यशील श्रावयंश्चेदमद्भुतम् ।
नर फलमवाप्नोति राजसूयाश्वमेधयो । [15]
यथा समुद्रो भगवान्यथा मेरुर्महागिरि ।
उभौ ख्यातौ रत्ननिधी तथा भारतमुच्यते ।
इद हि वेदै समित पवित्रमपि चोत्तमम् ।
श्रव्य श्रुतिसुख चैव पावन शीलवर्धनम् ।
पारिक्षित कथा दिव्या पुण्याय विजयाय च । [20]
कथ्यमानां मया कृत्स्नां शृणु हर्षकरीमिमाम् ।

34

After 1 56 33, K4 ins

दातुं भोक्तुं तथा श्रोतुं प्रहर्तुमरिभि' सह ।
स किं जानाति पुरुषो भारत येन न श्रुतम् ।
य इद भारत राजन्वाचकाय प्रयच्छति ।
तेन सर्वा मही दत्ता भवेत्सागरमेखला ।
पर्वाण्यष्टादशेमानि व्यासेन कथितानि वै । [5]
यथैकमपि यो दद्यात्तेन सर्वं कृत भवेत् ।

35

After 1. 57 57, D4 (suppl fol, *see m*) T G ins

समयं चिन्तयित्वा वा ज्ञात्वा प्रोवाच शक्तिज' ।
क कर्णधारो नौर्येन नीयते ब्रूहि भामिनि ।
मत्स्यगन्धा ।
अनपत्यस्य दाशस्य सुता तत्प्रियकाम्यया ।
सहस्रजनसपूर्णा नौर्मया वाह्यते द्विज ।
पराशर. ।
शोभन वासवि शुभे किं चिरायसि वाह्यताम् । [5]
कलश भविता भद्रे सहस्रार्धन समितम् ।
अह शेषो भविष्यामि नीयतामचिरेण नौ. ।
वैशपायन. ।
मत्स्यगन्धा तथेत्युक्त्वा नाव वाहयती जले ।
वीक्षमाण मुनिं दृष्ट्वा प्रोवाचेद वचस्तदा ।
मत्स्यगन्धा ।
मत्स्यगन्धेति मामाहुर्दाशराजसुतां जनाः । [10]
जन्म शोकाभितप्ताया कथ ज्ञास्यसि कथ्यताम् ।
पराशरः ।
दिव्यज्ञानेन दृष्ट हि दृष्टमात्रेण ते वपु ।
प्रणयग्रहणार्थाय वक्ष्ये वासवि तच्छृणु ।
बर्हिषद इति ख्याता. पितर सोमपास्तु ते ।
तेषां त्व मानसी कन्या अच्छोदा नाम विश्रुता । [15]
अच्छोद नाम तद्दिव्य सरो यस्मात्समुत्थितम् ।
त्वया न दृष्टपूर्वास्तु पितरस्ते कदाचन ।
सभूता मनसा तेषा पितॄंस्त्वाश्चाभिजानती ।
सा त्वन्य पितरं वव्रे स्वानतिक्रम्य तान्पितॄन् ।
नाम्ना वसुरिति ख्यातं मनुपुत्र महीश्वरम् । [20]
अद्रिकाप्सरसा युक्त विमाने दिवि विष्ठितम् ।
सा तेन व्यभिचारेण मनसा कामचारिणी ।
पितर प्रार्थयित्वान्य योगाद्भ्रष्टा पपात सा ।
अपश्यत्पतमाना सा विमानत्रयमन्तिकात् ।
त्रसरेणुप्रमाणांस्तांस्तत्रापश्यत्स्वकान्पितॄन् । [25]
सुसूक्ष्मानपरिव्यक्तानग्नीनग्निष्विवाहितान् ।
त्रातेति तानुवाचार्ता पतन्ती सा ह्यधोमुखी ।
तैरुक्ता सा तु मा भैषीस्तेन सा सुस्थिता दिवि ।
ततः प्रसादयामास स्वान्पितॄन्दीनया गिरा ।
तामूचु पितर कन्यां भ्रष्टैश्वर्यां व्यतिक्रमात् । [30]

33

K0-4 have a variant version, differing from the above mainly as regards sequence, which in those MSS is as follows 1 56 31, lines 3-11 of the passage under reference, then 1 56 27, 25[cd], 26[ab] (both latter repetitions with v 1), then 491*, and 1 56 28-30, 31 (repetition), and finally lines 1-2, 12-15, 18-21 of the passage under reference The variant readings, being unimportant, may be ignored — Ś1 om lines 3-11, Ś2 V1 B Da D1.5 om 3-4 (cf. 1. 56 32) — With lines 16-18, cf 1 56. 27, 15[ab]. — Dn ins after line 19 D1 2 4, after 1 56 33 K4, after line 2 of passage No 34 below

य इद भारत राजन्वाचकाय प्रयच्छति ।
तेन सर्वा मही दत्ता भवेत्सागरमेखला ।

35

N B The passage occurs in T1 also, which was ignored, through oversight, in the footnotes — After line 16, G1 2 4 5 repeat (with v 1.) 1 57 21. — (L 42) D4 G1.2 4 5 महाराज्याभिषिक्तस्य (for the prior half) — (L 43) D4 G1 2 विमर्दीयं समीपतः — (L. 53) T2 G1-6 विमानाद्दृष्ट'

अष्टैश्वर्या स्वदोषेण पतसि त्व शुचिस्मिते ।
यैरारभन्ते कर्माणि शरीरैरिह देवता ।
तैरेव तत्कर्मफल प्राप्नुवन्ति स्म देवता ।
मनुष्यास्त्वन्यदेहेन शुभाशुभमिति स्थिति ।
सद्य फलन्ति कर्माणि देवत्वे प्रेत्य मानुषे । [35]
तस्मात्त्व पतसे पुत्रि प्रेत्य त्व प्राप्स्यसे फलम् ।
पितृहीना तु कन्या त्वं वसोर्हि त्व समागता ।
मत्स्ययोनौ समुत्पन्ना सुता राज्ञो भविष्यसि ।
अद्रिका मत्स्यरूपाभूद्ब्रह्मायमुनसगमे ।
पराशरस्य दायाद त्व पुत्र जनयिष्यसि । [40]
यो वेदमेक ब्रह्मर्षिश्चतुर्धा विभजिष्यति ।
महाभिषक्सुतस्यैव शतनो कीर्तिवर्धनम् ।
ज्येष्ठ चित्राङ्गद वीरं चित्रवीर्यं च विश्रुतम् ।
एतानुत्पाद्य पुत्रांस्त्व पुनरेवागमिष्यसि ।
व्यतिक्रमात्पितृणां च प्राप्स्यसे जन्म कुत्सितम् । [45]
अस्यैव राज्ञस्त्व कन्या ह्यद्रिकायां भविष्यसि ।
अष्टाविंशे भवित्री त्व द्वापरे मत्स्ययोनिजा ।
एवमुक्ता पुरा तैस्त्व जाता सत्यवती शुभा ।
अद्रिकेत्यभिविख्याता ब्रह्मशापाद्वराप्सराः ।
मीनभावमनुप्राप्ता त्वां जनित्वा गता दिवम् । [50]
तस्या जातासि सा कन्या राज्ञो वीर्येण चैव हि ।
तस्माद्वासवि भद्र ते याचे वशकरं सुतम् ।

वैशपायन ।

विस्मयाविष्टसर्वाङ्गी जातिस्मरणतां गता ।

36

After 1 57 68^{ab}, D_5 T_2 G (except G_3) ins

ततो रम्ये वनोद्देशे दिव्यास्तरणसवृतम् ।
वीरासनमुपास्थाय योगी ध्यानपरोऽभवत् ।
श्वेतपट्टगृहे रम्ये पर्यङ्के सोत्तरच्छदे ।
तूष्णींभूतां तदा कन्या ज्वलन्तीं योगतेजसा ।
दृष्ट्वा तां तु समाधाय विचार्य च पुनः पुन । [5]
स चिन्तयामास मुनिः किं कृत सुकृत भवेत् ।
शिष्टानां तु समाचारः शिष्टाचार इति स्मृत ।
श्रुतिस्मृतिविदो विप्रा धर्मज्ञा ज्ञानिनः स्मृता ।
धर्मज्ञैर्विहितो धर्मः श्रौत स्मार्तो द्विधा द्विजे ।
दानाग्निहोत्रमिज्या च श्रौतस्यैतद्धि लक्षणम् । [10]
स्मार्तो वर्णाश्रमाचारो यमैश्च नियमैर्युत ।
धर्मे तु धारणे धातुर्महत्त्वे चापि पठ्यते ।
तत्रेष्टफलभाग्धर्म आचार्यैरुपदिश्यते ।
अनिष्टफलभाक्चेति तैरधर्मो भविष्यति ।
तस्मादिष्टफलार्थाय धर्ममेव समाचरेत् । [15]
ब्राह्मो दैवस्तथैवार्ष प्राजापत्यश्च धार्मिकः ।
विवाहा ब्राह्मणाना तु गान्धर्वो नैव धार्मिक ।
त्रिवर्णेतरजातीना गान्धर्वासुरराक्षसाः ।
पैशाचो नैव कर्तव्यः पिशाचश्चाष्टमोऽधमः ।
सामर्षां व्यङ्गिता कन्या मातु स्वकुलजां तथा । [20]
वृद्धा प्रव्राजितां वन्ध्यां पतितां च रजस्वलाम् ।
अपस्मारकुले जातां पिङ्गला कुष्ठिनीं व्रणीम् ।
न चाज्ञाता स्त्रिय गच्छेदिति धर्मानुशासनम् ।
पिता पितामहो भ्राता माता मातुल एव च ।
उपाध्यायर्त्विजश्चैव कन्यादाने प्रभूत्तमाः । [25]
एतैर्दत्तां निषेवेत नादत्तामाददीत च ।
इत्येव ऋषय प्राहुर्विवाहे धर्मवित्तमाः ।
अस्या नास्ति पिता भ्राता माता मातुल एव च ।
गान्धर्वेण विवाहेन न स्पृशामि यदृच्छया ।
क्रियाहीन तु गान्धर्व न कर्तव्यमनापदि । [30]
यद्यस्या जायते पुत्रो वेदव्यासो भवेदपि ।
क्रियाहीनः कथ विप्रो भवेदपि उदारधी ।
एव चिन्तयतो भाव महर्षेर्भावितात्मन ।
ज्ञात्वा चैवाभ्यवर्तन्त पितरो बर्हिषस्तदा ।
तस्मिन्क्षणे ब्रह्मपुत्रो वसिष्ठोऽपि समेयिवान् । [35]
पूर्वं स्वागतमित्युक्त्वा वसिष्ठः प्रत्यभाषत ।

पितृगणाः ।

अस्माक मानसीं कन्यामस्मच्छापेन वासवीम् ।
यदि चेच्छसि पुत्रार्थं कन्यां गृह्णीष्व माचिरम् ।

वैशपायन ।

पितृणां वचन श्रुत्वा वसिष्ठ प्रत्युवाच ह ।
महर्षीणां वच सत्य पुराणेऽपि मया श्रुतम् । [40]
पराशरो ब्रह्मचारी प्रजार्थी मम वशधृत् ।
एव सभाषमाणे तु वसिष्ठे पितृभिः सह ।
ऋषयोऽभ्यागमस्तत्र नैमिषारण्यवासिन ।
विवाह द्रष्टुमिच्छन्त शक्तिपुत्रस्य धीमतः ।
अरुन्धती महाभागा अदृश्यन्त्या सहैव सा । [45]

36

(L. 2) T_2 $G_{1, 3, 4, 5}$ तनो (for योगी) — (L 6) G_2 चिंतयामास तेनम्बी निवाद्य क्नो मनेव — (L 8) G_5 °विदो विप्रो ज्ञानादमेव उच्यते — (L 20) $G_{3, 4, 5}$ वक्रिनां (for व्यङ्गितां) — (L 36) MSS वसिष्ठ (for °ष्ठ°) — (L. 61) G_1 स घृतोयो, G_2 स प्रयातो, $G_{4, 5}$ संघृतोसी (for सप्रतोदो) — (L 63) $G_{1, 2, 4, 5}$ सगुच्चमाम् — (L 73) G_2 वर्धिता, G_4 पाल्पिता (for धीमता) — (L 79) $G_{1, 4, 5}$ निष्कृतिनो — MSS wrongly ins वैशपायन *after* line 84, instead of inserting it *before* the line (as in text)

विश्वकर्मकृतां दिव्यां पर्णशाला प्रविश्य सा ।
वैवाहिकांस्तु संभारान्सकल्प्य च यथाक्रमम् ।
अरुन्धती सत्यवतीं वधूं संगृह्य पाणिना ।
भद्रासने प्रतिष्ठाप्य इन्द्राणीं समकारयत् ।
आपूर्यमाणपक्षे तु वैशाख्या सोमदैवते । [50]
शुभग्रहे त्रयोदश्या मुहूर्ते मैत्र आगते ।
विवाहकाल इत्युक्त्वा वसिष्ठो मुनिभि. सह ।
यमुनाद्वीपमासाद्य शिष्यैश्च मुनिपङ्क्तिभि. ।
स्थण्डिल चतुरस्र च गोमयेनोपलिप्य च ।
अक्षतै फलपुष्पैश्च स्वस्तिकैरार्द्रपल्लवैः । [55]
जलपूर्णघटैश्चैव सर्वत परिशोभितम् ।
तस्य मध्ये प्रतिष्ठाप्य वृस्या मुनिवर तदा ।
सिद्धार्थयवकल्कैश्च स्नात सर्वौषधैरपि ।
कृत्वार्जुनानि वस्त्राणि परिधाप्य महामुनिम् ।
वाचयित्वा तु पुण्याहमक्षतैस्तु समर्चित. । [60]
गन्धानुलिप्तः स्रग्वी च सप्रतोदो वधूगृहे ।
अपदातिस्ततो गत्वा वधूज्ञातिभिरर्चित. ।
स्नातामहतवसनां गन्धलिप्तां स्रगुज्ज्वलाम् ।
वधूं मङ्गलसंयुक्तामिषुहस्ता समीक्ष्य च ।
उवाच वचन काले कालज्ञः सर्वधर्मवित् । [65]
प्रतिग्रहो दातृवश. श्रुतमेवं मया पुरा ।
यथा वक्ष्यन्ति पितरस्तत्करिष्यामहे वयम् ।

वैशपायन ।

तद्धर्मिष्ठ यशस्यं च वचन सत्यवादिन. ।
श्रुत्वा तु पितरः सर्वे नि सङ्गा निष्परिग्रहा ।
वसुं परमधर्मिष्ठमाहूयेद वचोऽब्रुवन् । [70]
मत्स्ययोनौ समुत्पन्ना तव पुत्री विशेषत ।
पराशराय मुनये दातुमर्हसि धर्मत. ।

वसु ।

सत्यं मम सुता सा हि दाशराजेन धीमता ।
अह प्रभु प्रदाने तु प्रजापाल प्रजार्थिनाम् ।

पितर ।

निराशिषो वय सर्वे नि सङ्गा निष्परिग्रहाः । [75]
कन्यादानेन सम्बन्धो दक्षिणाबन्ध उच्यते ।
कर्मभूमिस्तु मानुष्य भोगभूमिस्त्रिविष्टपम् ।
इह पुण्यकृतो यान्ति स्वर्गलोक न सशय ।
इह लोके दुष्कृतिनो नरक यान्ति निर्घृणा ।
दक्षिणाबन्ध इत्युक्ते उभे सुकृतदुष्कृते । [80]
दक्षिणाबन्धसयुक्ता योगिन प्रपतन्ति ते ।
तस्मान्नो मानसीं कन्यां योगाद्भ्रष्टा विशा पते ।
सुतात्व तव संप्राप्ता सतीं भिक्षां ददस्व वै ।

वैशपायनः ।

इत्युक्त्वा पितर. सर्वे क्षणादन्तर्हितास्तदा ।
याज्ञवल्क्य समाहूय विवाहाचार्यमित्युत । [85]
वसु चापि समाहूय वसिष्ठो मुनिभि. सह ।
विवाह कारयामास श्रुतिदृष्टेन कर्मणा ।

वसु ।

पराशर महाप्राज्ञ तव दास्याम्यह सुताम् ।
प्रतीच्छ चैना भद्र ते पाणिं गृह्णीष्व पाणिना ।

वैशपायन ।

वसोस्तु वचन श्रुत्वा याज्ञवल्क्यमते स्थित । [90]
कृतकौतुकमङ्गल्य पाणिना पाणिमस्पृशत् ।
प्रभूताज्येन हविषा हुत्वा मन्त्रैर्हुताशनम् ।
त्रिरग्नि तु परिक्रम्य समभ्यर्च्य हुताशनम् ।
महर्षीन्याज्ञवल्क्यादीन्दक्षिणाभिः प्रतर्प्य च ।
लब्धानुज्ञोऽभिवाद्याशु प्रदक्षिणमथाकरोत् । [95]
पराशरे कृतोद्वाहे देवा सर्षिगणास्तदा ।
हृष्टा जग्मु क्षणादेव वेदव्यासो भवत्विति ।

37

After 1 57 69, D8 T (T1 contains only line 1) G ins

जातमात्र स ववृधे सप्तवर्षोऽभवत्तदा ।
ज्ञात्वाभिवाद्य पितर तस्थौ व्यास समाहित ।
स्वस्तीति वचनं चोक्त्वा ददौ कलशमुत्तमम् ।
गृहीत्वा कलश पार्श्वे तस्थौ व्यास समाहित. ।
ततो दाशभयात्पत्नी ज्ञात्वा कन्या बभूव सा । [5]
अभिवाद्य मुने पादौ पुत्र जग्राह पाणिना ।
स्पृष्टमात्रे तु निर्भर्त्स्य मातर वाक्यमब्रवीत् ।
मम पित्रा तु सस्पर्शान्मातस्त्वमभव शुचि ।
अद्य दाशसुता कन्या न स्पृशेर्मामनिन्दिते ।

वैशंपायन ।

व्यासस्य वचन श्रुत्वा बाष्पपूर्णमुखी तदा । [10]
मनुष्यभावात्सा चोपित्पतिता मुनिपादयो ।
महाप्रसादो भगवान्पुत्र प्रोवाच धर्मवित् ।
मा त्वमेवविध कार्पीर्नैतद्धर्म्यं मत हि न ।
न दूष्यौ मातापितरौ तथा पूर्वोपकारिणौ ।
धारणाद्गु सस्रष्टनात्तयोर्माता गरीयसी । [15]
बीजक्षेत्रसमायोगे सस्य जायेत लौकिकम् ।
जायते च सुतस्तद्वत्पुरुषस्त्रीसमागमे ।
मृगीणां पक्षिणा चैव अप्सराणा तथैव च ।
शूद्रयोन्यां च जायन्ते मुनयो वेदपारगा ।
ऋष्यशृङ्गो मृगीपुत्र कण्वो बर्हिसुतस्तथा । [20]
अगस्त्यश्च वसिष्ठश्च उर्वश्यां जनितावुभौ ।
सोमश्रवास्तु सर्प्यां तु अश्विनावश्विसम्भवौ ।
स्कन्द स्कन्नेन शुक्रेन जात शरवणे पुरा ।
एवमेव च देवानामृषीणां चैव सभव ।
लोकवादप्रवृत्तिर्हि न मीमांस्या बुधै सदा । [25]

वेदव्यास इति प्रोक्तः पुराणे च स्वयंभुवा ।
धर्मनेता महर्षीणां मनुष्याणां त्वमेव च ।
तस्मात्पुत्र न दूष्येत वासवी योगचारिणी ।
मयीत्ययं महाप्राज्ञ सस्नेहं वक्तुमर्हसि ।
प्रजाहितार्थं संभूतो विष्णोर्भागो महानृषिः । [30]
तस्मात्स्वमातरं स्नेहात्प्रब्रवीहि तपोधन ।

वैशंपायन ।

गुरोर्वचनमाज्ञाय व्यासः प्रीतोऽभवत्तदा ।
चिन्तयित्वा लोकवृत्तं मातुरङ्कमथाविशत् ।
पुत्रस्पर्शात्तु लोकेषु नान्यत्सुखमतीव हि ।
व्यासं कमलपत्राक्षं परिष्वज्याश्रुवर्तयत् । [35]
स्तन्यासारैः क्लिद्यमाना पुत्रमाघ्राय मूर्धनि ।

वासवी ।

पुत्रलाभात्परं लोके नास्तीह प्रसवार्थिनाम् ।
दुर्लभं चेति मन्येऽहं मया प्राप्तं महत्तपः ।
महता तपसा तात महायोगबलेन च ।
मया त्वं हि महाप्राज्ञ लब्धोऽमृतमिवामरैः । [40]
तस्मात्त्वं माम्पृपे पुत्र त्यक्तुं नार्हसि साम्प्रतम् ।

वैशंपायन ।

एवमुक्तस्ततः स्नेहाद्व्यासो मातरमब्रवीत् ।
त्वया स्पृष्टः परिष्वक्तो मूर्ध्नि चाघ्रायितो मुहुः ।
एतावन्मात्रया प्रीता भविष्येया नृपात्मजे ।

38

After 1. 57. 70, D_5 T_2 G ins

ततः कन्यामनुज्ञाप्य पुनः कन्या भवत्विति ।
पराशरोऽपि भगवान्पुत्रेण सहितो ययौ ।
गत्वाश्रमपदं पुण्यमदृश्यन्त्याः पराशरः ।
जातकर्मादिसंस्कारं कारयामास धर्मतः ।
कृतोपनयनो व्यासो याज्ञवल्क्येन भारत । [5]
वेदानधिजगे साङ्गानोंकारेण त्रिमात्रया ।
गुरवे दक्षिणां दत्त्वा तपः कर्तुं प्रचक्रमे ।

39

After 1. 57. 75, D_5 T_2 G ins

ततः सत्यवती हृष्टा जगाम स्वं निवेशनम् ।
तस्यास्तु योजनाद्गन्धमाजिघ्रन्ति नरा भुवि ।
दाशराजस्तु तद्गन्धमाजिघ्रन्प्रीतिमावहत् ।

दाशराज ।

त्वामाहुर्मत्स्यगन्धेति कथं बाले सुगन्धता ।
अपास्य मत्स्यगन्धत्वं केन दत्ता सुगन्धता । [5]

सत्यवती ।

शक्तेः पुत्रो महाप्राज्ञः पराशर इति श्रुतः ।
नावं वाहयमानाया मम दृष्ट्वा सुगर्हितम् ।
अपास्य मत्स्यगन्धत्वं योजनाद्गन्धतां ददौ ।
ऋषेः प्रसादं दृष्ट्वा तु जनाः प्रीतिमुपागमन् ।
एवं लब्धो मया गन्धो न रोषं कर्तुमर्हसि । [10]

वैशंपायन ।

दाशराजस्तु तद्वाक्यं प्रशशंस ननन्द च ।
एतत्पवित्रं पुण्यं च व्याससंभवमुत्तमम् ।
इतिहासमिमं श्रुत्वा प्रजावन्तो भवन्ति च ।

Here follows a colophon in all the above mentioned MSS except $G_{1.3}$

40

After 1. 58. 8[ab], $K_{0.4}$ ins

प्रनष्टमुद्धृतं राजन्यथा प्रोक्तं स्वयंभुवा ।
सर्वेषामेव वर्णानां प्रनष्टानां महीपते ।
ब्राह्मणा एव कुर्वन्ति नित्यमेव युगे युगे ।

41

After 1. 61. 83, $K_{3.4}$ $\tilde{N}_{1.2}$ V_1 B D (except D_5) ins

वैश्यापुत्रो युयुत्सुश्च धार्तराष्ट्रः शताधिकः ।

जनमेजय उवाच ।

ज्येष्ठानुज्येष्ठतां चैव नामधेयानि वा विभो ।
धृतराष्ट्रस्य पुत्राणामानुपूर्व्येण कीर्तय ।

वैशंपायन उवाच ।

दुर्योधनो युयुत्सुश्च राजन्दुःशासनस्तथा ।
दुःसहो दुःशलश्चैव दुर्मुखश्च तथापरः । [5]
विविंशतिर्विकर्णश्च जलसंधः सुलोचनः ।
विन्दानुविन्दौ दुर्धर्षः सुबाहुर्दुष्प्रधर्षणः ।
दुर्मर्षणो दुर्मुखश्च दुष्कर्णः कर्ण एव च ।
चित्रोपचित्रौ चित्राक्षश्चारुचित्राङ्गदश्च ह ।
दुर्मदो दुष्प्रहर्षश्च विवित्सुर्विकटः समः । [10]
ऊर्णनाभः सुनाभश्च तथा नन्दोपनन्दकौ ।
सेनापतिः सुषेणश्च कुण्डोदरमहोदरौ ।
चित्रबाहुश्चित्रवर्मा सुवर्मा दुर्विमोचनः ।
अयोबाहुर्महाबाहुश्चित्रचापसुकुण्डलौ ।
भीमवेगो भीमबलो बलाकी बलवर्धनः । [15]
उग्रायुधो भीमशरः कनकायुर्दृढायुधः ।
दृढवर्मा दृढक्षत्रः सोमकीर्तिरनूदरः ।
जरासंधो दृढसंधः सत्यसंधः सहस्रवाक् ।
उग्रश्रवा उग्रसेनः सेनानीर्दुष्पराजयः ।
अपराजितः पण्डितको विशालाक्षो दुराधरः । [20]
दृढहस्तः सुहस्तश्च वातवेगसुवर्चसौ ।

आदित्यकेतुर्बह्वाशी नागदन्तोग्रयायिनौ ।
कवची निषङ्गी पाशी दण्डधारो धनुर्ग्रहः ।
उग्रो भीमरथो वीरो वीरबाहुरलोलुपः ।
अभयो रौद्रकर्मा च तथा दृढरथश्च यः । [25]
अनाधृष्यः कुण्डभेदी विरावी दीर्घलोचनः ।
दीर्घबाहुर्महाबाहुर्व्यूढोरुः कनकध्वजः ।
कुण्डाशी विरजाश्चैव दुःशला च शताधिका ।
वैश्यापुत्रो युयुत्सुश्च धार्तराष्ट्रः शताधिकः ।
एतदेकशतं राजन्कन्या चैका प्रकीर्तिता । [30]
नामधेयानुपूर्व्या च ज्येष्ठानुज्येष्ठतां विदुः ।
सर्वे त्वतिरथाः शूराः सर्वे युद्धविशारदाः ।
सर्वे वेदविदश्चैव राजशास्त्रे च पारगाः ।
सर्वे संसर्गविद्यासु विद्याभिजनशोभिनः ।
सर्वेषामनुरूपाश्च कृता दारा महीपते । [35]
दुःशलां चैव समये सिन्धुराजाय कौरवः ।
जयद्रथाय प्रददौ सौबलानुमते तदा ।

☞ This passage is an anticipation of adhy. 108 (q. v.)

42

After 1. 61. 86, K2.4 N V1 B D (except D5) ins.

यस्यावतरणे राजन्सुरान्सोमोऽब्रवीदिदम् ।
नाहं दद्यां प्रियं पुत्रं प्रेयांसमपि जीवितात् ।
समयः क्रियतामेष न शक्यमतिवर्तितुम् ।
सुरकार्यं हि नः कार्यमसुराणां क्षितौ वधः ।
तत्र यास्यत्ययं वर्चा न च स्थास्यति मे चिरम् । [5]
ऐन्द्रिर्नरस्तु भविता यस्य नारायणः सखा ।
सोऽर्जुनेत्यभिविख्यातः पाण्डोः पुत्रः प्रतापवान् ।
तस्यायं भविता पुत्रो बालो भुवि महारथः ।
तत्र षोडश वर्षाणि स्थास्यत्यमरसत्तमाः ।
अस्य षोडशवर्षस्य स संग्रामो भविष्यति । [10]
यत्रांशा वः करिष्यन्ति कर्म दानवसूदनम् ।
नरनारायणाभ्यां तु स संग्रामो विनाकृतः ।
चक्रव्यूहं समास्थाय योधयिष्यन्ति चासुराः ।
विमुखाञ्शात्रवान्सर्वान्कारयिष्यति मे सुतः ।
बालः प्रविश्य तं व्यूहमभेद्यं विचरिष्यति । [15]
महारथानां वीराणां कदनं च करिष्यति ।
सर्वेषां चैव शत्रूणां चतुर्थांशं नयिष्यति ।
दिनार्धेन महाबाहुः प्रेतराजपुरं प्रति ।
ततो महारथैर्वीरैः समेत्य बहुशो रणे ।
दिनक्षये महाबाहुर्मया भूयः समेष्यति । [20]
एकं वंशकरं वीरं पुत्रं वै जनयिष्यति ।
प्रनष्टं भारतं वंशं स भूयो धारयिष्यति ।
एतत्सोमवचः श्रुत्वा तथास्त्विति दिवौकसः ।
प्रत्यूचुः सहिताः सर्वे ताराधिपमपूजयन् ।
एवं ते कथितं राजंस्तव जन्म पितुः पितुः । [25]

43

After 1. 61. 88, K4 N V1 B D (except D5) ins.:

प्रतिविन्ध्यः सुतसोमः श्रुतकीर्तिस्तथापरः ।
नाकुलिश्च शतानीकः श्रुतसेनश्च वीर्यवान् ।
शूरो नाम यदुश्रेष्ठो वसुदेवपिताभवत् ।

41

Ñ2 D1.2 om. line 1, after line 1, B1 reads (for the first time) line 30 (v. l. चैव शताधिका for चैका प्र°). K3 om. lines 2-31. — (L. 2) V1 तेषां, Dn D1 एषां (for चैव) — (L. 9) K4 B Da3 D1-8 चित्रोपचित्रश्च — (L. 11) Dn D1.2.4 पद्मनाभ° (for सुना°) — (L. 13) Ñ2 V1 B3m Dn D1.4 दुर्विरोचन° — (L. 16) Da बलमर्दन, Dn D1.4 भीमविक्रम — (L. 17) Ñ1 °B (except B5) दृढधन्वा (for °वर्मा) Ñ2 Dn D1 अनूदय°, Ñ3 V1 अयोदर° — (L. 19) Ñ1.2 V1 Dn D1.4 क्षेमम् (Ñ1.2 V1 °धृ)र्तिस्तथैव च (for the posterior half) — (L. 20) Ñ2 दुरासद, B4 °युध, Dn D1 °धन — (L. 22) K4 नागदत्तश्च यायिनौ, B5 Da °भगामिनौ, Dn D1.4 नागदत्तानुयायिनौ — (L. 23) Dn D1.4 दण्डी (for पाशी) — (L. 27) Da Dn D1.2.4 व्यूढोरु N1 Da कनकध्वजा, Dn D1.4 कनकांगद; D3 कनकस्तरु — (L. 28) Ñ2 V1 B1 Da Dn D1.3.4 कुण्डजश्चित्रकश्चैव — L. 29 = L. 1. — (L. 34) K4 समग्र°, V1 संसक्त°, Dn D1.4 संग्राम° (for संसर्ग°) K3 V1 दिव्याभिज्ञानशो°, K4 विद्याविज्ञान°, Ñ3 °जनसंमता — (L. 36) K4 Ñ2 V1 Dn D1.4 °ला समये राजन्

42

(L. 1) Dn D1.2.4 इदं (for च) — (L. 2) K2.4 Ñ1.2 V1 B3m Da Dn D1.2.4 मम प्राणैर्गरीयसं — (L. 5) B मे (as in text), the rest वै — (L. 9) K2 B Dn3 D3 तत° (for तत्र) K2.4 Ñ1.2 V1 B3m यास्यते (for स्थास्यति). — (L. 11) K2 तत्राहुन, K4 D2 तत्राध्वर्दं, Ñ V1 B3 यत्र दाता° (for यत्रांशा व°) Ñ2 V1 B4.2 Dn D1.2.4 वीरनिषूदन (for दानव°) — (L. 13) K4 दे सुरा°, B1 वै सु°; Dn D1 च° सु°. — (L. 14) K2.4 Ñ1.2 B1 Da D2.3 चा(or धा)रयि°. — (L. 19) K2.4 Ñ2 V1 Dn D1.2.4 बहुनो रणे — (L. 21) K4 Ñ1.2 V1 Dn D1.2.4 transp. वीरं and पुत्र

तस्य कन्या पृथा नाम रूपेणासदृशी भुवि ।
पितुः स्वस्रीयपुत्राय सोऽनपत्याय वीर्यवान् । [5]
अग्रमग्रे प्रतिज्ञाय स्वस्यापत्यस्य वै तदा ।
अग्रजातेति तां कन्यां शूरोऽनुग्रहकाङ्क्षया ।
अददत्कुन्तिभोजाय स तां दुहितरं तदा ।
सा नियुक्ता पितुर्गेहे ब्राह्मणातिथिपूजने ।
उग्रं पर्यचरद्घोरं ब्राह्मणं संशितव्रतम् । [10]
निगूढनिश्चयं धर्मे यं तं दुर्वाससं विदुः ।
तमुग्रं शंसितात्मानं सर्वयत्नैरतोषयत् ।
तुष्टोऽभिचारसंयुक्तमाचचक्षे यथाविधि ।
उवाच चैनां भगवान्प्रीतोऽस्मि सुभगे तव । [15]
यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि ।
तस्य तस्य प्रसादात्त्वं देवि पुत्राञ्जनिष्यसि ।
एवमुक्ता च सा बाला तदा कौतूहलान्विता ।
कन्या सती देवमर्कमाजुहाव यशस्विनी ।
प्रकाशकर्मा तपनस्तस्यां गर्भं दधौ तदा ।
अजीजनत्सुतं चास्यां सर्वशस्त्रभृतां वरम् । [20]
सकुण्डलं सकवचं देवगर्भं श्रियान्वितम् ।
दिवाकरसमं दीप्त्या चारुसर्वाङ्गभूषणम् ।
निगूहयन्ती जातं वै बन्धुपक्षभयात्तदा ।
उत्ससर्ज जले कुन्ती तं कुमारं यशस्विनम् ।
तमुत्सृष्टं जले गर्भं राधाभर्ता महायशाः । [25]
राधायाः कल्पयामास पुत्रं सोऽधिरथस्तदा ।
चक्रतुर्नामधेयं च तस्य बालस्य तावुभौ ।
दम्पती वसुषेणेति दिक्षु सर्वासु विश्रुतम् ।
स वर्धमानो बलवान्सर्वास्त्रेषूत्तमोऽभवत् ।
आ पृष्ठतापात्स तदा जजाप जपतां वरः । [30]
यस्मिन्काले जपन्नास्ते धीमान्सत्यपराक्रमः ।
नादेयं ब्राह्मणेष्वासीत्तस्मिन्काले महात्मनः ।
तमिन्द्रो ब्राह्मणो भूत्वा पुत्रार्थे भूतभावनः ।
ययाचे कुण्डले वीर कवचं च सहाङ्गजम् ।
उत्कृत्य कर्णो ह्यददत्कुण्डले कवचं च तत् । [35]
शक्तिं शक्रोऽददत्तस्मै विस्मितश्चेदमब्रवीत् ।
देवासुरमनुष्याणां गन्धर्वोरगरक्षसाम् ।
यस्मिन्क्षेप्स्यसि दुर्धर्ष स एको न भविष्यति ।
पुरा नाम तु तस्यासीद्वसुषेणेति विश्रुतम् ।
ततो वैकर्तनः कर्णः कर्मणा तेन सोऽभवत् । [40]

☞ This passage (from line 3 onwards) is an anticipation of adhy 104 (*q v*).

44

After 1 67 14[ab], D_2 ins

त्वयैव का समा नारी न गन्धर्वी तथाप्सराः ।
न मिश्रकेशी रम्भा वा न घृताची न मेनका ।
चार्वङ्गी सुकेशी च यथा त्वं मत्तकाशिनि ।
कम्बुग्रीवा च सुश्रोणी मृगाक्षी सुस्तनीति च ।
निगूढगुल्फा रक्तोष्ठी सुरक्तनखपद्धतिः । [5]
ईषच्च गद्गदां वाचं रम्भोरु त्वं शुचिस्मिते ।
यौ तौ जातौ सुसंश्लिष्टौ मध्ये हारविलक्षितौ ।
अनर्हं धारयस्त्येमलं वा चीरवल्कलम् ।
इदं शैलकुशाकीर्णं पल्लवैरुपसेवितम् ।
सिंहशार्दूलसंयुक्तं मृगपक्षिसमाकुलम् । [10]
वनं कण्टकितं घोरं निर्मनुष्यमभूतवत् ।
अर्हसे हर्म्यप्रासादान्सौवर्णान्मणिकुट्टिमान् ।
स्वास्तीर्णतल्पसुदिवान्कातैस्वरविभूषितान् ।
इदं नार्हसि कल्याणि कृपणत्वं वरानने ।
मुमूर्षुं मदनाक्लिष्टं त्राहि मां शुभचारिणम् । [15]
न स्मृतिं चाभिजानामि न दिशो गतचापलः ।
अर्धनालीकनाराचशक्तितोमरमुद्गराः ।
पतन्ति स्म शरीरे मे पादमूरुशिरांसि च ।
पुनः प्ररोहते देवि वनं परशुना हतम् ।
कामाग्निना सुसंदीप्तं तपत्येव ममाङ्गकम् । [20]
हृदि प्रौढे सुतीक्ष्णाग्रे मन्ये भैषज्यमीदृशम् ।
प्रेम्णा समापन स्पर्शं स्मृतिर्दृष्टिः कथामपि ।
विनान्यौषधकामिन्य प्रजापतिरथाब्रवीत् ।
एवमेतन्महाभाग सुप्रिये स्मितभाषिणि ।

45

S ins after 1 67 23

शङ्कितेव च विप्रर्षिमुपचक्राम सा शनैः ।
ततोऽस्य भारं जग्राह आसनं चाप्यकल्पयत् ।

43

(L. 1) K_4 $\tilde{N}_{1.2}$ V_1 $B_{2.4}$ श्रुतकर्मा, $D_{1.3.4}$ श्रुतसोम॰ (for श्रुतसोम॰) — (L. 16) K_4 $\tilde{N}_2$ B $D_{2.4}$ प्रसादात्तस्य तस्यैव, D_3 प्रसादात्त्वं देवपुत्रान् K_4 $\tilde{N}_3$ B $D_{1.2.3}$ पुत्र त्वं (D_3 पुत्रान्हि) जनयिष्यसि — (L 22) $\tilde{N}_{1.2}$ V_1 D_n $D_{1.4}$ ॰भूषित (for ॰भूषणम्) — (L. 23) V_1 B_{3}m D_n $D_{1.4}$ निगूहमाना — (L. 30) V_1 D_n $D_{1.4}$ वेदाङ्गानि च सर्वाणि; D_a D_3 आ पृष्ठसंप्रतापात्स — (L. 34) $\tilde{N}_3$ V_1 D_a सहजं (for सहा॰) — (L. 35) $\tilde{N}_{1.2}$ V_1 D_n $D_{1.4}$ कवचं कुण्डले तथा (for the posterior half) — (L. 36) $\tilde{N}$ V_1 D_a D_n $D_{1.3.4}$ ददौ (for ऽददत्) — (L. 39) $\tilde{N}_2$ V_1 D_n $D_{1.4}$ ॰षेण इति क्षितौ

45

With lines 2-3, 11-12, and 18-19, cf. 1 67 30-31

प्रक्षालयन्त सा पादौ काश्यपस्य महात्मनः ।
न चैनं लज्जयाशक्नोद्दक्षिभ्यामभिवीक्षितुम् ।
शकुन्तला च सव्रीडा तमृषिं नाभ्यभाषत । [5]
तस्मात्स्वधर्मात्स्खलिता भीता सा भरतर्षभ ।
अभवद्दोषदर्शित्वाद्ब्रह्मचारिण्ययन्त्रिता ।
स तदा प्रीडितां दृष्ट्वा ऋषिस्तां प्रत्यभाषत ।

कण्वः ।

सव्रीडैव च दीर्घायुः पुरेव भविता न च ।
वृत्तं कथय रम्भोरु मा त्रासं च प्रकल्पय । [10]

वैशंपायन ।

ततः प्रक्षाल्य पादौ सा विश्रान्तं पुनरब्रवीत् ।
निधाय कामं तत्सर्वं कन्दानि च फलानि च ।
ततः संवाह्य पादौ सा विश्रान्तं वेदिमध्यमा ।
शकुन्तला पौरवाणां दुःषन्तं जगृहे पतिम् ।
ततः कृच्छ्रादतिशुभा सव्रीडा श्रीमती तदा । [15]
सगद्गदमुवाचेदं काश्यपं सा शुचिस्मिता ।

शकुन्तला ।

राजा ताताजगामेह दुःषन्त इलिलात्मजः ।
मया पतिर्वृतो योऽसौ दैवयोगादिहागतः ।
तस्य तात प्रसीद त्वं भर्ता मे सुमहायशाः ।
अतः सर्वं तु यद्वृत्तं दिव्यज्ञानेन पश्यसि । [20]
अभयं क्षत्रियकुले प्रसादं कर्तुमर्हसि ।

☞ The above passage is ins in *all* S MSS after 1 67 23 The reservation in the footnotes to 1 67. 23-24 that T2 G1-3 ins it after 24 is unnecessary and should be *deleted*

46

After 1 68 9, D4 (suppl fol, *sec m*) S ins ·

शकुन्तलां समाहूय कण्वो वचनमब्रवीत् ।

कण्व ।

शृणु भद्रे मम सुते मम वाक्यं शुचिस्मिते ।
पतिव्रतानां नारीणां विशिष्टमिति चोच्यते ।
पतिशुश्रूषणं पूर्वं मनोवाक्कायचेष्टितैः ।
अनुज्ञाता मया पूर्वं पूजयैतद्व्रतं तव । [5]
एतेनैव च वृत्तेन पुण्याँल्लोकानवाप्य च ।
तस्यान्ते मानुषे लोके विशिष्टां लप्स्यसे श्रियम् ।
तस्माद्भद्रेऽद्य यातव्यं समीपं पौरवस्य ह ।
स्वयं नायाति मत्वा ते गतं कालं शुचिस्मिते ।
गत्वाराधय राजानं दुःषन्तं हितकाम्यया । [10]
दौःषन्तिं यौवराज्यस्थं दृष्ट्वा प्रीतिमवाप्स्यसि ।
देवतानां गुरूणां च क्षत्रियाणां च भामिनि ।
भर्तॄणां च विशेषेण हितं संगमनं सताम् ।
तस्मात्पुत्रि कुमारेण गन्तव्यं मत्प्रियेप्सया ।
प्रतिवाक्यं न दद्यास्त्वं शापिता मम पादयोः । [15]

वैशंपायनः ।

एवमुक्त्वा सुतां तत्र पौत्रं कण्वोऽभ्यभाषत ।
परिष्वज्य च बाहुभ्यां मूर्ध्न्युपाघ्राय पौरवम् ।
सोमवंशोद्भवो राजा दुःषन्त इति विश्रुतः ।
तस्याग्रमहिषी चैषा तव माता शुचिस्मिता ।
गन्तुकामा भर्तृपार्श्वं त्वया सह सुमध्यमा । [20]
गत्वाभिवाद्य राजानं यौवराज्यमवाप्स्यसि ।
स पिता तव राजेन्द्रस्तस्य त्वं वशगो भव ।
पितृपैतामहं राज्यमातिष्ठस्व स्वभावतः ।
तस्मिन्काले स्वराज्यस्थो मामनुस्मर पौरव ।

वैशंपायन ।

अभिवाद्य मुनेः पादौ पौरवो वाक्यमब्रवीत् । [25]
त्वं पिता मम विप्रर्षे त्वं माता त्वं गतिश्च मे ।
न चान्यं पितरं मन्ये त्वामृते तु महातप ।
तव शुश्रूषणं पुण्यमिह लोके परत्र च ।
शकुन्तला भर्तृकामा स्वयं यातु यथेष्टतः ।
अहं शुश्रूषणपरः पादमूले वसामि च । [30]
क्रीडां व्यालमृगैः सार्धं करिष्ये न पुरा यथा ।
स्वच्छासनपरो नित्यं स्वाध्यायं च करोम्यहम् ।

वैशंपायनः ।

एवमुक्त्वा तु सश्लिष्य पादौ कण्वस्य तिष्ठति ।
तस्य तद्वचनं श्रुत्वा प्ररुरोद शकुन्तला ।
स्नेहात्पितुश्च पुत्रस्य हर्षशोकसमन्विता । [35]
निशाम्य रुदतीमार्तां दौःषन्तिर्वाक्यमब्रवीत् ।
श्रुत्वा भगवतो वाक्यं किं रोदिषि शकुन्तले ।
गन्तव्यं काल्यं उत्थाय भर्तृप्रीतिस्तवास्ति चेत् ।

शकुन्तला ।

एकस्तु कुरुते पापं फलं भुङ्क्ते महाजनः ।
मोक्तारस्तत्र मुच्यन्ते कर्ता दोषेण लिप्यते । [40]
मया निवारितो नित्यं न करोषि वचो मम ।
नि सुतान्कुञ्जरान्नित्यं बाहुभ्यां संप्रमथ्य वै ।
घनं च लोडयन्नित्यं सिंहव्याघ्रगणैर्युतम् ।
एवंविधानि चान्यानि कृत्वा वै पुरुनन्दन ।

46

(L. 18) T1 G1 M नाम (for इति) T1 G1 ते पिता (for विश्रुत) — (L. 23) T1 G1 2 M अनुतिष्ठ (for आतिष्ठस्व) — (L 30) Noteworthy is the expression पादमूले! Cf. line 35 of passage No 68 — (L. 36) M तां तु (for आर्तां) — T2 M2 om line 40 (which appears to be redundant!) — (L 51) M तस्य (for दस्य)

इष्टितो भगवांस्तात तस्मादावां विवासितौ । [45]
अहं न गच्छे दुष्यन्तं नास्मि पुत्रहितैषिणी ।
पादमूले वसिष्यामि महर्षेर्भावितात्मनः ।
वैशंपायनः ।
एवमुक्त्वा तु रुदती पपात मुनिपादयोः ।
एवं विलपतीं कण्वश्चानुनीय च हेतुभिः ।
पुनः प्रोवाच भगवानानृशंस्याद्धितं वचः । [50]
कण्वः ।
शकुन्तले शृणुष्वेदं हितं पथ्यं च भामिनि ।
पतिव्रताभावगुणान्हित्वा साम्यं न किंचन ।
पतिव्रतानां देवा वै तुष्टाः सर्ववरप्रदाः ।
प्रसादं च करिष्यन्ति आपदर्थे च भामिनि ।
पतिप्रसादात्पुण्यगतिं प्राप्नुवन्ति न चाशुभम् । [55]
तस्माद्गत्वा तु राजानमाराधय शुचिस्मिते ।
वैशंपायनः ।
शकुन्तला तयोक्त्वा वै शाकुन्तलमथाब्रवीत् ।
दौहित्रो मम पौत्रस्त्वमिष्टिलस्य महात्मनः ।
शृणुष्व वचनं सत्यं प्रब्रवीमि तवानघ ।
मनसा भर्तृकामा वै वाग्भिरुक्त्वा पृथग्विधम् । [60]
गन्तुं नेच्छति कल्याणी तस्मात्तात वदस्व वै ।
शक्तस्त्वं प्रतिगन्तुं च मुनिभिः सह पौरव ।

47

After 1.68.11, D1 (suppl. fol., sec. m.) S (except G2) ins:

वैशंपायनः ।
धर्माभिपूजितं पुत्रं काश्यपेन निशाम्य तु ।
काश्यपात्प्राप्य चानुज्ञां मुमुदे च शकुन्तला ।
कण्वस्य वचनं श्रुत्वा प्रतिगच्छेति चासकृत् ।
तथेत्युक्त्वा तु कण्वं च मातरं पौरवोऽब्रवीत् ।
किं चिरायसि मातस्त्वं गमिष्यामो नृपालयम् । [5]
एवमुक्त्वा तु तां देवीं दुष्यन्तस्य महात्मनः ।
अभिवाद्य मुनेः पादौ गन्तुमैच्छत्स पौरवः ।
शकुन्तला च पितरमभिवाद्य कृताञ्जलिः ।
प्रदक्षिणीकृत्य तदा पितरं वाक्यमब्रवीत् ।
अज्ञानान्मे पिता चेति दुरुक्तं वापि चानृतम् । [10]
अकार्यं वाप्यनिष्टं वा क्षन्तुमर्हति तद्भवान् ।
एवमुक्तो नतशिरा मुनिर्नोवाच किंचन ।
मनुष्यभावात्कण्वोऽपि मुनिरश्रूण्यवर्तयत् ।
अब्भक्षान्वायुभक्षांश्च शीर्णपर्णाशनान्मुनीन् ।
फलमूलाशिनो दान्तान्कृशान्धमनिसंततान् । [15]
व्रतिनो जटिलान्मुण्डान्वल्कलाजिनसंवृतान् ।
समाहूय मुनीन् कण्वः कारुण्यादिदमब्रवीत् ।
मया तु लालिता नित्यं मम पुत्री यशस्विनी ।
वने जाता विवृद्धा च न च जानाति किंचन ।
आश्रमेण पथा सर्वैर्नीयतां क्षत्रियालयम् । [20]
द्वितीययोजने विप्राः प्रतिष्ठानं प्रतिष्ठितम् ।
प्रतिष्ठाने पुरे राजा शाकुन्तलपितामहः ।
अध्युवास चिरं कालमुर्वश्या सहितः पुरा ।
अनूपजाङ्गलयुतं धनधान्यसमाकुलम् ।
प्रतिष्ठितं पुरवरं गङ्गायामुनसंगमे । [25]
तत्र संगममासाद्य स्नात्वा हुतहुताशनाः ।
शाकमूलफलाहारा निवर्तध्वं महातपाः ।
अन्यथा तु भवेद्विप्रा अध्वनो गमने श्रमः ।

48

After 1.68.13, D1 (*suppl. fol., sec. m.*) S *ins*.:

शकुन्तलां समादाय मुनयो धर्मवत्सलाः ।
ते वनानि नदीः शैलान्गिरिप्रस्रवणानि च ।
कन्दराणि नितम्बांश्च राष्ट्राणि नगराणि च ।

47

(L. 5 and 11) T1 G1 M भद्रे (for मातः), and कास्यन (for तद्भवान्) — (L. 20) T1 G1 M3 अथर्मेण

48

G3 om lines 1-14 — (L. 5) M सुनागता — (L. 8) T1 M1 °सीचलर्यैश्च, M2-3 °मिथ्यवर्तैश्च — (L. 15) T1 M1 (*inf. lin.*) सर्वत्र पुष्करिण्यश्च, M3 सर्वत्र पद्मिनीभिश्च, M2-3 पूर्णं पुष्करिणि°. M (except M1) तपानैरुदधोमितां — (L. 18) T1 ऋतुपर्णैश्च, M1 ऋतुपदैश्च, M2-3 मासैश्चैव. — (L. 19) M1, 2-3 मल्लापर्वतिरैश्चैव (M1 °वर्तैर्मिन्न) — (L. 20) M (except M1) पूर्णं (for सर्वं) — (L. 21) M स्वल्पेव नगरानि (for the posterior half) — (L. 25) M °कारनोम्नि. — (L. 26) M (except M1) वैदेशे (for the first चारि) — (L. 28) T1 G1, 2 सुवाम्येत्य, M तयान्येन्य — (L. 29) T1 महायशा°, M1 महर्षिभिः°, M1 (*inf. lin.*), 2-3 मनीषिभिः — (L. 30) M महयप° (for स्वल्पयत्) — After line 30, M (except M1) ins

शकुन्तलामिदं प्रीता दर्पयन्तोऽभ्रुवन्वचः ।

— (L. 32) M (except M1) अद्य (for एते) — (L. 36) M (except M1) प्रेक्षका° प्रयुज्जिरे (for the posterior half) — (L. 46) M (except M1) ये म्लेच्छ° मर°. — (L. 53) M (except M1) छात्रान् (for दीनान्) — (L. 60) M (except M1) नगरं न प्रवेष्टव्य भवद्भिरिति शासन — Colophon. *Adhy. no.* T1 86, T2 36, G1-2, 6 M 37 — D4 T1 G1, 2, 6 M (except M1) om line 68 — (L. 68) T1 G1, 2 M1 दृश्यते (for दृश्यते)

आश्रमाणि च पुण्यानि गत्वा चैव गतश्रमा. ।
शनैर्मध्याह्नवेलायां प्रतिष्ठानं समाययु । [5]
तां पुरीं पुरुहूतेन ऐलस्यार्थे विनिर्मिताम् ।
परिघाट्टालकैर्मुख्यैरुपतल्पशतैरपि ।
शतघ्नीशतयन्त्रैश्च गुप्तामन्यैर्दुरासदाम् ।
हर्म्यप्रासादसंबाधां नानापण्यविभूषिताम् ।
मण्टपै ससभै रम्यै प्रपाभिश्च समावृताम् । [10]
राजमार्गेण महता सुविभक्तेन शोभिताम् ।
कैलासशिखराकारैर्गोपुरैः समलंकृताम् ।
द्वारतोरणनिर्यूहैर्मङ्गलैरपशोभिताम् ।
उद्यानाम्रवणोपेतां महतीं सालमेखलाम् ।
सर्वपुष्करिणीभिश्च उद्यानैश्च समावृताम् । [15]
वर्णाश्रमै स्वधर्मस्थैर्नित्योत्सवसमाहितै ।
धनधान्यसमृद्धैश्च संतुष्टै रत्नपूजितै ।
ऋतुयुक्तैश्च विद्वद्भिरग्निहोत्रपरै. सदा ।
वर्जिताकार्यकरणैर्दानशीलैर्दयापरैः ।
अधर्मभीरुभि सर्वै स्वर्गलोकजिगीषुभि । [20]
एवंविधजनोपेतमिन्द्रलोकमिवापरम् ।
तस्मिन्नगरमध्ये तु राजवेश्म प्रतिष्ठितम् ।
इन्द्रसद्मप्रतीकाश संपूर्णं वित्तसंचयै ।
तस्य मध्ये सभा दिव्या नानारत्नविचित्रिता ।
तस्या सभाया राजर्षिः सर्वालंकारभूषित । [25]
ब्राह्मणै क्षत्रियैश्चापि मन्त्रिभिश्चापि संवृत ।
संस्तूयमानो राजेन्द्र सूतमागधवन्दिभि ।
कार्यार्थिभिः समभ्येत्य कृत्वा कार्यं गतेषु स ।
सुखासीनोऽभवद्राजा तस्मिन्काले महर्षय ।
शकुन्तानां स्वन श्रुत्वा निमित्तज्ञास्त्वलक्षयन् । [30]

ऋषयः ।

शकुन्तले निमित्तानि शोभनानि भवन्ति न ।
कार्यसिद्धिं वदन्त्येते ध्रुव राज्ञी भविष्यसि ।
अस्मिंस्तु दिवसे पुत्रो युवराजो भविष्यति ।

वैशंपायनः ।

वर्धमानपुरद्वारं तूर्यघोषनिनादितम् ।
शकुन्तलां पुरस्कृत्य विविशुस्ते महर्षय । [35]
प्रविशन्त नृपसुत प्रदाशासुश्च प्रेक्षका ।
वर्धमानपुरद्वारं प्रविशन्नेव पौरव ।
इन्द्रलोकस्थमात्मान मेने हर्षसमन्वित ।
ततो वै नागरा सर्व समाहूय परस्परम् ।
द्रष्टुकामा नृपसुत समपद्यन्त भारत । [40]

नागरा ।

देवतेव जनस्याग्रे भ्राजते श्रीरिवागता ।
जयन्तेनेव पौलोमी इन्द्रलोकादिहागता ।

वैशंपायन ।

इति ब्रुवन्तस्ते सर्वे महर्षीनिदमब्रुवन् ।

अभिवादयन्त सहिता महर्षीन्देववर्चस ।
अद्य न. सफल जन्म कृतार्थाश्च ततो वयम् । [45]
एन ये स्म प्रपश्यामो महर्षीन्सूर्यवर्चस ।
इत्युक्त्वा सहिता केचिदन्वगच्छन्त पौरवम् ।
हैमवत्या सुतमिव कुमारं पुष्करेक्षणम् ।
ये केचिदब्रुवन्मूढा. शाकुन्तलदिदृक्षव ।
कृष्णाजिनेन सच्छन्नान्द्रष्टु नेच्छन्ति तापसान् । [50]
पिशाचा इव दृश्यन्ते नागराणां विरूपिण ।
विना सध्यां पिशाचास्ते प्रविशन्ति पुरोत्तमम् ।
क्षुत्पिपासार्दितान्दीनान्वल्कलाजिनवाससः ।
त्वगस्थिभूताश्रिमांसान्धमनीसंततानपि ।
पिङ्गलाक्षान्पिङ्गजटान्दीर्घदन्तान्निरूदरान् । [55]
विशीर्णकानूर्ध्वहस्तान्दृष्ट्वा हास्यन्ति नागरा ।
एवमुक्तवतां तेषां गिर श्रुत्वा महर्षय ।
अन्योन्यं ते समाहूय इद वचनमब्रुवन् ।
उक्त भगवता वाक्य न कृत सत्यवादिना ।
पुरप्रवेशन नात्र कर्तव्यमिति शासनम् । [60]
किं कारण प्रवेक्ष्यामो नगर दुर्जनैर्वृतम् ।
त्यक्तसंगस्य च मुनेर्नगरे किं प्रयोजनम् ।
तस्माद्गमिष्याम वय गङ्गायामुनसगमम् ।
एवमुक्त्वा मुनिगणा. प्रतिजग्मुर्यथागतम् ।

Colophon

वैशंपायन ।

गतान्मुनिगणान्दृष्ट्वा पुत्र सगृह्य पाणिना । [65]
मातापितृभ्यां विरहाद्यथा शोचन्ति दारका. ।
तथा शोकपरीताङ्गी धृतिमालम्ब्य दुःखिता ।
गतेषु तेषु विप्रेषु राजमार्गेण भामिनी ।
पुत्रेणैव सहायेन सा जगाम शनै शनैः ।
अदृष्टपूर्वान्पश्यन्वै राजमार्गेण पौरव । [70]
हर्म्यप्रासादचैत्याश्च सभा दिव्या विचित्रिता ।
कौतूहलसमाविष्टो दृष्ट्वा विस्मयमागत ।
सर्वे ब्रुवन्ति ता दृष्ट्वा पद्महीनामिव श्रियम् ।
गतेन हंसीसदृशीं कोकिलेन स्वरे समाम् ।
मुखेन चन्द्रसदृशीं श्रिया पद्मालयासमाम् । [75]
स्मितेन कुन्दसदृशीं पद्मगर्भसमत्वचम् ।
पद्मपत्रविशालाक्षीं तप्तजाम्बूनदप्रभाम् ।
करान्तमितमध्या ता सुकेशीं संहतस्तनीम् ।
जघन सुविशाल वै ऊरू करिकरोपमौ ।
रक्ततुङ्गनखौ पादौ धरण्यां सुप्रतिष्ठितौ । [80]
एवरूपसमायुक्ता स्वर्गलोकादिहागता ।
इति स्म सर्वेऽमन्यन्त द्रु पन्ननगरे जनाः ।
पुन पुनरवोचस्ते शाकुन्तलगुणानपि ।
सिंहेक्षण सिंहदंष्ट्र सिंहस्कन्धो महाभुज ।
सिंहोरस्क सिंहवक्त्र सिंहविक्रान्तगामिनम् । [85]

पृथ्वंस पृथुवक्षाश्च छत्राकारशिरा महान्।
पाणिपादतले रक्तो रक्तास्यो दुन्दुभिस्वन ।
राजलक्षणयुक्तश्च राजश्रीश्चास्य दृश्यते।
आकारेण च रूपेण शरीरेणापि तेजसा।
दुःषन्तेन समो ह्येष कस्य पुत्रो भविष्यति। [90]
एवं ब्रुवन्त्यां सर्वे प्रशशंसु महत्तदा ।
युक्तिवादानशोचन्त सर्वाः प्राणभृत स्त्रियः।
बान्धवा इव सस्नेहा अनुजग्मुः शकुन्तलाम्।
पौराणां तद्वच श्रुत्वा तूष्णींभूता शकुन्तला।
वेश्मद्वार समासाद्य विह्वलन्ती नृपात्मजा। [95]
चिन्तयामास सहसा कार्यगौरवकारणात्।
लज्जया च परीताङ्गी राजस्त्राजन्मभक्षत ।
अघृणा किं नु वक्ष्यामि दुःषन्त मम कारणात्।
एवमुक्त्वा तु कृपणा चिन्तयन्ती शकुन्तला।

49

After 1 68 51, Da1 ins.

ब्रह्मा सुरासुरगुरु सोऽपि शक्तिं पुराकरोत्।
प्रकृतिं स्वां प्रविश्याशु ब्रह्माण्डमभवत्ततः।
भर्तव्या रक्षणीया च भार्या हि पतिना सदा।
धर्मार्थकामसंसिद्धौ भार्या भर्तु सहायिनी।
यदा भर्ता च भार्या च परस्परवशानुगौ। [5]
तदा धर्मार्थकामानां त्रयाणामपि सगम ।
कथ भार्यामृते धर्म कथ वा पुरुषः प्रभो।
प्राप्नोति काममर्थं वाप्यस्यां त्रितयमाहितम्।
तथैव भर्तारमृते भार्या धर्मादिसाधने।
न समर्था त्रिवर्गोऽय दपत्यो समुपाश्रित । [10]
देवतानिथिभृत्यानामतिथीनां च पूजनम्।
न पुम्भिः शक्यते कर्तुमृते भार्यां कथचन।
प्राप्तोऽपि चार्थो मनुजैरानीतोऽपि निज गृहम्।
नाशमेति विना भार्यां कुभार्याग्रहेण वा।
कामस्तु नैव तस्यास्ति प्रत्यक्षेणोपदृश्यते। [15]

50

After 1 68 57^{ab}, Da1 ins

अपुत्रस्य जगच्छून्यमपुत्रस्य गृहेण किम्।
पुत्रेण लोकाञ्जयति श्रुतिरेषा सनातनी।

नास्ति पुत्रसम स्नेहो नास्ति पुत्रसम सुखम्।
नास्ति पुत्रसमा प्रीति नास्ति पुत्रसमा गति ।
अनृत वक्ति लोकोऽय चन्दन किल शीतलम्। [5]
पुत्रगात्रपरिष्वङ्गश्चन्दनादपि शीतल ।

51

After 1 68 69, S ins

पक्षिण पुण्यवन्तस्ते सहिता धर्मतत्सदा।
पक्षिभिस्तैरभिगुप्ता च तस्मादस्मि शकुन्तला।
ततोऽहमृषिणा दृष्टा काश्यपेन महात्मना।
जलार्थमग्निहोत्रस्य गत दृष्ट्वा तु पक्षिण ।
न्यासभूतामिव मुने प्रददुर्मां दयावतः। [5]
कण्वस्त्वालोक्य मां प्रीतो हसन्तीति द्विजभुज ।
स मामिणिमिवादाय स्वमाश्रममुपागमत्।
सा वै संभाविता राजन्ननुक्रोशान्महर्षिणा।
तेनैव स्वसुतेवाह राजन्वै वरवर्णिनी।
विश्वामित्रसुता चाह वर्धिता मुनिना नृप। [10]
यौवने वर्तमानां च दृष्टवानसि मा नृप।
आश्रमे पर्णशालायां कुमारीं विजने वने।
धात्रा प्रचोदितां शून्ये पित्रा विरहितां मिथ ।
वाग्भिस्त्व सूनृताभिर्मामपत्यार्थमचूचुद ।
अकार्षीस्त्वाश्रमे वासं धर्मकामार्थनिश्चितम्। [15]
गान्धर्वेण विवाहेन विधिना पाणिमग्रही ।
साह कुल च शील च सत्यवादित्वमात्मनः।
स्वधर्मं च पुरस्कृत्य त्वामद्य शरण गता।
तस्मान्नार्हसि सश्रुत्य तथेति वितथ वच ।
स्वधर्मं पृष्ठत कृत्वा परित्यक्तुमुपस्थिताम्। [20]
स्वभार्यां लोकनाथस्त्व नार्हसि त्वमनागसम्।

52

After 1 88 12, D4 (suppl fol., sec m) S ins

वैशंपायन ।

अश्वमेधे महायज्ञे स्वयमुविहिते पुरा।
हयस्य यानि चाङ्गानि सनिकृत्य यथाक्रमम्।
होताध्वर्युरयोद्गाता ब्रह्मणा सह भारत।
अग्नौ प्रास्यन्ति विधिवत्समस्ता षोडशर्त्विज ।
धूमगन्ध च पापिष्ठा ये जिघ्रन्ति नरा भुवि। [5]

51

(L 1) G4 धर्मवत्सला, M (except M8) धर्मतत्परा — (L 2) T1 G1.4 M (except M8) स्तैर् (for तैर्) — T2 G3-6 M6-8 om line 6 — (L. 9) M (except M8) दयया (for राजन्वै) T1 G1 3 M (except M8) परमर्षिणा (for वर°) — (L 12) T1 G4-6 M8 तदा (for वने). — (L. 15) M (except M8) अशोच (for अकार्षी) S (except G3 5 6 M8) वाच° (for वास°) T1 G3 M (except M8) °निश्रिता°, T2 G4 °निश्चिता°, G1 °संमिता° — (L. 21) T1 G1-4 अनापदि, M8 अपोहितु (for अनागसम्)

विमुक्तपापाः पूतास्ते तत्क्षणेनाभवन्नराः ।
एतस्मिन्नन्तरे चैव माधवी सा तपोधना ।
मृगचर्मपरीताङ्गी परिधाय मृगत्वचम् ।
मृगैः परिचरन्ती सा मृगाहारविचेष्टिता ।
यज्ञवाटं मृगगणैः प्रविश्य भृशविस्मिता । [10]
आघ्रायन्ती धूमगन्धं मृगैरेव चचार सा ।
यज्ञवाटमटन्ती सा पुत्रांस्तानपराजितान् ।
पश्यन्ती यज्ञमाहात्म्यं मुदं लेभे च माधवी ।
असंस्पृशन्तं वसुधां ययातिं नाहुषं तदा ।
दिविष्ठं प्राप्तमाज्ञाय ववन्दे पितरं तदा । [15]
तदा वसुमनाः पृच्छन्मातरं वै तपस्विनीम् ।
वसुमनाः ।
भवत्या यत्कृतमिदं वन्दनं पादयोरिह ।
कोऽयं देवोपमो राजा यमभिवन्दसि मे वद ।
माधवी ।
शृणुध्वं सहिताः पुत्रा नाहुषोऽयं पिता मम ।
ययातिर्मम पुत्राणां मातामह इति स्मृतः । [20]
पूरुं मे भ्रातरं राज्ये समावेश्य दिवं गतः ।
केन वा कारणेनैवमिह प्राप्तो महायशाः ।
वैशंपायन ।
तस्यास्तद्वचनं श्रुत्वा स्वर्गाद्भ्रष्टेति चाब्रवीत् ।
सा पुत्रस्य वचः श्रुत्वा सम्भ्रमाविष्टचेतना ।
माधवी पितरं प्राह दौहित्रपरिवारितम् । [25]
माधवी ।
तपसा निर्जितांल्लोकान्प्रतिगृह्णीष्व मामकान् ।
पुत्राणामिव पौत्राणां धर्मादधिगतं धनम् ।
स्वार्थमेव वदन्तीह ऋषयो धर्मपाठकाः ।
तस्माद्दानेन तपसा चास्माकं दिवमाव्रज ।
ययाति ।
यदि धर्मफलं ह्येतच्छोभनं भविता तव । [30]
दुहित्रा चैव दौहित्रैस्तारितोऽहं महात्मभिः ।
तस्मात्पवित्रं दौहित्रमद्य प्रभृति पैतृके ।
त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः ।
त्रीणि चात्र प्रशंसन्ति शौचमक्रोधमत्वराम् ।
भोक्तारं परिवेष्टारः श्रावितारः पवित्रकाः । [35]
दिवसस्याष्टमे भागे मन्दीभवति भास्करे ।
स कालः कुतपो नाम पितॄणां दत्तमक्षयम् ।
तिलाः पिशाचाद्रक्षन्ति दर्भा रक्षन्ति राक्षसात् ।
रक्षन्ति श्रोत्रियाः पङ्क्तिं यतिभिर्भुक्तमक्षयम् ।
लब्ध्वा पात्रं तु विद्वांसं श्रोत्रियं सुव्रतं शुचिम् । [40]
स कालः कालतो दत्तं नान्यथा काल इष्यते ।
वैशंपायन ।
एवमुक्त्वा ययातिस्तु पुनः प्रोवाच बुद्धिमान् ।
सर्वे ह्यवभृथस्नातास्त्वरध्वं कार्यगौरवात् ।

53

After 1. 92 24[ab], D1 (suppl fol *sec m*) S ins..

बभूव सर्वलोकस्य सत्यवागिति संमतः ।
पीनस्कन्धो महाबाहुर्मत्तवारणविक्रमः ।
अन्वितः परिपूर्णार्थैः सर्वैर्नृपतिलक्षणैः ।
अमात्यसंपदोपेतः क्षत्रधर्मविशेषवित् ।
वशे चक्रे महीमेको विजित्य वसुधाधिपान् । [5]
वेदानागमयत्कृत्स्नान्राजधर्मांश्च सर्वदा ।
ईजे च बहुभिः सत्रैः क्रतुभिर्भूरिदक्षिणैः ।
तर्पयामास विप्रांश्च वेदाध्ययनकोविदान् ।
रत्नैरुच्चावचैर्गोभिर्ग्रामैरश्वैर्धनैरपि ।
वयोरूपेण संपन्नः पौरुषेण बलेन च । [10]
ऐश्वर्येण प्रतापेन विक्रमेण धनेन च ।
वर्तमानं च सत्येन सर्वधर्मविशारदम् ।
स महीपं महीपालाः राजराजमकुर्वत ।
वीतशोकभयाबाधाः सुखस्वप्नप्रबोधनाः ।
श्रिया भरतशार्दूल समपद्यन्त भूमिपाः । [15]
शंतनुप्रमुखैर्गुप्तं राजाधिपतिभिर्जगत् ।
नियमैः सर्ववर्णानां ब्रह्मोत्तरमवर्तत ।
ब्राह्मणाभिमुखं क्षत्रं क्षत्रियाभिमुखा विशः ।
ब्रह्मक्षत्रानुलोमाश्च शूद्राः पर्यचरन्विशः ।
एवं पशुवराहाणां तथैव मृगपक्षिणाम् । [20]
शंतनावथ राजस्थे नावर्तत वृथा वधः ।
असुखानामनाथानां तिर्यग्योनिषु वर्तताम् ।
स एव राजा सर्वेषां भूतानामभवत्पिता ।
स हस्तिनाम्नि धर्मात्मा विहरन्कुरुनन्दनः ।
तेजसा सूर्यकल्पोऽभूद्वायुना च समो बले । [25]
अन्तकप्रतिमः कोपे क्षमया पृथिवीसमः ।
बभूव राजा सुमतिः प्रजानां सत्यविक्रमः ।
स वनेषु च रम्येषु शैलप्रस्रवणेषु च ।

☞ This passage is an anticipation of 1 94 1-17 (*q v*)

52

(L. 5) T1 G1-6 वपायास्तु (for च पापिष्ठा), and नराधिपा — (L. 23) G3 subst for the posterior half
मानाढ्यो नृपोत्तम ।
अवगिलद्वसुमनुपुत्रा माधवीं मातरं तदा ।
— (L. 24) G3 पुत्राणां (for पुत्रस्य) — (L. 28) T1 G1-6 वेदपारगा (for धर्मपा°) — After line 32, T1 G1-6 ins
भविष्यति न संदेहः पितॄणां प्रीतिवर्धनम् ।

53

(L 1) T G1, 2, 6 सत्तम, M1 विश्रुत° (for संमत°) — (L 7) M चाप्त° (for भूरि°)

54

After 1 94. 64, S (which om 65-66) ins

अपत्यफलसंयुक्तमेतच्छ्रुत्वा पितुर्वच ।
सूतं भूयोऽपि संतप्त आह्वयामास वै पितु ।
सूतस्तु कुरुमुख्यस्य उपयातस्तदाज्ञया ।
तमुवाच महाप्राज्ञो भीष्मो वै सारथिं पितु ।
त्वं सारथे पितुर्मह्यं सखासि रथधूर्गतः । [5]
अभिजानासि यदि वै कस्यां भावो नृपस्य तु ।
एतदाचक्ष्व मे पृष्ट करिष्ये न तदन्यथा ।

सूत ।

दाशकन्या नरश्रेष्ठ तत्र भाव पितुर्गत ।
वृत स नरदेवेन सदा वचनमब्रवीत् ।
योऽस्यां पुमान्भवेद्गर्भः स राजा त्वदनन्तरम् । [10]
नाकामयत तं दातु पिता तव वर तदा ।
स चापि निश्चयस्तस्य न च दद्यामतोऽन्यथा ।
एव ते कथित वीर कुरुष्व यदनन्तरम् ।

वैशंपायन ।

तत स पितुराज्ञाय मतं सम्यगवेक्ष्य च ।
ज्ञात्वा विमनस पुत्र प्रययौ यमुना प्रति । [15]

☞ The passage is followed by 1 94 67 (*q v*)

55

After 1 96 53*, K4 (suppl. fol.) D4 (suppl fol *sec m*) S ins

नैनामिच्छत्कथंचन ।
अम्बामन्यस्य कीर्त्यन्तीमब्रवीच्चारुदर्शनाम् ।

विचित्रवीर्य ।

प्रत्यक्षफल एवैष कामोऽसाधुर्निरर्थक ।
परतल्पोपभोगे मामार्य नायोक्तुमर्हसि ।

भीष्म ।

प्रतिष्ठित शंतनोर्वै तात यस्य त्वमन्वय । [5]
अकामवृत्तो धर्मात्मन्साधु मन्ये मत तव ।
इत्युक्त्वाम्बां समालोक्य विधिवद्वाक्यमब्रवीत् ।
विसृष्टा ह्यसि गच्छ त्व यथाकाममनिन्दिते ।
नानियोज्ये समर्थोऽह नियोक्तु भ्रातर प्रियम् ।
अन्यभावगता चापि को नारीं वासयेद्गृहे । [10]
अतस्त्वा न नियोक्ष्यामि अन्यकामासि गम्यताम् ।
अहमप्यूर्ध्वरेता वै निवृत्तो दारकर्मणि ।
न सबन्धस्तदावाभ्या भविता वै कथचन ।

वैशंपायन ।

इत्युक्ता सा गता तत्र सखीभि परिवारिता ।
निर्दिष्टा हि शनै राजन्साल्वराजपुर प्रति । [15]
अथाम्बा साल्वमागम्य साब्रवीन्मनसा वृता ।
पुरा निर्दिष्टभावा त्वामागतास्मि वरानन ।
देवव्रत समुत्सृज्य सानुजं भरतर्षभम् ।
प्रतिगृह्णीष्व भद्र ते विधिवन्मां समुद्यताम् ।
तथैवमुक्त साल्वोऽपि प्रहसन्निदमब्रवीत् । [20]
निर्जितासीह भीष्मेण मा विनिर्जित्य राजसु ।
अन्येन निर्जितां भद्रे विसृष्टा तेन चालयात् ।
न गृह्णामि वरारोहे तत्र चैव तु गम्यताम् ।
इत्युक्ता सा समागम्य भीष्म पुनरथाब्रवीत् ।
अम्बाब्रवीत्ततो भीष्म त्वयाहं सहसा हृता । [25]
क्षत्रधर्ममवेक्षस्व त्व भर्ता मम धर्मत ।
यां य स्वयवरे कन्यां निर्जयेच्छौर्यसंपदा ।
राज्ञ सर्वान्विनिर्जित्य स तामुद्वाहयेद्ध्रुवम् ।
अतस्त्वमेव भर्ता मे त्वयाह निर्जिता यत ।
तस्माद्वहस्व मा भीष्म निर्जिता सतदि त्वया । [30]
ऊर्ध्वरेता ह्यहमिति प्रत्युवाच पुनः पुन ।
भीष्मं सा चाब्रवीदम्बा यथाजैषीस्तथा कुरु ।
एवमन्वगमद्भीष्म षट् समा पुष्करेक्षणा ।
ऊर्ध्वरेतास्त्वह भद्रे विवाहविमुखोऽभवम् ।
तमेव साल्व गच्छ त्व य पुरा मनसा वृत । [35]
अन्यसक्तं किमर्थं त्वमात्मानमवद. पुरा ।
अन्यसक्तां वधू कन्यां वासयेत्स्वगृहे न हि ।
नाहमुद्वाहयिष्ये त्वा मम भ्रात्रे यवीयसे ।
विचित्रवीर्याय शुभे यथेष्ट गम्यतामिति ।
भूय साल्व समभ्येत्य राजन्गृह्णीष्व मामिति । [40]
नाह गृह्णाम्यन्यजितामिति साल्वनिराकृता ।
ऊर्ध्वरेतास्त्वहमिति भीष्मेण च निराकृता ।
अम्बा भीष्म पुन साल्व भीष्म साल्व पुन पुन ।
गमनागमनेनैवमनैषीत्षट् समा नृप ।
अश्रुभिर्भूमिमुक्षन्ती शोचन्ती सा मनस्विनी । [45]
पीनोन्नतकुचद्वन्द्वा विशालजघनेक्षणा ।
श्रोणीभरालसगमा राकाचन्द्रनिभानना ।
वर्षत्कादम्बिनीमूर्ध्नि स्फुरन्ती चञ्चलेव सा ।
सा ततो द्वादश समा बाहुदामभितो नदीम् ।
पार्श्वे हिमवतो रम्ये तपो घोर समाददे । [50]
संक्षिप्तकरणा तत्र तप आस्थाय सुव्रता ।
पादाङ्गुष्ठेन सातिष्ठदकम्पन्त तत सुरा ।

54

(L. 5) G3 रथमागत°, G1 3 सरथूगत°, G5 रथधुर्यत° — (L. 6) T1 G1-3 अपि (for अभि) — (L 8) T1 G1-3 M दाशकन्यां G1.3 M3 तव (for तत्र)

तस्यास्तु तपो दृष्ट्वा सुराणां क्षोभकारकम् ।
विस्मितश्चैव हृष्टश्च तस्यानुग्रहबुद्धिमान् ।
अनन्तसेनो भगवान्कुमारो वरदः प्रभुः । [55]
मानयन्राजपुत्रीं तां ददौ तस्यै शुभां स्रजम् ।
एषा पुष्करिणी दिव्या यथावत्समुपस्थिता ।
अम्बे त्वच्छोकशमनी माला भुवि भविष्यति ।
एतां चैव मया दत्तां मालां यो धारयिष्यति ।
सोऽस्य भीष्मस्य निधने कारणं वै भविष्यति । [60]

Colophon

अम्बा ।
अन्यपूर्वेति मां साल्वो नाभिनन्दति बालिशः ।
साहं धर्माच्च कामाच्च विहीना शोकधारिणी ।
अपतिः क्षत्रियान्सर्वानाक्रन्दामि समन्ततः ।
इयं च क्षत्रिया माला या भीष्मं निहनिष्यति ।
अहं च भार्या तस्य स्यां यो भीष्मं घातयिष्यति । [65]
वैशंपायनः ।
तस्याश्चङ्क्रम्यमाणाया समाः पञ्च गताः पराः ।
नाभवच्छरणं कश्चित्क्षत्रियो भीष्मजाद्भयात् ।
अगच्छत्सोमकं साम्बा पाञ्चालेषु यशस्विनम् ।
सत्यसंधं महेष्वासं सत्यधर्मपरायणम् ।
सा सभाद्वारमागम्य पाञ्चालैरभिरक्षितम् । [70]
पाञ्चालराजमाक्रन्दत्प्रगृह्य सुभुजा भुजौ ।
अम्बा ।
भीष्मेण हन्यमानां मां मज्जन्तीमिव च ह्रदे ।
यज्ञसेनाभिधावेह पाणिमालम्ब्य चेश्वर ।
तेन मे सर्वधर्माश्च रतिभोगाश्च केवलाः ।
उभौ च लोकौ कीर्तिश्च समूलौ सफलौ हृतौ । [75]
क्रोशन्त्येव न विन्दामि राजन्यं शरणं क्वचित् ।
किं नु निःक्षत्रियो लोको यत्रानाथोऽस्मीति ।
समागम्य तु राजानो मयोक्ता राजसत्तमाः ।
इक्ष्वाकूणां तु ये वृद्धाः पाञ्चालानां च ये वराः ।
त्वत्प्रसादाद्द्वियाहेऽस्मिन्मा धर्मो मा पराजयेत् । [80]
प्रसीद यज्ञसेनेह गतिर्मे भव सोमक ।
यज्ञसेनः ।
जानामि त्वां बोधयामि राजपुत्रि विशेषतः ।
यथाशक्ति यथाधर्मं बलं संधारयाम्यहम् ।
अन्यस्मात्पार्थिवात्त्वत्ते भयं स्यात्पार्थिवात्मजे ।
तस्यापनयने हेतुं संविधातुमहं प्रभुः । [85]
न हि शांतनवस्याहं महास्त्रस्य प्रहारिणः ।
ईश्वरः क्षत्रियाणां हि बलं धर्मोऽनुवर्तते ।
सा साधु व्रज कल्याणि न मां भीष्मो दहेद्बलात् ।
न हि भीष्मादहं धर्मं शक्तो दातुं कथंचन ।
वैशंपायनः ।
इत्युक्ता स्रजमासज्य द्वारि राज्ञो व्यपाद्रवत् । [90]
व्युदस्तां सर्वलोकेषु तपसा संशितव्रताम् ।
तामन्वगच्छद्द्रुपदः सान्त्वं जल्पन्पुनः पुनः ।
स्रजं गृहाण कल्याणि न नो वैरं प्रसञ्जय ।
अम्बा ।
एवमेव त्वया कार्यमिति स प्रतिकाङ्क्षते ।
न तु तस्यान्यथा भावो दैवमेतदमानुषम् । [95]
यश्चैनां स्रजमादाय स्वयं वै प्रतिमोक्षते ।
स भीष्मं समरे हन्ता मम धर्मप्रणाशनम् ।
वैशंपायनः ।
तां स्रजं द्रुपदो राजा कंचित्कालं ररक्ष सः ।
ततो विस्रम्भमास्थाय तूष्णीमेतामुपेक्षत ।
तां शिखण्डिन्यवध्नात्तु बाला पितुरवज्ञया । [100]
तां पिता त्वत्यजच्छीघ्रं त्रस्तो भीष्मस्य किल्बिषात् ।
इषीकं ब्राह्मणं भीता साभ्यगच्छत्तपस्विनम् ।
गङ्गाद्वारि तपस्यन्तं तुष्टिहेतोस्तपस्विनी ।
उपचाराभितुष्टस्तामब्रवीदृषिसत्तमः ।
गङ्गाद्वारे विभजनं भविता नचिरादिव । [105]
तत्र गन्धर्वराजानं तुम्बुरुं प्रियदर्शनम् ।
आराधयितुमीहस्व सम्यक्परिचरस्व तम् ।
अहमप्यत्र सांनिध्यं कर्तास्मि तव शोभने ।
तं तदाचर भद्रं ते स ते श्रेयो विधास्यति ।

55

Through oversight K_4 was omitted from the list of MSS containing this passage, given in the footnotes to 1 96 53 — (L 1) M अथा (for एतां) — (L 3) K_4 D_4 M_6 पापस्य पाप्मन्, M_8 अल्पस्य°, M_{6-8} असार° (for मत्स्य°) — (L 5) D_4 M प्रातिष्ठच्छातवतोर्वंश° — (L 16) K_4 D_4 M प्रतिपूज्य तत् (for ननन्दा पुत्रा) — (L 18) T_1 $G_{1,3,6}$ M_8 पुष्पांग (for भरत°) — After line 25, G_1 ins

स्वयंवरे राजमध्ये त्वया ह प्रथमं वृता ।

— K_4 T_1 M (except M_8) om lines 27–30, T_2 om 27–31, G_6 om 27–33 — (L 31) M (except M_8) पूर्वमेवोक्तवांस्त्वं (for the posterior half) — K_4 T_1 M_8 om lines 34–44, T_2 om 34–49 K_4 D_4 T_1 M (except M_8) om lines 46–48 — (L 57) K_4 D_4 $G_{1,3,6}$ M_8 समुपस्थिता — Colophon *Adhy no* T_1 97, T_2 47; G M 48 D_4 $G_{3,6}$ M_{6-8} om line 78 — (L 88) K_4 T_2 M_8 भजिष्यते, T_1 G_3 अभिभवेत्, $G_{1,3}$ अभिद्रवेत् (for भीष्मो दहेत्) — After line 88, $G_{3,6,8}$ M_8 ins

न प्रत्यवगमे भीष्मे कथितेन न वैरवत् ।

ततो विमजन तत्र गन्धर्वाणामवर्तत । [110]
तत्र द्वाववशिष्येता गन्धर्वावमितौजसौ ।
तयोरेक समीक्ष्यैना स्त्रीत्वमूपुरुवाच ह ।
इद गृह्णीष्व पुलिङ्ग वृणे स्त्रीलिङ्गमेव ते ।
नियम चक्रतुस्तत्र स्त्री पुमाश्चैव तावुभौ ।
तत पुमान्समभवच्छिखण्डी परवीरहा । [115]
स्त्री भूत्वा ह्यपचक्राम स गन्धर्वो मुदान्वित ।
लब्ध्वा तु महतीं प्रीतिं याज्ञसेनिर्महायशा ।
ततो ग्रुहुदकं गत्वा पुनरस्त्राणि सोऽकरोत् ।
तत्र चास्त्राणि दिव्यानि कृत्वा स सुमहाद्युति ।
स्वदेशमभिसपेदे पाञ्चाल कुरुनन्दन । [120]
सोऽभिवाद्य पितु पादौ महेष्वास कृताञ्जलि ।
उवाच भवता भीष्माच्च भेतव्य कथंचन ।

Colophon.

वैशंपायन ।

अम्बाया निर्गताया तु भीष्म शातनवस्तदा ।
न्यायेन कारयामास राज्ञो वैवाहिकीं क्रियाम् ।
अम्बिकाम्बालिके चैव परिणीयाग्निसंनिधौ । [125]

☞ This passage (55), which is followed by a *repetition* (with v l.) of 1 96 53[ab], is a version (much abbreviated and in many respects discrepant) of the Ambopākhyāna (in the Udyoga) The repetition of 1 96 53[ab], is an unmistakable sign that the passage is an interpolation here

56

S ins after 1 98 17 Dn, after 1038* D4 (suppl fol *sec m*), after line 1 of 1038*

पुत्रलाभाद्य सा पत्नी न तुतोष पतिं सदा ।
प्रद्विषन्तीं पतिर्भार्यां किं मां द्वेक्षीति चाब्रवीत् ।
पत्नी ।
पतिर्भार्यानुभरणाद्भर्ता चेति प्रकीर्त्यते ।
अह त्वा भरण कृत्वा जात्यन्धं ससुता सदा ।
नित्यकालं श्रमेणार्ता न भरेय महातप । [5]
भीष्म ।
तस्यास्तद्वचनं श्रुत्वा ऋषि कोपसमन्वित ।
प्रत्युवाच तत पत्नीं प्रद्वेषीं ससुतां तदा ।
नीयता क्षत्रियकुले धनार्थी त्व भविष्यसि ।
पत्नी ।
त्वया दत्त धन विप्र नेच्छेय दु खकारकम् ।
यथेष्ट कुरु विप्रेन्द्र न भरेय यथा पुरा । [10]
दीर्घतमा ।
अद्य प्रभृति मर्यादा मया लोके प्रतिष्ठिता ।
एक एव पतिर्नार्या यावज्जीव परायणम् ।
मृते जीवति वा तस्मिन्नापर प्राप्नुयान्नरम् ।
अभिगम्य पर नारी पतिष्यति न सशय ।
अपतीनां तु नारीणामद्य प्रभृति पातकम् । [15]
यद्यस्ति चेद्धन सर्वं वृथाभोगा भवन्तु ता ।
अकीर्ति परिवादश्च नित्यकाल भवन्तु वै ।
भीष्म ।
तस्य तद्वचन श्रुत्वा ब्राह्मणी भृशकोपिता ।
गङ्गामानीयतामेष पुत्रा इत्येवमब्रवीत् ।

☞ It should be noted that here the text of the vulgate contains an injudicious juxtaposition of two interpolations from two separate and unconnected sources, so inharmonious that the first half of 1 104 29 of the Bombay ed remains hanging in the air! Cf Winternitz, *JRAS* 1897. 723f. (with footnote)

57

After वैशपायन of 1 99 3, S (which om उवाच) ins

भीष्मस्य तु वच श्रुत्वा धर्म्यं हेत्वर्थसहितम् ।
माता सत्यवती भीष्म पुनरेवाभ्यभाषत ।

— G6 (hapl) om from the posterior half of line 88 to the prior half of 93 (inclusive) — (L. 100 and 107) K4 T1 G M3 अजानदी (for अवश्या), and परिचरेविंम् — (L. 114) K4 D4 M स्त्रीत्वे पुरुत्वे च तावुभौ — Colophon *Adhy no* T1 98, T2 48, G M 49

56

(L 1) Dn °लाभा च — (L. 2) Dn G4 मां द्वेक्षीति — (L. 3) Dn T1 M भार्याया भरणाद्भर्ता पालनाच्च पति स्मृत. — (L. 4) Dn D4 T1 G3 ससुत — (L. 9) Dn D4 M6-8 दु खकारणम् — (L. 10) Dn T1 G3 6 transp यथा and पुरा — (L. 12) G (except G1 3) पत्न्या (for नार्या) — (L. 13) T2 G (except G3 6) तस्मिन्न परं — (L. 17) Dn T1 M (except M3) °वादाश्च Dn D4 G6 M6-8 नित्य तासां (for नित्यकाल) — (L 18) Dn M3 इति (for तस्य) — (L. 19) Dn D4 गगायां नीय°.

सत्यवती ।
औचथ्यमधिकृत्येदमद्य च यदुदाहृतम् ।
पौराणी श्रुतिरित्येषा प्राप्तकालमिदं कुरु ।
त्वं हि पुत्र कुलस्यास्य ज्येष्ठः श्रेष्ठश्च भारत । [5]
यथा च ते पितुर्वाक्यं मम कार्यं तथानघ ।
मम पुत्रस्तव भ्राता यवीयान्सुप्रियश्च ते ।
बाल एव गतः स्वर्गं भारतो भरतर्षभ ।
इमे महिष्यौ तस्येह काशिराजसुते उभे ।
रूपयौवनसंपन्ने पुत्रकामे च भारत । [10]
धर्ममेतत्परं ज्ञात्वा संतानाय कुलस्य च ।
आभ्यां मम नियोगात्तु धर्मं चरितुमर्हसि ।
भीष्म. ।
असंशयं परो धर्मस्त्वया मातः प्रकीर्तितः ।
त्वमप्येतां प्रतिज्ञां तु वेत्थ या परमा मयि ।
जानीषे यत्तदा वृत्तं शुल्कहेतोस्त्वदन्तरे । [15]
तस्मात्सत्यवति सत्यं वै पुनरेव ब्रवीमि ते ।
तत्र जात्वन्यथा कार्यं लोकानामपि संक्षये ।
परित्यजेयं त्रैलोक्यं राज्यं देवेषु वा पुनः ।
यद्वाप्यधिकमेताभ्यां न तु सत्यं परित्यजे ।
त्यजेच्च पृथिवी गन्धमापश्च रसमुत्तमम् । [20]
ज्योतिश्च परमं रूपं वायुः स्पर्शगुणं त्यजेत् ।
त्यजेच्च घोषमाकाशं सोमः शीतत्वमुत्सृजेत् ।
प्रभां समुत्सृजेदर्को धूमकेतुरथोष्णताम् ।
वृत्रहा विक्रमं जह्याद्धर्मं जह्याच्च धर्मराट् ।
अमरत्वस्य वा हेतोस्त्रैलोक्यसदनस्य वा । [25]
उत्सृजेयमहं प्राणान्न तु सत्यं कथंचन ।
सत्यवती ।
जानामि त्वयि धर्मज्ञ सत्यं सत्यवतां वर ।
इच्छंस्त्वमिह लोकांस्त्रीन्सृजेरन्यानरिंदम ।
यथा तु च कुलं चैव धर्मश्च न पराभवेत् ।
सुहृदश्च सुहृष्टाः स्युस्तथा त्वं कर्तुमर्हसि । [30]
भीष्म ।
त्वमेव कुलवृद्धासि गौरवं तु परं त्वयि ।
सोपायं कुलसंताने वक्तुमर्हसि न परम् ।
स्त्रियो हि परमं गुह्यं धारयन्ति कुले कुले ।
पुरुषांश्चापि मायाभिर्यद्वीभिरुपगृह्णते ।
सा सत्यवति संपश्य धर्मं सत्यपरायणे । [35]
यथा न जह्यां सत्यं च न सीदेच्च कुलं हि नः ।
वैशंपायन. ।

☞ Lines 7–30 above are a *repetition* (with v l) of 1. 97. 8–10, 13–18, 20 and 22

58

After 1 104 9, N ins ·

तां समासाद्य देवस्तु विवस्वानिदमब्रवीत् ।
अयमस्म्यसितापाङ्गे ब्रूहि किं करवाणि ते ।
कुन्त्युवाच ।
कश्चिन्मे ब्राह्मणः प्रादाद्वरं विद्यां च शत्रुहन् ।
तद्विजिज्ञासयाह्वानं कृतवत्यस्मि ते विभो ।
तदस्मिन्नपराधे त्वां शिरसाभिप्रसादये । [5]
योषितो हि सदा रक्ष्याः स्वपराद्धापि नित्यदा ।
सूर्य उवाच ।
वेदाहं सर्वमेवैतद्यद्दुर्वासा ददौ तव ।
सत्यज्योमे मानभये क्रियतां संगमो मया ।
अमोघं दर्शनं मह्यमाहूतश्चास्मि ते शुभे ।

57

(L. 1) T G1–6 वचनं (for तु वच) — (L 6) T1 तदा कुरु, G1 2 6 तथानघ (for तवा°) — (L 14) T2 G1 5 मयि वर्तते (for परमा मयि) — (L 17) T2 G3–5 कुर्यां (for कार्यं) — (L. 27) T2 G1–6 सत्यं सत्यपराक्रम, G3 धर्मं सत्यं परंतप — (L 33) T2 G1 5 सदा (for the first कुले)

58

(L 2) K2 Ñ1 2 V1 B D (except D1) °सितापाङ्गि — (L. 3) Ko महर्षि , Ñ2 V1 B1 2 D (except D1) ब्राह्मण (for ब्राह्मणः) — (L 4) Ko 4 Ñ1 2 V1 B D तद् (for यद्) — (L 5) Ko 4 Ñ1 V1 B D एतस्मिन् (for तदस्मिन्) Ñ2 V1 Dn D1 अद्य (for अभि) — (L 6) Ś1 K1 स्वा(K1 स्व)पराधे, Ko 2 4 D2 सापराधा, Ñ V1 B2 Dn2 D1 स्वाप°. Several MSS निलत K3 D5 सापराधा अपि प्रभो — (L. 7) B D2, 4 transp यद् and दुर्वासा Ko 4 Ñ2 V1 D (except D5) यद् ददौ (for ददौ तव) — (L. 8) Ñ1 संभेव शांतमानेन, V1 D11 Dn D1 संलज्ज भयमेवेद, Ñ2 त्यज्यतां भयमेवेद, D1 सत तेमिहिन भरे Ñ1 V1 D (except D2, 4 5) मम (for मया) — (L 10) Ñ1 2 प्रसन्नमागति, Ñ2 V1 B2 D (except D2 4 5) °गानेषि Ñ1 2 गोपोपि स्याद निश्चत°, Ñ2 V1 D (except D2 4 5) दोषं स्याल्प मंतव — (L 11) Ko 2 4 Ñ1 2 V1 B D om सा Ko 2 4 Ñ2 2 V1 B D सात्पूर्वं (for सान्त्व प्र) — (L 12) K2 भारत, V1 Dn D1 2 भारत (for पार्थिव) — (L 13) Ko, 4 Ñ V1 B (except B1) D (except D5) यत्नगिरी (for तप°) — After line 15, D1 marg sec m reads passage No 59 given below — (L 15) Ko 4 V1 D (except D2 4) स (for तु) K2 2 Ñ1 2 V1 B1 D (except D2 4) °राज° (for °भोज°).

ब्रूयाद्दानाद्धि ते भीरु दोषो हि स्यादसंशयम् । [10]

वैशंपायन उवाच ।

एवमुक्ता बहुविधं सान्त्व पूर्वं विवस्वता ।
सा तु नैच्छद्वरारोहा कन्याहमिति पार्थिव ।
बन्धुपक्षभयाद्भीता लज्जया च तपस्विनी ।
तामर्कः पुनरेवेदमब्रवीद्भरतर्षभ ।
मत्प्रसादान्न ते राज्ञि भविता दोष इत्युत । [15]
एवमुक्त्वा तु भगवान्कुन्तिभोजसुतां तदा ।

59

S ins after 1 104 9 D4 (marg sec m), after line 15 of passage No 58 above:

साब्रवीद्भगवन्कस्त्वं प्रादुर्भूतो ममाग्रत ।

सूर्य ।

आहूतोपस्थितं भद्रे ऋषिमन्त्रेण चोदितम् ।
विद्धि मां पुत्रलाभाय देवमर्कं शुचिस्मिते ।
पुत्रस्ते निर्मित सुभ्रु शृणु चारुशुभानने ।
आदित्ये कुण्डले बिभ्रत्कवचं चैव मामकम् । [5]
शस्त्राणामभेद्यं च भविष्यति शुचिस्मिते ।
नास्य किंचिददेयं च ब्राह्मणेभ्यो भविष्यति ।
चोद्यमानो मया चापि न क्षमं चिन्तयिष्यति ।
दास्यते स हि विप्रेभ्यो मानी चैव भविष्यति ।

वैशंपायन ।

एवमुक्ता तत कुन्ती गोपतिं प्रत्युवाच ह । [10]
कन्या पितृवशा चाहं पुत्रार्थो न चैव मे ।

सूर्य ।

यद्येव मन्यसे भीरु किमाह्वयसि भास्करम् ।
यदि मामवजानासि ऋषि स न भविष्यति ।
मद्दानेन यस्य त्वमवलेपेन दर्पिता ।
क्रुद्ध च तं च धक्ष्यामि क्रोधदीप्तेन चक्षुषा । [15]

कुन्ती ।

प्रसीद भगवन्मह्यमवलेपो हि नास्ति मे ।
ममैव परिहार्यं स्यात्कन्याभावस्य दूषणम् ।

सूर्य ।

व्यपयातु भयं तेऽद्य कुमार प्रसमीक्ष्य मे ।
मया त्वं चाप्यनुज्ञाता पुन कन्या भविष्यसि ।

वैशंपायन ।

एवमुक्ता तत कुन्ती संप्रहृष्टतनूरुहा । [20]
संगता च तत सुभ्रूरादित्येन महात्मना ।

60

After 1 104. 17, D4 (marg sec m) S ins:

तत काले तु कस्मिंश्चित्स्वप्नान्ते कर्णमब्रवीत् ।
आदित्यो ब्राह्मणो भूत्वा शृणु वीर वचो मम ।
प्रभातायां रजन्यां त्वामागमिष्यति वासव ।
न तस्य भिक्षा दातव्या विप्ररूपी भविष्यति ।
निश्चयोऽस्यापहर्तुं ते कवचं कुण्डले तथा । [5]
अतस्त्वां बोधयाम्येष स्मरासि वचनं मम ।

कर्ण ।

शक्रो मां विप्ररूपेण यदि वै याचते द्विज ।
कथं तस्मै न दास्यामि यथा चास्म्यवबोधित ।
विप्रा पूज्यास्तु देवानां सततं प्रियमिच्छताम् ।
तं देवदेवं जानंश्च न शक्तोऽस्म्यवमर्षणे । [10]

सूर्य ।

यद्येवं शृणु मे वीर वरं ते सोऽपि दास्यति ।
शक्तिं त्वमपि याचेथा सर्वशत्रुविघातिनीम् ।

वैशंपायन ।

एवमुक्त्वा द्विज स्वप्ने तत्रैवान्तरधीयत ।
कर्ण प्रबुद्धस्तु स्वप्नं चिन्तयानोऽभवत्तदा ।

61

For 1 105 4-7, K4 Ñ B D subst:

कुन्त्या पाण्डोश्च राजेन्द्र कुन्तिभोजो महीपति ।
कृत्वोद्वाहं तदा तं तु नानावसुभिरर्चितम् ।
स्वपुरं प्रेषयामास स राजा कुरुसत्तमम् ।
ततो बलेन महता नानाध्वजपताकिना ।
स्तूयमान स चाशीर्भिर्ब्राह्मणैश्च महर्षिभि । [5]
संप्राप्य नगरं राजा पाण्डु कौरवनन्दन ।
न्यवेशयत तां भार्यां कुन्तीं स्वभवने प्रभु ।

Colophon.

वैशंपायन उवाच ।

तत शांतनवो भीष्मो राज्ञ पाण्डोर्यशस्विन ।
विवाहस्यापरस्यार्थे चकार मतिमान्मतिम् ।

59

(L. 9) D4 T2 G2.4.5 दास्यत्येव हि विप्रे°. — (L. 18) T1 G1 M1-3 प्रसीदस्व, G3 प्रसीदस्व शुभे

60

(L. 9) D4 G6 M6-8 द्विज मे (M6-8 द्विजन, ...) — (L. 12) D4 G1.6 M3 °शत्रुविनाशिनीं, D4 °शत्रुनिवारिणीं

61

D4 om line 1 — For details of colophon see footnotes on p. 471 — (L. 17) Dn D1 2 पुत्रार्थिन (for वरा°) — (L 30) Ñ2 Dn D1 धनाधिप (for महा°) — (L. 41) K4 B1.2 Dn D1.4 पुरीं (for पुरं) K4 Ñ B1.4.6 Da2 D2.4 प्रहृष्टो — (L. 49) K4 Ñ B1 Dn1 n2

सोऽमात्यैः स्थविरैः सार्धं ब्राह्मणैश्च महर्षिभिः। [10]
बलेन चतुरङ्गेन ययौ मद्रपतेः पुरम्।
तमागतमभिश्रुत्य भीष्मं वाह्लीकपुंगवः।
प्रत्युद्गम्यार्चयित्वा च पुरं प्रावेशयन्नृप।
दत्त्वा तस्यासनं शुभ्रं पाद्यमर्घ्यं तथैव च।
मधुपर्कं च मद्रेशः पप्रच्छागमनेऽर्थिताम्। [15]
तं भीष्मः प्रत्युवाचेदं मद्रराजं कुरूद्वहः।
आगतं मां विजानीहि वरार्थिनमरिंदम।
श्रूयते भवतः साध्वी स्वसा माद्री यशस्विनी।
तामहं वरयिष्यामि पाण्डोरर्थे यशस्विनीम्।
युक्तरूपो हि संबन्धे त्वं नो राजन्वयं तव। [20]
एतत्संचिन्त्य मद्रेश गृहाणास्मान्यथाविधि।
तमेववादिनं भीष्मं प्रत्यभाषत मद्रप।
न हि मेऽन्यो वरस्त्वत्तः श्रेयानिति मतिर्मम।
पूर्वैः प्रवर्तितं किंचित्कुलेऽस्मिन्नृपसत्तमैः।
साधु वा यदि वासाधु तन्नातिक्रान्तुमुत्सहे। [25]
व्यक्तं तद्भवतश्चापि विदितं नात्र संशयः।
न च युक्तं तथा वक्तुं भवान्देहीति सत्तम।
कुलधर्मः स नो धीर प्रमाणं परमं च तत्।
तेन त्वां न ब्रवीम्येतदसंदिग्धं वचोऽरिहन्।
तं भीष्मः प्रत्युवाचेदं मद्रराजं महामतिः। [30]
धर्म एष परो राजन्स्वयमुक्तः स्वयंभुवा।
नात्र कश्चन दोषोऽस्ति पूर्वैर्विधिरयं कृतः।
विदितेयं च ते शल्य मर्यादा साधुसंमता।
इत्युक्त्वा स महातेजाः शातकुम्भं कृताकृतम्।
रत्नानि च विचित्राणि शल्यायादात्सहस्रशः। [35]
गजानश्वान्रथांश्चैव वासांस्याभरणानि च।
मणिमुक्ताप्रवालं च गाङ्गेयो व्यसृजच्छुभम्।
तत्प्रगृह्य धनं सर्वं शल्यः संप्रीतमानसः।
ददौ तां समलंकृत्य स्वसारं कौरवर्षभे।
स तां माद्रीमुपादाय भीष्मः सागरगासुतः। [40]
आजगाम पुरं धीमान्प्रविष्टो गजसाह्वयम्।
तत इष्टेऽहनि प्राप्ते मुहूर्ते साधुसंमते।
जग्राह विधिवत्पाणिं माद्र्याः पाण्डुर्नराधिप।
ततो विवाहे निर्वृत्ते स राजा कुरुनन्दन।
स्थापयामास तां भार्यां शुभे वेश्मनि भाविनीम्। [45]
स ताभ्यां व्यचरत्सार्धं भार्याभ्यां राजसत्तम।
कुन्त्या माद्र्या च राजेन्द्रो यथाकामं यथासुखम्।
ततः स कौरवो राजा विहृत्य त्रिदशा निशाः।
जिगीषया महीं पाण्डुर्निश्चक्राम पुरात्प्रभो।
स भीष्मप्रमुखान्वृद्धानभिवाद्य प्रणम्य च। [50]
धृतराष्ट्रं च कौरव्य तथान्यान्कुरुसत्तमान्।
आमन्त्र्य प्रययौ राजा तैश्चैवाभ्यनुमोदितः।
मङ्गलाचारयुक्ताभिराशीर्भिश्चाभिनन्दितः।
गजवाजिरथौघेन बलेन महतागमत्।
स राजा देवराजाभो विजिगीषुर्वसुंधराम्। [55]
हृष्टपुष्टबलः प्रायात्पाण्डुः शत्रूननेकशः।

62

This passage, which in the footnotes to the constituted text is said to be ins in G$_3$ after 1 107. 24, is not an insertion peculiar to G$_3$, but occurs, as a matter of fact, in all S MSS and is nothing more than the S version of the account of the birth of Bhima. An irregularity in the collation of the S MSS was responsible for the misleading remark in the footnotes mentioned above

63

After adhy. 107, all MSS except Ś$_1$ K$_{0-3}$ (V$_1$ missing) ins. the foll addl adhy.

जनमेजय उवाच।
धृतराष्ट्रस्य पुत्राणामादितः कथितं त्वया।
ऋषेः प्रसादात्तु शतं न च कन्या प्रकीर्तिता।
वैश्यापुत्रो युयुत्सुश्च कन्या चैका शताधिका।
गान्धारराजदुहिता शतपुत्रेति चानघ।
उक्ता महर्षिणा तेन व्यासेनामिततेजसा। [5]
कथं त्विदानीं भगवन्कन्या जाता ब्रवीषि मे।
यदि भागशतं पेशी कृता तेन महर्षिणा।
न प्रजास्यति चेद्भूयः सौबलेयी कथंचन।
कथं तु संभवस्तस्या दुःशलाया वदस्व मे।
यथार्हमिह विप्रर्षे परं मेऽत्र कुतूहलम्। [10]
वैशंपायन उवाच।
साध्वयं प्रश्न उद्दिष्टः पाण्डवेय ब्रवीमि ते।
तां मांसपेशीं भगवान्स्वयमेव महातपाः।
शीताभिरद्भिरासिच्य भागं भागमकल्पयत्।

D$_{2\,3}$ गिर(or रा)भागत — (L 53) B$_3$ D (except D$_{3\,4}$) om. च — After line 53, Ñ$_1$ ins (with v 1) 1.105 6. — (L. 55) Dn D$_1$ देवगभाभो — (L. 56) Dn D$_{1\,2}$ °पुष्टरे.

63

(L 2) S ऋषेर्नैवाससुधरा S तु (for न) T$_1$ G$_{1\,2}$ M$_{2\,3}$ अद्य (for प्र) — (L 3) K$_4$ B$_3$ T$_1$ G वैश्या°. S द्वाविंश च द्विज (for the posterior half) — S om line 4 — (L 5)

यो यथा कल्पितो भागस्तं तं धात्र्या तदा नृप ।
घृतपूर्णेषु कुण्डेषु एकैकं प्राक्षिपत्तदा । [15]
एतस्मिन्नन्तरे साध्वी गान्धारी सुदृढव्रता ।
दुहितृस्नेहसंयोगमनुध्याय वराङ्गना ।
मनसाचिन्तयद्देवी एतत्पुत्रशतं मम ।
भविष्यति न संदेहो न ब्रवीत्यन्यथा मुनिः ।
ममेयं परमा तुष्टिर्दुहिता मे भवेद्यदि । [20]
एका शताधिका बाला भविष्यति कनीयसी ।
ततो दौहित्रजाल्लोकादबाह्योऽसौ पतिर्मम ।
अधिका किल नारीणां प्रीतिर्जामातृजा भवेत् ।
यदि नाम ममापि स्याद्दुहितैका शताधिका ।
कृतकृत्या भवेयं वै पुत्रदौहित्रसंवृता । [25]
यदि सत्यं तपस्तप्तं दत्तं वाप्यथवा हुतम् ।
गुरवस्तोषिता वापि तथास्तु दुहिता मम ।
एतस्मिन्नेव काले तु कृष्णद्वैपायनः स्वयम् ।
विभज्य तां तदा पेशीं भगवानृषिसत्तमः ।
गणयित्वा शतं पूर्णमंशानामाह सौबलीम् । [30]

व्यास उवाच ।

पूर्णं पुत्रशतं त्वेतन्न मिथ्या वागुदाहृता ।
दैवयोगादयं भाग एकः शिष्टः शतात्परः ।
एषा ते सुभगे कन्या भविष्यति यथेप्सिता ।

वैशंपायन उवाच ।

ततोऽन्यं घृतकुम्भं तु समानाय्य महातपाः ।
तं चापि प्राक्षिपत्तत्र कन्याभागं तपोधनः । [35]
एतत्ते कथितं राजन्दुःशलाजन्म भारत ।
ब्रूहि राजेन्द्र किं भूयो वर्तयिष्यामि तेऽनघ ।

Colophon.

64

After 1 113 10, D1 (marg *sec m*) S ins.

श्वेतकेतोः पिता देवि तपः उग्रं समास्थितः ।
ग्रीष्मे पञ्चतपा भूत्वा वर्षास्वाकाशगोऽभवत् ।
शिशिरे सलिलस्थायी सह पत्न्या महातपाः ।
उद्दालकः तपस्तेपे नियमेन समाहितम् ।
तस्य पुत्रः श्वेतकेतुः परिचर्यां चकार ह । [5]
अभ्यागाच्छद्द्विजः कश्चिद्वलीपलितसंततः ।
तं दृष्ट्वैव मुनिः प्रीतः पूजयामास शाश्वतः ।
स्वागतेन च पाद्येन मृदुवाक्यैश्च भारत ।
शाकमूलफलाद्यैश्च वन्यैरन्यैरपूजयत् ।
क्षुत्पिपासाश्रमैरार्तः पूजितस्तु महर्षिणा । [10]
विश्रान्तो मुनिमासाद्य पर्यपृच्छद्द्विजस्तदा ।
उद्दालक महर्षे त्वं सत्यं मे ब्रूहि मानृतम् ।

S तमाह घृतं [? read धार्तं] राष्ट्रस्य तत्क्षमेतन्महर्षिणा — S om lines 6–8 — (L 6) Ñ1 2 B4 तत्र प्र-; Ñ3 Da2 Dn D1 तत्र तु (for जातां) — (L. 9) S हि (for तु), and भ्रवीहि (for वदस्व) — (L. 10) Om in S Ñ3 D (except D2.4.5) यथावदिह — (L. 12) S तु तदा (for भगवान्), and महामुनि॰ (for ॰तपा) — (L. 13) T G सिञ्चन्वै, M संसिचन् (for आनिन्य) T G अधारयत् (for अकल्पयत्) — (L. 14) S कल्पयते भाग॰ T G त तु धात्रयस वै पृथक्, M त तु धात्री पृथक्पृथक् — (L. 15) B1 D1.2.5 M कुम्भेषु, T2 G2.4.5 चैकैक (for कुण्डेषु) — (L. 16) Ñ1.2 सुमहाव्रता, S सुमहायशा. — After line 16, S ins.

नामवीच ऋषि किंचिद्गौरवाच्च यशस्विनी ।

— (L. 17) Om in S Ñ B1 Dn दुहितुः स्नेह॰ — After line 17, B1 ins.

महर्षिममवीत्किंचिद्गौरवात्मा तपस्विनी ।

— (L. 19) S न चर्षिमापयेत्यथा (M ॰वे मृषा) — (L. 20) T G M1 वै (for इव) M1 6–8 भवेन्मम परा तुष्टिर् — (L 21) S ध्रुवस्यापि (for भविष्यति) — (L. 22) S ॰भजाल्लो कानवाप्स्यामि वदतिर्नम — After line 22, S reads line 25, while D1 ins

अथवा इदमेवैतद्दुहिता सह संगता ।

— (L. 23) S अधिक, and जामातृभिर् — After line 23, D6 S (which latter om line 24 and transp 25) ins

अपत्यं युवतीं चापि दृष्ट्वा प्रीतिमवाप्नुयाम् ।

— (L 25) S अहं च कृतकृत्या स्या दुहिया सह संगता — (L. 26) S वा मे (for तप्तं) and गुरवस्तोषिता यदि — (L. 27) S सुकृतं चेह लोकेऽस्ति (G1.5 M6–8 ॰केऽस्मिन्) तथा॰ — (L. 29) K4 Ñ3 B1 व्यभजयत, Ñ1.2 Da Dn D1 व्यभजत्स, D3 5 व्यभजत्तां (for विभज्य तां) S व्यभजत्सहसा विप्रस्तां पेशीं गर्भसंभवां — (L. 30) S गण्यमानेषु कुण्डेषु शते पूर्णे महात्मना. — After line 30, S ins.

अभवच्चापरं खण्डं वामहस्ते तदा किल ।

— (L. 31) T1 शुभ, T2 G देव, M ह्येतद् (for त्वेतद्) S वागुदीरिता — (L 32) K4 Da Dn D1 5 दौहित्रयोगाय भाग, B1 दौहित्रयोगाद्भागोय Ñ3 D1 परिशिष्ट, S एको दृष्टः. — (L. 33) Several MSS सुभगा — (L. 34) S अन्यद् Da S घृतकुण्ड S आनाय्य सुमहा॰ — (L. 35) S प्राक्षिपत्त तदा राजन्कन्याभागं परंतप — After line 35, D1 (marg. *sec. m*) S ins

संभूता नैव कालेन सर्वेषां च यवीयसी ।

— (L. 36) S वीर (for राजन्) Ñ1.2 चैव हि, S चैव तु (for भारत) — (L. 37) S कथये पांडुनंदन (for the posterior half) — For details of colophon see footnotes on p 480.

ऋषिपुत्र. कुमारोऽय दर्शनीयो विशेषतः।
तव पुत्रमिम मन्ये कृतकृत्योऽसि सद्बद ।
उद्दालक॰।
मम पत्नी महाप्राज्ञ कुशिकस्य सुता मता। [15]
मामेवानुगता पत्नी मम नित्यमनुव्रता।
अरुन्धतीव पत्नीनां तपसा कर्शितस्तनी।
तस्यां जात श्वेतकेतुर्मम पुत्रो महातपाः।
वेदवेदाङ्गविद्विप्र मच्छासनपरायण ।
लोकश्च सर्वलोकेषु विश्रुत. सत्यवागघृणी। [20]
ब्राह्मण॰।
अपूर्वी भार्यया चार्थी वृद्धोऽह मन्दचाक्षुषः।
पित्र्याहृणादनिर्मुक्तः पूर्वमेवाकृतक्रिय ।
प्रजारणी तु पत्नी ते कुलशीलसमाधिनी।
सदृशी मम गोत्रेण वहाम्येनां क्षमस्व वै।
पाण्डु ।
इत्युक्त्वा मृगशावाक्षीं चीरकृष्णाजिनाम्बराम्। [25]
यष्ट्याधार स्रस्तगात्रो मन्दचक्षुरबुद्धिमान्।
स्वव्यापारामक्षमा तामचिन्तामात्मनि द्विजः।

65

After 1 113 12, D3 8 ins

तपसा दीप्तवीर्यो हि श्वेतकेतुर्न चक्षमे।
संगृह्य मातर हस्ते श्वेतकेतुरभाषत ।
दुर्ब्राह्मण विमुञ्च त्वं मातर मे पतिव्रताम्।
अय पिता मे ब्रह्मर्षि क्षमावान्ब्रह्मवित्तम ।
शापानुग्रहयो शक्तस्तूष्णींभूतो महाव्रत । [5]
तस्य पत्नी दमोपेता मम माता विशेषतः।
पतिव्रतां तपोवृद्धा साध्वाचारैरलकृताम्।
अप्रदानेन ते ब्रह्मन्मातृभूता विमुञ्च मे।
एवमुक्त्वा तु याचन्त विमुञ्चेति मुहुर्मुहु ।
प्रत्यवोचद्द्विजो राजन्प्रगल्भमिद वच । [10]
अपत्यार्थी श्वेतकेतो वृद्धोऽह मन्दचाक्षुष ।
पिता ते ऋणनिर्मुक्तस्त्वया पुत्रेण काश्यप।
ऋणादहमनिर्मुक्तो वृद्धोऽह विगतस्पृह ।
मम को दास्यति सुता कन्या सम्प्राप्तयौवनाम्।
प्रजारणीमिमां पत्नीं विमुञ्च त्व महातप । [15]
एकया प्रजया पित्रोर्मातर ते ददाम्यहम्।
एवमुक्त श्वेतकेतुर्लज्जया क्रोधमेयिवान्।

66

After 1 113 40[ab], D4 (suppl fol sec m) ins

यथासौ नीयते दण्ड. सतत पापकारिषु।
दण्डस्य नयनात्सा हि दण्डनीतिरिहोच्यते।
भूय स भगवान्ध्यात्वा चिर शूलधर प्रभु ।
असृजत्सर्वशास्त्राणि महादेवो महेश्वर.।
दण्डनीते प्रयोगार्थं प्रमाणानि च सर्वश॰। [5]
विद्याश्चतस्र कूटस्थास्तासा भेदविकल्पना।
अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तर ।
पुराण धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश।
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति निश्चय.।
अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव तु। [10]
दश चाष्टौ च विख्याता एता धर्मस्य सहिता ।
एतासामेव विद्याना व्यासमाह महेश्वरः।
शतानि त्रीणि शास्त्राणामाह तन्त्राणि सप्तति ।
व्यास एव तु विद्याना महादेवेन कीर्तित.।
तत्रं पाशुपत नाम पाञ्चरात्र च विश्रुतम्। [15]
योगशास्त्र च सांख्यं च तत्र लोकायत तथा।
तत्र प्रसन्नुला नाम तर्कविद्या दिवौकसाम्।
सुखदु खार्थजिज्ञासाकारकश्चेति विश्रुतम्।
तर्कविद्यास्तथा चाष्टौ सश्लोको नय विस्तरः।
दश चाष्टौ च विज्ञेया पौराणां यज्ञसहिता । [20]
पुराणस्य प्रणीताश्च तावदेवेह सहिता.।
धर्मशास्त्राणि तद्वाचः एकार्था नीति नान्यथा।
एकार्थानि पुराणानि वेदाश्चैकार्थसहिता.।
नानार्थानि च सर्वाणि तत शास्त्राणि शकर ।
प्रोवाच भगवान्देव कल्पज्ञानानि यानि च। [25]
चतु षष्टिप्रमाणानामायुर्वेद च सोत्तरम्।
अष्टादशविकल्पान्तां दण्डनीतिं च शाश्वतीम्।
गान्धर्वमितिहास च नानाविस्तरमुक्तवान्।
इत्येता शांकरप्रोक्ता विद्या शब्दार्थसहिता ।
पुनर्भेदसहस्र च तासामेव तु विस्तर । [30]
ऋषिभिर्देवगन्धर्वै सविकल्पः सविस्तर.।
शश्वदभ्यस्यते लोके वेद एव च सर्वश ।
विद्याश्चतस्र सक्षिप्ता वेदवादाश्च ते स्मृता.।
एतासां पारगो यश्च स चोक्तो वेदपारग ।
विदानां पारगो रुद्रो विष्णुरिन्द्रो बृहस्पति । [35]
दक्ष स्वायभुवश्चैव मनु परमधर्मवित्।

64

After line 6, D3 reads 1169* — After line 21, G2 ins.

पुत्रमेक समुत्पाद्य पितृणामृणमोचकम्।

प्रदास्यामि पुत्रोऽह पुमान्पि[illegible]

65

(L. 8) T2 G1-3 M6-8 ब्राह्मणेन

ब्रह्मा च परमो देवः सदा सर्वैः सुरासुरैः ।
सर्वस्यानुग्रहश्चैव व्यासो वै वेदपारगः ।
भीष्म उवाच ।
सह शांतनवो भीष्मः प्रसादान्माधवस्य च ।
शंकरस्य प्रसादाच्च ब्रह्मणश्च कुरूद्वह । [40]
वेदपारग इत्युक्तो याज्ञवल्क्यश्च सर्वशः ।
कल्पे कल्पे महामार्गैर्ऋषिभिर्भिन्नवर्त्मभिः ।
ऋषिपुत्रैर्ऋषिगणैर्भिद्यतेऽधर्मिकैरपि ।
शिवेन ब्रह्मणा चैव विष्णुना च विकल्पिता ।
आदिकल्पे पुनश्चैव भिद्यन्ते साधुभिः पुनः । [45]
इदानीमपि विद्वद्भिः भिद्यन्ते च विकल्पकैः ।
पूर्वजन्मानुसारेण वहुधेयं सरस्वती ।

67

After 1 115 28, D_4 (suppl. fol. *sec m*) S (partly, and at a different place) S ins

जातमात्रानुपादाय शतशृङ्गनिवासिनः ।
पाण्डोः पुत्रानमन्यन्त तापसाः स्वानिवात्मजान् ।
ततस्तु वृष्णयः सर्वे वसुदेवपुरोगमाः ।
पाण्डुः शापभयाद्भीतः शतशृङ्गमुपेयिवान् ।
तत्रैव मुनिभिः सार्धं तापसोऽभूत्तपश्चरन् । [5]
शाकमूलफलाहारस्तपस्वी नियतेन्द्रियः ।
योगध्यानपरो राजा बभूवेति च वादकाः ।
प्रब्रुवन्ति स्म बहवस्तच्छ्रुत्वा शोककर्शिताः ।
पाण्डोः प्रीतिसमायुक्ताः कदा श्रोष्याम सत्कथाः ।
इत्येवं कथयन्तस्ते वृष्णयः सह बान्धवैः । [10]
पाण्डोः पुत्रागमं श्रुत्वा सर्वे हर्षसमन्विताः ।
सभाजयन्तस्तेऽन्योन्यं वसुदेव वचोऽब्रुवन् ।
न भवेरन्क्रियाहीनाः पाण्डोः पुत्रा महाबलाः ।
पाण्डोः प्रियहितान्वेषी प्रेषय त्वं पुरोहितम् ।
वसुदेवस्तथेत्युक्त्वा विससर्ज पुरोहितम् । [15]
युक्तानि च कुमाराणां पारिबर्हाण्यनेकशः ।
कुन्तीं माद्रीं च संदिश्य दासदासीपरिच्छदम् ।
गावो हिरण्यं रूप्यं च प्रेषयामास भारत ।
तानि सर्वाणि संगृह्य प्रययौ स पुरोहितः ।
तमागतं द्विजश्रेष्ठं काश्यपं वै पुरोहितम् । [20]
पूजयामास विधिवत्पाण्डुः परपुरंजयः ।
पृथा माद्री च संहृष्टे वसुदेवं प्रशस्तताम् ।
ततः पाण्डुः क्रियाः सर्वाः पाण्डवानामकारयत् ।
गर्भाधानादिकृत्यानि चौलोपनयनानि च ।
काश्यपः कृतवान्सर्वमुपाकर्म च भारत । [25]
चौलोपनयनादूर्ध्वं वृषभाक्षा यशस्विनः ।
वैदिकाध्ययने सर्वे समपद्यन्त पारगाः ।
शर्यातेः पृषतः पुत्रः शुको नाम परंतपः ।
येन सागरपर्यन्ता धनुषा निर्जिता मही ।
अश्वमेधशतैरिष्ट्वा स महात्मा महामखैः । [30]
आराध्य देवताः सर्वाः पितॄनपि महामतिः ।
शतशृङ्गे तपस्तेपे शाकमूलफलाशनः ।
तेनोपकरणश्रेष्ठैः शिक्षया चोपबृंहिताः ।
तत्प्रसादाद्धनुर्वेदे समपद्यन्त पारगाः ।
गदायां पारगो भीमस्तोमरेषु युधिष्ठिरः । [35]
असिचर्मणि निष्णातौ यमौ सत्त्ववतां वरौ ।
धनुर्वेदे गतः पारं सव्यसाची परंतपः ।
शुकेन समनुज्ञातो मत्समोऽयमिति प्रभो ।
अनुज्ञाय ततो राजा शक्तिं खड्गं तथा शरान् ।
धनुश्च ददतां श्रेष्ठस्तालमात्रं महाप्रभम् । [40]
विपाठक्षुरनाराचान्गृध्रपक्षानलंकृतान् ।
ददौ पार्थाय संहृष्टो महोरगसमप्रभान् ।
अवाप्य सर्वशस्त्राणि मुदितो वासवात्मजः ।
मेने सर्वान्महीपालानपर्याप्तान्स्वतेजसा ।
एकवर्षान्तरास्त्वेवं परस्परमरिंदमाः । [45]
अन्ववर्धन्त पार्थाश्च माद्रीपुत्रौ तथैव च ।

Then follows a *repetition* of 1 115 28 —a clear sign of interpolation—and a *colophon* (corresponding to the colophon of our adhy 115) The MSS cont

---

67

☞ This passage occurs also in D_4 (suppl fol. *sec m*), which was inadvertantly omitted from the list of MSS mentioned in the footnote to 1 115 28 D_4 ins lines 4–44 of the passage after 1 116 1st, om the rest

(L. 3) D_4 आगता यान्वा सर्वे — (L. 5) D_4 तत्रैव न्यवसत्साधु शतशृङ्गे महात्मना — (L 7) D_4 तत्र धर्मसमन्वित (for the posterior half) — (L. 8) D_4 इदा तु कुशल नेषा वसुदेवरेत — (L. 9) Some MSS संगता — (L. 11) D_4 दिनानि कतिचित्तैश्च सुषितैश्चधर्मपूजिता — (L. 12) D_4 वसुदेवपुरोगमा — (L. 13) D_4 प्रतिनु सुगृहानेव तानाप्रच्छ्य स्वकास्तदा — (L. 15) D_4 तत्र पुरोहितो राजन्मथुराया निर्गत — (L. 16) D_4 वसुदेवाश्रयादाय (for the prior half) — (L. 18) D_4 इत्यश्वरथयानानि वस्त्ररत्नगतानि च — Colophon. *Adhy no* D_4 123, T_1 115, T_2 65, G M 66 — After the colophon, D_4 ins

जनमेजय उवाच ।
यस्मिन्वयसि संप्राप्ताः पाण्डवा गजसाह्वयम् ।
समपद्यन्त देवेन्द्र तेषामायुश्च किंपरम् ।
तदिच्छामि भगवन्वक्तुं श्रोतुं द्विजोत्तम ।

वैशंपायन ।

पाण्डवानां तथायुस्त्व शृणु कौरवनन्दन ।
जगाम हास्तिनपुर षोडशाब्दो युधिष्ठिर ।
भीमसेन पञ्चदशे बीभत्सुर्वै चतुर्दशे ।
त्रयोदशाब्दौ च यमौ जग्मतुर्नागसाह्वयम् । [50]
तत्र त्रयोदशाब्दानि धार्तराष्ट्रैः सहोषिता ।
षट् च मासाञ्जतुगृहान्मुक्ता जातो घटोत्कचः ।
षण्मासानेकचक्रायां वर्षं पाञ्चालके गृहे ।
धार्तराष्ट्रैः सहोषित्वा पञ्च वर्षाणि भारत ।
इन्द्रप्रस्थेऽवसंस्तत्र त्रीणि वर्षाणि विंशतिम् । [55]
द्वादशाब्दानथैकं च विभ्रमद्यूतनिर्जिताः ।
भुक्त्वा षट्त्रिंशत राज्य सागरान्तां वसुंधराम् ।
मासै षड्भिर्महात्मान सर्वे कृष्णपरायणा. ।
राज्ये परिक्षित स्थाप्य इष्टा गतिमवाप्नुवन् ।
एव युधिष्ठिरस्यापि आयुरष्टोत्तर शतम् । [60]
अर्जुनात्केशवो ज्येष्ठस्त्रिभिर्मासैर्महाभुज. ।
कृष्णात्सकर्षणो ज्येष्ठस्त्रिभिर्मासैर्महाबल ।

☞ The passage is immediately followed by 1. 116. 1 (*without* वैश°)

68

After 1. 116 22, D4 (marg *sec m*) S ins.

वैशंपायन ।

तस्यास्तद्वचन श्रुत्वा कुन्ती शोकाग्निदीपिता ।
पपात सहसा भूमौ छिन्नमूल इव द्रुम ।
निश्चेष्टा पतिता भूमौ मोहेन तु चचाल सा ।
तस्मिन्क्षणे कृतस्नानमम्बराम्बरसंवृतम् ।
अलंकारकृत पाण्डुं शयान शयने शुभे । [5]
कुन्तीमुत्थाप्य माद्री तु मोहेनाविष्टचेतनाम् ।
पश्येदीति च तां कुन्तीं दर्शयामास कौरवम् ।
पादयोः पतिता कुन्ती पुनरुत्थाय भूमिपम् ।
रक्तचन्दनदिग्धाङ्गं महारजतवाससम् ।
सस्मितेन तु वक्त्रेण गदन्तमिव भारतीम् । [10]
परिरभ्य तदा मोहाद्विललापाकुलेन्द्रिया ।
माद्री चापि समालिङ्ग्य राजानं विललाप सा ।
त तथाशायिन पाण्डुमृषय सह चारणै ।
अभ्येत्य सहिता. सर्वे शोकादश्रूण्यवर्तयन् ।
अस्त गतमिवादित्यं संशुष्कमिव सागरम् । [15]
दृष्ट्वा पाण्डु नरव्याघ्रं शोचन्ति स्म महर्षय. ।
समानशोका ऋषयः पाण्डवाश्च बभूविरे ।
ते समाश्वासिते विप्रैर्विलेपतुरनिन्दिते ।

कुन्ती ।

हा राजन्कस्य नौ हित्वा गच्छसि त्रिदशालयम् ।
हा राजन्मम मन्दाया कथं माद्रीं समेत्य वै । [20]
निधनं प्राप्तवांस्त्राजन्मद्भाग्यपरिसंक्षयात् ।
युधिष्ठिरं भीमसेनमर्जुनं च यमावुभौ ।
कस्मात्पुत्रान्प्रियान्हित्वा प्रयातोऽसि विशां पते ।
नून त्वां त्रिदशा देवा प्रतिनन्दन्ति भारत ।
यथा हि तप उग्रं ते चरित विप्रसंसदि । [25]
आवाभ्यां सहितो राजन्गमिष्यसि दिव शुभम् ।
आजमीढाजमीढानां कर्मणा चरितां गतिम् ।
ननु नाम सहावाभ्यां गमिष्यामीति नस्त्वया ।
प्रतिज्ञात कुरुश्रेष्ठ यदासि वनमागत. ।
आवाभ्यां त्वेव सहितो गमिष्यसि विशां पते । [30]
मुहूर्तं क्षम्यतां राजन्नारोक्ष्यावश्चितां तव ।

वैशंपायन. ।

विलपित्वा भृशं त्वेव नि सञ्ज्ञे पतिते भुवि ।
यथा विद्धे हते मृग्यौ लुब्धैर्वनगते तथा ।
युधिष्ठिरमुखा सर्वे पाण्डवा वेदपारगा ।
तेऽप्यागत्य पितुर्मूले नि संज्ञाः पतिता भुवि । [35]
पाण्डो पादौ परिष्वज्य विलपन्ति स्म पाण्डवा ।

— (L. 49) D4 भीम पञ्चदशाब्दे तु मन्वब्दे वै धनजय°, G6 M3 पंचदशाब्दो भीमस्तु चतुर्दशाब्दो धनजय (!) — (L. 56) T1 G1.2 प्रभुत्व , G6 M1 प्रभुत्व (for विभ्रम) D4 वने वैराटके तथा (for विभ्रम°). — After line 56, D4 (which om. line 57) ins

संधौ युद्धे त्वतिक्रान्त मासषट्क नृपोत्तम ।
चतु°पश्चाद्वर्षेण नियतात्पर्वसुधराम् ।

— (L. 58) D4 तपोनिष्ठा वनेभवन् (for the posterior half) — After line 58, D4 (which om. line 59) ins

महाप्रस्थानिकविधौ शेष मासचतुष्टयम् ।

— (L. 60) D4 इत्येवमादित प्रोक्त (for the prior half). — (L. 62) D4 वर्षेण वलभद्रोपि कृष्णाज्ज्येष्ठ प्रकीर्तित°. — After line 62, S (except G3.5.6) ins.,

रामो वृकोदराज्ज्येष्ठ° त्रिभिर्मासैर्महाबल ।,

while D4 ins

पाण्डु° पञ्च महातेजास्तान्पश्यन्पर्वते सुतान् ।
रेमे स काश्यपसुत पत्नीभ्या तु मुदा तदा ।
यस्मिन्पक्षे समुत्पन्न° पार्थस्तस्य च धीमत° ।
तस्मिंस्तुत्तरफल्गुन्यां प्रवृत्ते तु महोत्सवे ।
पुरोहितेन सहितो मासा°पर्वदर्पयत् ।
तस्मिन्काले समाहूय स ऋषीन्संशितव्रतान् ।
पूजयामास विधिवद्वासोभिर्दक्षिणा°भिस्तै° ।

68

Lines 1-9 (=1263*) are ins. in D4 after 1. 116

युधिष्ठिर ।

हा विनष्टाः स्म तातेति हा विनाथा भवामहे ।
त्वद्विहीना महाप्राज्ञ कथं वर्ताम बालकाः ।
लोकनाथस्य पुत्राः स्मो न सनाथा भवामहे ।
क्षणेनैव महाराज अहो लोकस्य चित्रता । [40]
मास्मद्विधा राजपुत्रा अधन्याः सन्ति भारत ।
त्वद्विनाशाच्च राजेन्द्र राज्यप्रस्खलनात्तथा ।
बान्धवानामथाज्ञानात्प्राप्ताः स्म व्यसनं वयम् ।
किं करिष्यामहे राजन्कर्तव्यं न प्रसीदताम् ।

भीम ।

हित्वा राज्यं च भोगांश्च शतशृङ्गनिवासिना । [45]
त्वया लब्धाः स्म राजेन्द्र महता तपसा वयम् ।
हित्वा मानं वनं गत्वा स्वयमाहृत्य भक्षणम् ।
शाकमूलफलैर्वन्यैर्भरणं वै त्वया कृतम् ।
पुत्रानुत्पाद्य पितरो यमिच्छन्ति महात्मन ।
त्रिवर्गफलमिच्छन्तस्तस्य कालोऽयमागत । [50]
अमुष्यैव फलं राजन्गन्तुं नार्हसि भारत ।

वैशंपायन ।

इत्येवमुक्त्वा पितरं भीमोऽपि विललाप ह ।

अर्जुन ।

प्रणष्टं भारतं वंशं पाण्डुना पुनरुद्धृतम् ।
तस्मिंस्तपोवनगते नष्टं राज्यं सराष्ट्रकम् ।
पुनर्निस्तारितं क्षत्रं पाण्डुपुत्रैर्महात्मभि । [55]
एवंकृत्वा तु नो हित्वा गन्तुमर्हसि कौरव ।

वैशंपायन ।

इत्येवमुक्त्वा पितरं विललाप धनंजय ।

यमौ ।

दुःसंचयं तपः कृत्वा लब्ध्वा नौ भरतर्षभ ।
पुत्रलाभस्य महतः शुश्रूषादिफलं त्वया ।
न चावाप्तं किंचिदेव राज्यं पित्रा यथा पुरा । [60]

वैशंपायन ।

एवमुक्त्वा यमौ चापि विलेपतुरथातुरौ ।

69

After I 116 30, D4 (marg. sec. m.) S ins.:

वैशंपायन ।

ऋषयस्तान्समाश्वास्य पाण्डवान्सत्यविक्रमान् ।
ऊचुः कुन्तीं च माद्रीं च समाश्वास्य तपस्विन ।
सुभगे बालपुत्रे तु न मर्तव्यं कथंचन ।
पाण्डवांश्चापि नेष्याम कुरुराष्ट्रं परंतपान् ।
अधर्मेष्वर्थजातेषु धृतराष्ट्रश्च लोभवान् । [5]
स कदाचिन्न वर्तेत पाण्डवेषु यथाविधि ।
कुन्त्याश्च वृष्णयो नाथाः कुन्तिभोजस्तथैव च ।
माद्र्याश्च बलिनां श्रेष्ठः शल्यो भ्राता महारथः ।
भर्त्रा तु मरणं सार्धं फलवन्नात्र संशय ।
युवाभ्यां दुष्करं चैतद्वदन्ति द्विजपुंगवा । [10]
मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता ।
यमैश्च नियमैः श्रान्ता मनोवाक्कायजैः शुभैः ।
भर्तारं चिन्तयन्ती सा भर्तारं निस्तरेच्छुभा ।
तारितश्चापि भर्ता स्यादात्मा पुत्रैस्तथैव च ।
तस्माज्जीवितमेवैतद्युवयोर्विद्म शोभनम् । [15]

कुन्ती ।

यथा पाण्डोस्तु निर्देशस्तथा विप्रगणस्य च ।
आज्ञा शिरसि निक्षिप्ता करिष्यामि च तत्तथा ।
यदाहुर्भगवन्तो हि तन्मन्ये शोभनं परम् ।
भर्तुश्च मम पुत्राणां मम चैव न संशय ।

माद्री ।

कुन्ती समर्था पुत्राणां योगक्षेमस्य धारणे । [20]
अस्या हि न समा बुद्ध्या यद्यपि स्यादरुन्धती ।
कुन्त्याश्च वृष्णयो नाथाः कुन्तिभोजस्तथैव च ।
नाहं त्वमिव पुत्राणां समर्था धारणे तथा ।
साहं भर्तारमन्विष्ये संतृप्ता न त्वहं तथा ।
भर्तृलोकस्य तु ज्येष्ठा देवी मामनुमन्यताम् । [25]
धर्मज्ञस्य कृतज्ञस्य सत्यसंधस्य धीमतः ।
पादौ परिचरिष्यामि तथार्याद्यानुमन्यताम् ।

वैशंपायन ।

एवमुक्त्वा महाराज मद्रराजसुता शुभा ।
ददौ कुन्त्यै यमौ माद्री शिरसाभिप्रणम्य च ।
अभिवाद्य महर्षींन्सा परिष्वज्य च पाण्डवान् । [30]
मूर्ध्न्युपाघ्राय बहुशः पार्थानात्मसुतौ तथा ।
हस्ते युधिष्ठिरं गृह्य माद्री वाक्यमभाषत ।
कुन्ती माता अहं धात्री युष्माकं तु पिता मृतः ।

---

30 — (L. 10) T1 G1.2 M1 भारत (for भारतीम्) — (L. 35) Noteworthy is the phrase त्रिमूर्ते! Cf. line 30 of passage No. 46 — (L. 38) T1 G1.2.6 M1 कौशल (for वशम्) — (L. 55) T1 G (except G1.3) M1 °इवैद पचमि°.

69

Line 22 = line 7 — After line 22, D4 ins.:

न च मे तादृशी बुद्धिर्बान्धवाश्च तथा न मे ।

— (L. 35) D4 वृद्धोपासनसंसक्ता, T1 G1 M1 वृद्धानुशासने सक्ता, G3 वृद्धानुशासने रक्ता, G2 वृद्धानुपासनायुक्ता.

युधिष्ठिरः पिता ज्येष्ठश्चतुर्णां धर्मतः सदा ।
वृद्धाद्युपासनासक्ता सत्यधर्मपरायणा । [35]
तादृशा न विनश्यन्ति नैव यान्ति पराभवम् ।
तस्मात्सर्वे कुरुध्वं वै गुरुवृत्तिमतन्द्रिता ।
ऋषीणां च पृथायाश्च नमस्कृत्य पुनः पुनः ।
आयासकृपणा माद्री प्रत्युवाच पृथां ततः ।
धन्या त्वमसि वार्ष्णेयि नास्ति स्त्री सदृशी त्वया । [40]
वीर्यं तेजश्च योगं च माहात्म्यं च यशस्विनाम् ।
कुन्ति द्रक्ष्यसि पुत्राणां पञ्चानाममितौजसाम् ।
ऋषीणां संनिधौ येषा मया वागभ्युदीरिता ।
दिदृक्षमाणया स्वर्गं न ममैषा वृथा भवेत् ।
आर्या चाप्यभिवाद्या च मम पूज्या च सर्वतः । [45]
ज्येष्ठा वरिष्ठा त्वं देवि भूषिता स्वगुणैः शुभैः ।
अभ्यनुज्ञातुमिच्छामि त्वया यादवनन्दिनि ।
धर्मं स्वर्गं च कीर्तिं च त्वत्कृतेऽहमवाप्नुयाम् ।
यथा तथा विधत्स्वेह मा च कार्षीर्विचारणाम् ।
बाष्पसंदिग्धया वाचा कुन्त्युवाच यशस्विनी । [50]
अनुज्ञातासि कल्याणि त्रिदिवे संगमोऽस्तु ते ।
भर्त्रा सह विशालाक्षि क्षिप्रमद्यैव भामिनि ।
संगता स्वर्गलोके त्वं रमेथाः शाश्वतीः समाः ।
ततः पुरोहितः स्नात्वा प्रेतकर्मणि पारगः ।
हिरण्यशकलानाज्यं तिलान्दधि च तण्डुलान् । [55]
उदकुम्भं सपरशुं समानीय तपस्विभिः ।
अश्वमेधाग्निमाहृत्य यथान्यायं समन्ततः ।
काश्यपः कारयामास पाण्डोः प्रेतस्य तां क्रियाम् ।
पुरोहितोक्तविधिना पाण्डोः पुत्रो युधिष्ठिरः ।
तेनाग्निनादहत्पाण्डुं कृत्वा चापि क्रियास्तदा । [60]
रुदञ्शोकाभिसंतप्तः पपात भुवि पाण्डवः ।
ऋषीन्पुत्रान्पृथां चैव विसृज्य च नृपात्मजान् ।

70

After 1. 119. 7, G1 ins.:

ततः पुत्राश्च पौत्राश्च राजानः सर्व एव हि ।
पाण्डवाः कौरवाश्चैव राज्यैश्वर्यमदान्विताः ।
पृथ्वीनिमित्तमन्योन्यं घातयिष्यन्ति निर्घृणाः ।
कुरुपाण्डवयोरर्थे पृथिवीक्षयकारणम् ।
अन्योन्यं घोरमासाद्य करिष्यन्ति महीमिमाम् । [5]
रुधिरौघनिमग्नां च बालवृद्धावशेषिताम् ।
घोरमेनमदृष्ट्वैव कालं सर्वक्षयावहम् ।
दृष्ट्वानन्दसुतप्रीत्या दृष्ट्वा मातः शृणुष्व ह ।

71

After 1. 119. 30ab, K4 Ñ B D ins. (cf. No. 73 below):

भक्ष्यं भोज्यं च पेयं च चोष्यं लेह्यमथापि च ।
उपाहृतं नरैस्तत्र कुशलैः सूदकर्मणि ।
न्यवेदयंस्तत्पुरुषा धार्तराष्ट्राय वै तदा ।
ततो दुर्योधनस्तत्र पाण्डवानाह दुर्मतिः ।
गङ्गां चैवानुयास्याम उद्यानवनशोभिताम् । [5]
सहिता भ्रातरः सर्वे जलक्रीडामवाप्नुमः ।
एवमस्त्विति तं चापि प्रत्युवाच युधिष्ठिरः ।
ते रथैर्नगराकारैर्देशजैश्च गजोत्तमैः ।
निर्ययुर्नगराच्छूराः कौरवाः पाण्डवैः सह ।
उद्यानवनमासाद्य विसृज्य च महाजनम् । [10]
विशन्ति स्म तदा वीराः सिंहा इव गिरेर्गुहाम् ।
उद्यानमभिपश्यन्तो भ्रातरः सर्व एव ते ।
उपस्थानगृहैः शुभ्रैर्वलभीभिश्च शोभितम् ।
गवाक्षकैस्तथा जालैर्जलैः साचारिकैरपि ।
समार्जितं सौधकारैश्चित्रकारैश्च चित्रितम् । [15]
दीर्घिकाभिश्च पूर्णाभिस्तथा पुष्करिणीभिर्हि (?) ।
जलं तच्छुशुभे छन्नं फुल्लैर्जलरुहैस्तथा ।
उपच्छन्ना वसुमती तथा पुष्पैर्यथर्तुकैः ।
तत्रोपविष्टास्ते सर्वे पाण्डवाः कौरवाश्च ह ।
उपच्छन्नान्बहून्कामांस्ते भुञ्जन्ति ततस्ततः । [20]
अथोद्यानवरे तस्मिंस्तथा क्रीडागताश्च ते ।
परस्परस्य वक्त्रेभ्यो ददुर्भक्ष्यांस्ततस्ततः ।
ततो दुर्योधनः पापस्तद्भक्ष्ये कालकूटकम् ।
विषं प्रक्षेपयामास भीमसेनजिघांसया ।
स्वयमुत्थाय चैवाथ हृदयेन क्षुरोपमः । [25]
स वाचामृतकल्पश्च भ्रातृवच्च सुहृद्यथा ।
स्वयं प्रक्षिपते भक्ष्यं वक्त्रे भीमस्य पापकृत् ।
प्रतीच्छितं च भीमेन तं वै दोषमजानता ।
ततो दुर्योधनस्तत्र हृदयेन हसन्निव ।
कृतकृत्यमिवात्मानं मन्यते पुरुषाधमः । [30]

71

D5 ins various lines of this passage at different points of its text; its readings have been ignored — (L. 3) N B1.3 उत्पादितं, Dn1 n3 उपपादितं, D4 इष्टा कृतं — (L. 11) Dn प्रविशंति (for विशन्ति स्म) — (L. 14) Dn D3.4 यंत्रै (for जलैः) — (L. 16) Ñ1.3 तथा मीकुष्ट्वै॰ रपि, D2 तथा पद्माकैरपि — (L. 20) Ñ B1.2.6 D3 D2.4 उपपन्नान् — (L. 26) N1.2 D2 भ्रातृवत्; N2 Dn महेश्वर — (L. 27) N2 Dn D1 वक्तृ (for वक्त्रे) — (L. 28) K4 प्रतिक्षिप्तं, Ñ Dn D3.4 प्रतीक्षितं, D3 D1 प्रतिक्षिप्तं.

ततस्ते सहिता सर्वे जलक्रीडामकुर्वत ।
पाण्डवा धार्तराष्ट्राश्च तदा मुदितमानसा ।

72

After I. 119 38ab, K4 Ñ B D ins

हतावशेषा भीमेन सर्पा वासुकिमभ्ययु ।
ऊचुश्च सर्पराजानं वासुकिं वासवोपमम् ।
अयं नरो वै नागेन्द्र अप्सु बद्ध्वा प्रवेशित ।
यथा च नो मतिर्वीर विषपीतो भविष्यति ।
निश्चेष्टोऽस्माननुप्राप्त स च दष्टोऽन्वबुध्यत । [5]
ससंज्ञश्चापि संवृत्तश्छित्त्वा बन्धनमाशु न ।
पोथयन्तं महाबाहुं तं वै त्वं ज्ञातुमर्हसि ।
ततो वासुकिरभ्येत्य नागैरनुगतस्तदा ।
पश्यति स्म महाबाहुं भीमं भीमपराक्रमम् ।
आर्यकेण च दृष्ट स पृथाया आर्यकेण च । [10]
तदा दौहित्रदौहित्र परिष्वक्त सुपीडितम् ।
सुप्रीतश्चाभवत्तस्य वासुकि सुमहायशा ।
अब्रवीच्च च नागेन्द्र किमस्य क्रियतां प्रियम् ।
धनौघो रत्ननिचयो वसु चास्य प्रदीयताम् ।
एवमुक्तस्तदा नागो वासुकिं प्रत्यभाषत । [15]
यदि नागेन्द्र तुष्टोऽसि किमस्य धनसंचयै ।
रस पिबेत्कुमारोऽयं त्वयि प्रीते महाबल ।
बलं नागसहस्रस्य तस्मिन्कुण्डे प्रतिष्ठितम् ।
यावत्पिबति बालोऽयं तावदस्मै प्रदीयताम् ।
एवमस्त्विति स नागं वासुकि प्रत्यभाषत । [20]
ततो भीमस्तदा नागै कृतस्वस्त्ययन शुचि ।
प्राङ्मुखश्चोपविष्ट सन्रसं पिबति पाण्डव ।
एकोच्छ्वासात्तत कुण्ड पिबति स्म महाबल ।
एवमष्टौ स कुण्डानि ह्यपिबत्पाण्डुनन्दनः ।
ततस्तु शयने दिव्ये नागदत्ते महाभुज । [25]
अशेत भीमसेनस्तु यथासुखमरिंदम ।

Colophon

वैशंपायन उवाच ।

ततस्ते कौरवा सर्वे विना भीमं च पाण्डवा ।
वृत्तक्रीडाविहारास्तु प्रतस्थुर्गजसाह्वयम् ।
रथैर्गजैस्तथा चाश्वैर्यानैश्चान्यैरनेकश ।
ब्रुवन्तो भीमसेनस्तु यातो ह्यग्रत एव न । [30]
ततो दुर्योधन पापस्तत्रापश्यन्वृकोदरम् ।
भ्रातृभि सहितो हृष्टो नगरं प्रविवेश ह ।
युधिष्ठिरस्तु धर्मात्मा ह्यविन्दन्पापमात्मनि ।
स्वेनानुमानेन पर साधु समनुपश्यति ।
सोऽभ्युपेत्य तदा पार्थो मातरं भ्रातृवत्सल । [35]
अभिवाद्याब्रवीत्कुन्तीमम्ब भीम इहागत ।
क्व गतो भविता मातर्नेह पश्यामि तं शुभे ।
उद्यानानि वन चैव विचितानि समन्तत ।
तदर्थं न च तं वीर दृष्टवन्तो वृकोदरम् ।
मन्यमानास्तत सर्वे यातो न पूर्वमेव स । [40]
आगता स्म महाभागे व्याकुलेनान्तरात्मना ।
इहागम्य क्व नु गतस्त्वया वा प्रेषित क्व नु ।
कथयस्व महाबाहु भीमसेन यशस्विनि ।
न हि मे शुध्यते भावस्त वीर प्रति शोभने ।
यत प्रसुप्त मन्येऽहं भीम नेति हतस्तु स । [45]
इत्युक्ता च तत कुन्ती धर्मराजेन धीमता ।
हा हेति कृत्वा संभ्रान्ता प्रत्युवाच युधिष्ठिरम् ।
न पुत्र भीमं पश्यामि न मामभ्येति स प्रभो ।
शीघ्रमन्वेषणे यत्न कुरु तस्यानुजै सह ।
इत्युक्त्वा तनय ज्येष्ठ हृदयेन विदूयता । [50]
क्षत्तारमानाय्य तदा कुन्ती वचनमब्रवीत् ।
क्व गतो भगवन्क्षत्तर्भीमसेनो न दृश्यते ।
उद्यानान्निर्गता सर्वे भ्रातरो भ्रातृभि सह ।
तत्रैकस्तु महाबाहुर्भीमो नाभ्येति मामिह ।
न च प्रीणयते चक्षु सदा दुर्योधनस्य स । [55]
क्रूरोऽसौ दुर्मति क्षुद्रो राज्यलुब्धोऽनपत्रप ।

72

(L. 1) N3 B6 Dn D1 3 सर्वे (for सर्पा) — (L. 3) Dn D1 दत्त्वा — (L. 7) Ñ B1 Dn D1 transp तं and त्व — (L. 22) Ñ1 3 B1. 3 Dn D1. 4 स (for सन्) — (L. 25) N3 B (except B1) D2 3 नागदत्ते — Colophon om in B D3 5 *Adhy no* Dn2 D4 128, Dn3 127 *Aggregate śloka no* Dn3 5037 — (L. 33) K4 नाविन्दन्, Ñ1 3 Dn दविन्दन्, B1 D2 अविन्दन्, B4 प्रविन्दन्, D3 विन्दन् — After line 36, D3 ins ·

नैत्यनाह तदा कुन्ती ततस्ते व्यथितामवन् ।
इतं गत्वा पुरोद्यान व्यचिन्वन्त स्म पाण्डवा ।
भीम भीमेति ते वाचमुच्चमुच्चैरुदीरयन् ।
विचिन्वत वन सर्वे न पश्यन्ति स्म मारुतिम् ।
आगता स्वगृह भूय इदमूचुर्वनान्तरे ।

— (L. 48) Ñ3 Dn °भ्येत्यसाविति — After line 54, B3 ins :

विदुर उवाच ।
द्रुत गत्वा पुरोद्यान चिन्वन्तु सह पाण्डवै ।
ते तत्र गत्वा त्वरिता भीमेत्युच्चैरुदीरयन् ।
विचिन्वन्तो वन सर्वे ते न पश्यन्ति त जना ।
आगम्य नगरं भूय इदमूचु पृथां तदा ।
न दृश्यते महाबाहुरम्ब भीमो महाबल ।

निहन्यादपि तं वीरं जातमन्युः सुयोधनः ।
तेन मे व्याकुलं चित्तं हृदयं दह्यतीव च ।
विदुर उवाच ।
मैवं वदस्व कल्याणि शेषसंरक्षणं कुरु ।
प्रत्यादिष्टो हि दुष्टात्मा शेषेऽपि प्रहरेत्तव । [60]
दीर्घायुषस्तव सुता यथोवाच महामुनिः ।
आगमिष्यति ते पुत्रः प्रीतिं चोत्पादयिष्यति ।
वैशंपायन उवाच ।
एवमुक्त्वा ययौ विद्वान्विदुरः स्वं निवेशनम् ।
कुन्ती चिन्तापरा भूत्वा सहासीना सुतैर्गृहे ।
ततोऽष्टमे तु दिवसे प्रत्यबुध्यत पाण्डवः । [65]
तस्मिंस्तदा रसे जीर्णे सोऽप्रमेयबलो बली ।
तं दृष्ट्वा प्रतिबुद्धं तु पाण्डवं ते भुजंगमाः ।
सान्त्वयामासुरव्यग्रा वचनं चेदमब्रुवन् ।
यस्ते पीतो महाबाहो रसोऽयं वीर्यसंभृतः ।
तस्मान्नागायुतबलो रणेऽधृष्यो भविष्यसि । [70]
गच्छाद्य च त्वं स्वगृहं स्नातो दिव्यैरिमैर्जलैः ।
भ्रातरस्ते तु तप्यन्ति त्वां विना कुरुपुंगव ।
ततः स्नातो महाबाहुः शुचिः शुक्लाम्बरस्रजः ।
ततो नागस्य भवने कृतकौतुकमङ्गलः ।
ओषधीभिर्विषघ्नीभिः सुरभीभिर्विशेषतः । [75]
भुक्तवान्परमान्नं च नागैर्दत्तं महाबलः ।
पूजितो भुजगैर्वीर आशीर्भिश्चाभिनन्दितः ।
दिव्याभरणसंछन्नो नागानामन्त्र्य पाण्डवः ।
उदतिष्ठत्प्रहृष्टात्मा नागलोकादरिंदमः ।
उत्क्षिप्तः स तु नागेन जलाज्जलरुहेक्षणः । [80]
तस्मिन्नेव वनोद्देशे स्थापितः कुरुनन्दनः ।
ते चान्तर्दधिरे नागाः पाण्डवस्यैव पश्यतः ।
ततः उत्थाय कौन्तेयो भीमसेनो महाबलः ।
आजगाम महाबाहुर्मातुरन्तिकमञ्जसा ।
ततोऽभिवाद्य जननीं ज्येष्ठं भ्रातरमेव च । [85]
कनीयसः समाघ्राय शिरःस्वरिविमर्दनः ।
तैश्चापि संपरिष्वक्तः सह मात्रा नरर्षभैः ।
अन्योन्यगतसौहार्दाद्दिष्ट्या दिष्टयेति चाब्रुवन् ।
ततस्तत्सर्वमाचष्ट दुर्योधनविचेष्टितम् ।
भ्रातॄणां भीमसेनश्च महाबलपराक्रमः । [90]
नागलोके च यद्वृत्तं गुणदोषमशेषतः ।
तच्च सर्वमशेषेण कथयामास पाण्डवः ।
ततो युधिष्ठिरो राजा भीममाह वचोऽर्थवत् ।
तूष्णीं भव न ते जल्प्यमिदं कार्यं कथंचन ।
एवमुक्त्वा महाबाहुर्धर्मराजो युधिष्ठिरः । [95]
भ्रातृभिः सहितः सर्वैरप्रमत्तोऽभवत्तदा ।

73

After adhy. 119, T G ins.:

वैशंपायन ।
ततस्ते मन्त्रयामासुर्दुर्योधनपुरोगमाः ।
प्राणहा विक्रमी चापि शौर्ये च महति स्थितः ।
स्पर्धते चापि सततमस्मानेको वृकोदरः ।
तं तु सुप्तं पुरोद्याने जलस्थले क्षिपामहे ।
ततो जलविहारार्थं कारयामास भारत । [5]
चेलकम्बलवेश्मानि चित्राणि च शुभानि च ।
तत्र संस्कारयामासुर्नानागाराण्यनेकशः ।
उदकक्रीडनार्थानि कारयामास भारत ।
प्रमाणकोट्यामुद्देशे स्थले कृत्वा परिच्छदम् ।
भक्ष्यं भोज्यं च पेयं च चोष्यं लेह्यं तथैव च । [10]
उपार्जितं नरैस्तत्र तथा सूदकृतं च तत् ।
न्यवेदयन्त पुरुषा धार्तराष्ट्रस्य तत्तथा ।
ततो दुर्योधनस्त्वाह पाण्डवांस्तु सुदुर्मतिः ।
गङ्गां वै मानयामोऽद्य उद्यानवनशोभिताम् ।
सहिता भ्रातरः सर्वे जलक्रीडामवाप्नुमः । [15]
एवमस्त्विति तं चापि प्रत्युवाच युधिष्ठिरः ।
ते रथैर्नगराकारैर्देशजैश्च हयोत्तमैः ।
निर्ययुर्नगराद्वीराः कुरवः पाण्डवैः सह ।
उद्यानवनमासाद्य संप्रसृज्य च वाहनम् ।
प्राविशंस्तु महावीर्याः सिंहा इव गिरेर्गुहाम् । [20]
उद्यानं सार्थ पश्यन्ति भ्रातरः सर्व एव ते ।
उपस्थानगृहैः शुद्धैर्वलभीभिश्च शोभितम् ।
गवाक्षकैस्तथा जालैर्जलसंसारकैरपि ।
सूपस्थितं सुधाकारैश्चित्रकारैश्च शिल्पिभिः ।
दीर्घिकाभिश्च पुण्याभिस्तथा कारण्डकैरपि । [25]
जलं तु शुशुभे छन्नं फुल्लैर्जलरुहैस्तथा ।
उपकीर्णा वसुमती तथा पुष्पैर्यथर्तुकैः ।
उपविष्टास्तदा सर्वे पाण्डवाः कुरवस्तथा ।

(of the ins in D5 given above) — (L. 61) D5 दीर्घायुषः सुतास्तुभ्यं दत्ता देवैरभिप्लुते — (L. 67) Ñ2 B1 Dn D1 8 प्रतिबुध्यत — (L. 71) Ñ1 3 B3 6 Dn D1 3 °च स्वगृहं स्नातो दिव्यैरेभिः शुभैर्जलैः — After line 94, K4 Ñ3 B1 3 D (except D5) ins.:

इतः प्रभृति कौन्तेया रक्षतान्योन्यमादृताः ।

73

The first few lines of this passage are found in D5 also — (L 2) G1.4 6 प्राणवान् For lines 5-6, cf 1 119 29, for 7-8, cf 1310*, for 9, cf 30[ab] Lines 10-40 are an almost verbatim repetition of lines 1-31 of passage No 71 above — (L 14) T1 G1-4

उपपन्नान्बहून्कामांस्तेऽथ भुक्त्वा ततस्तत ।
अथोद्यानवने तस्मिंस्तथा क्रीडागताश्च ते । [30]
परस्परस्य वक्त्रेषु ददुर्भक्ष्यांस्ततस्तत ।
ततो दुर्योधन पापस्तद्भक्ष्ये कालकूटकम् ।
विष प्रक्षेपयामास भीमसेनजिघांसया ।
स्वयमुत्थाय चैवाथ हृदयेन क्षुरोपम ।
सकृत्य भ्रातृवत्तत्र वाचा चामृतकल्पया । [35]
प्राक्षिपद्धि स्वय भक्ष्य वक्त्रे भीमस्य पापकृत् ।
प्रभक्षित च भीमेन ह्यस्य दोषमजानता ।
ततो दुर्योधनस्तत्र हृदयेन हसन्निव ।
कृतकृत्यमिवात्मान मेने स पुरुषाधमः ।
ततस्ते सहिता सर्वे जलक्रीडामकुर्वत । [40]
दिवसान्ते परिश्रान्ता विहृत्य कुरुनन्दना ।
विहारावसथेष्वेव वीरा वासमरोचयन् ।
भीमस्तु बलवान्भुक्त्वा व्यायामाभ्यधिक जले ।
वाहयित्वा कुमारांस्ताञ्जले क्रीडां महाबल ।
प्रमाणकोट्यां वासार्थी सुष्वापारुह्य तत्स्थलम् । [45]
स हि तत्स्थलमासाद्य श्रान्तश्चाप्सु विहेपत ।
श्रमेण च परीताङ्गः सुष्वाप मृतकल्पवत् ।
ततो बद्ध्वा लतापाशैर्भीम दुर्योधन स्वयम् ।
शूलान्यप्सु निखान्याशु स्थलाज्जलमपातयत् ।
सदोषत्वाच्च सम्प्राप्तो जले शूलानि पाण्डव । [50]
पपात यत्र तत्रास्य शूल नासीद्यदृच्छया ।
स नि मग्नो जलस्यान्तमवाप्यैव पाण्डवोऽविशत् ।
आक्रम्य नागभवने तथा नागकुमारकान् ।
तत्र समेत्य बहुभिस्तदा नागैर्महाविषै ।
दश्यते पाण्डवस्तत्र विषदिग्धो महाविषै । [55]
ततोऽस्य दश्यमानस्य तद्विष कालकूटकम् ।
हत सर्पविषेणाशु स्थावर जङ्गमेन तु ।
तत प्रबुद्ध कौन्तेय स तत्संछिद्य बन्धनम् ।
पोथयामास तान्सर्वान्कांश्चित्प्राणैर्व्ययोजयत् ।

ते हन्यमाना पार्थेन सर्पा वासुकिमभ्ययु । [60]
ऊचुश्च सर्पराजान वासुकिं वासवोपमम् ।
अय नरो वै नागेन्द्र ह्यप्सु बद्ध्वा प्रवेशित ।
यथा च नो मतिर्वीर विषपीतो भविष्यति ।
विनिविष्टोऽन्तर प्राप्त स च दष्टो ह्यनेकश ।
ससज्ञश्चापि सवृत्तश्छित्त्वा बन्धनमाशु न । [65]
पोथयानो महाबाहुस्त वै त्व ज्ञातुमर्हसि ।
ततो वासुकिरभ्येत्य नागैरनुगतस्तदा ।
पश्यति स महानागो भीम भीमपराक्रमम् ।
आर्यकेण च दृष्ट सन्पृथायाश्चार्यकेण तु ।
ततो दृष्टश्च तेनापि परिष्वक्तश्च पाण्डव । [70]
सुप्रीतश्चाभवत्तस्य वासुकि सुमहायशा ।
अब्रवीच्च नागेन्द्र किमस्य क्रियतामिति ।
प्रिय धनौघ रत्नानि यावदस्य प्रदीयताम् ।
एवमुक्तस्तदा नागो वासुकि प्रत्यभाषत ।
यदि नागेन्द्र प्रीतोऽसि किमस्य धनसंचयैः । [75]
रस पिबेत्कुमारोऽय त्वयि प्रीते महाबलः ।
बल नागसहस्रस्य कुण्डे यास्मिन्प्रतिष्ठितम् ।
यावत्पिबति बालोऽय तावदस्मै प्रदीयताम् ।
एवमस्त्विति त नाग वासुकिः प्रत्यभाषत ।
ततो भीमस्तदा नागैः कृतस्वस्त्ययनः शुचि । [80]
प्राङ्मुखश्चोपविष्टः सन्रस पिबति पाण्डवः ।
एकोच्छ्वासात्तदा कुण्ड पिबति स महाबलः ।
एवमष्टौ तु कुण्डानि सोऽपिबत्पाण्डुनन्दनः ।
ततस्तु शयने दिव्ये नागदत्ते महाभुज ।
शेते स च तदा भीमो दिवसान्यष्ट चैव तु । [85]
दुर्योधनोऽपि पापात्मा भीममादौ विषद्रदे ।
प्रक्षिप्य कृतकृत्य स आत्मान मन्यते तदा ।
प्रभातायां रजन्यां तु वनात्प्रविविशुः पुरम् ।
वदन्तो भीमसेनस्तु यातो ह्यग्रत एव सः ।
युधिष्ठिरस्तु धर्मात्मा चिन्तयन्पापमात्मनि । [90]

नगाभिर्मा न(T1 च; G1 प्र)यामोप — After line 10, G1 ins

जानश्चाप्युमेने तद्भेदबुद्धिभिया तदा ।

— After line 31, G1 ins

नानाविधानि भक्ष्याणि भोज्यापूपानि मोदकान् ।
खेलन्त प्रहसन्तश्च विहृत्य कुमारका ।

— For line 34, G1 reads

स॰ ॰ क्षेपयामास स्वयमुत्थाय मित्रवत् ।
बहिर्मधुरया वाचा हृदयेन क्षुरोपम ।

— For lines 41–49, cf 1 119 31–34 — After line 48, G1 ins

पानदिव्यान्न भूमौ प्रदेशान्स्थलानि च ।

— (L 49) G1 लतापाशैर्दृढ बद्धा — For lines 52–57, cf. 1312*, for lines 58–59, cf 1 119 38[ab], for 60–85, cf lines 1–26 of passage No 72 above. — (L 64) T1 G1 विषाविष्टोंतरं प्रा°, G6 निश्चेष्टोस्तानुप्रा° G1 2 दष्टोप्यने°; G4 6 दष्टोन्यबुध्यत — For lines 69–71, G1 subst :

अथ वासुकिना भीमो दृष्ट स्पृष्ट पुरूषभ ।
परिष्वक्तश्च सर्वेर्भीम प्रीतोऽभवत्तदा ।
वासुकिश्चापि सुप्रीतो भीमगाढामृतं वच ।

— (L 88) T1 G4 5 प्रविवेश पुरं तत — For lines 89–93, cf lines 30, 33–36 of passage No 72 above — After line 89, G1 ins :

इति स्म पृच्छतां नृणां कुन्त्याश्च विदुरस्य च ।

स्वेनानुमानेन पर तदा तं स्मानुपश्यति ।
उपगम्य तत. पार्था मातर मातृवत्सला ।
अभियाद्याब्रुवस्ते वै अम्ब भीम इहागत ।
नेति स्माह तदा कुन्ती ततस्ते व्यथिताभवन् ।
द्रुत गत्वा पुरोद्यान विचिन्वन्ति स्म पाण्डवा । [95]
भीम भीमेति ते वाच नित्यमुच्चैरुदीरयन् ।
विचिन्वन्तोऽथ ते सर्वे न स्म पश्यन्ति भ्रातरम् ।
आगता. स्वगृह भूय इदमूचु पृथा तदा ।
न दृश्यते महाबाहुरम्ब भीमो वने चित ।
विचितानि च सर्वाणि उद्यानानि नदीस्तथा । [100]
ततो विदुरमानाय्य कुन्ती सा स्वनिवेशनम् ।
उवाच क्षत्तर्यलयान्भीमसेनो न दृश्यते ।
उद्यानान्निर्गताः सर्वे भ्रातरो भ्रातृभि. सह ।
तत्र ह्येको महाबाहुर्भीमो नाभ्येति मामिह ।
न च प्रीणयते चक्षु सदा दुर्योधनस्य तु । [105]
तत. प्रसुप्तं मन्येऽहं पापेन निहतं सुतम् ।
विदुर ।
मा मैव वद कल्याणि शेषसंरक्षण कुरु ।
प्रत्यादिष्टो हि पापात्मा शेषेषु प्रहरेत ह ।
दीर्घायुष· सुतास्तुभ्य तथा ह्यृषिरभाषत ।
आगमिष्यति ते पुत्रः प्रीतिं ते वर्धयिष्यति । [110]
वैशपायन ।
एवमुक्ता तदा कुन्ती निःश्वसन्ती मुहुर्मुहु ।
शय्यापरा महाभागा पुत्रै परिवृता तदा ।
ततोऽष्टमेऽथ दिवसे प्रत्यबुध्यत पाण्डव. ।
तस्मिंस्तदा रसे जीर्णे ह्यप्रमेयबलो बली ।
ओषधीभिर्विषघ्नीभि सुरभीभिर्विभूषित । [115]
भुक्त्वा तु परमान्नं च नागैर्दत्त महाभुजः ।
उत्क्षिप्य च तदा नागैर्जलाज्जलरुहेक्षण ।
तस्मिन्नेव वनोद्देशे स्थापित पाण्डुनन्दन ।
अन्तर्दधुश्च ते नागा पाण्डवस्यैव पश्यत ।
तत उत्थाय भीमस्तु आजगाम स्वक गृहम् । [120]
अभिवाद्य परिष्वक्तः समाघ्रातश्च मूर्धनि ।
प्रणम्य धर्मपुत्राय सस्वजे फल्गुन तत ।
अभिवादितश्च तैर्वीरै सस्वजे च यमावपि ।
तच्च सर्वं यथावृत्तमाख्याति स्म वृकोदर ।
यदा त्ववगमस्ते वै पाण्डवास्तस्य कर्म तत् । [125]
न त्वेव बहुल चक्रु प्रयता मन्त्ररक्षणे ।
धर्मात्मा विदुरस्तेषां प्रददौ मतिमान्मतिम् ।
दुर्योधनोऽपि त दृष्ट्वा पाण्डव पुनरागतम् ।
नि श्वसश्चिन्तयश्चैव अहन्यहनि तप्यते ।
एवं दुर्योधन पाप शकुनिश्चापि सौबल । [130]
अनेकैरभ्युपायैस्ताञ्जिघांसन्ति स्म पाण्डवान् ।
पाण्डवाश्चापि तत्सर्वं प्रत्यजानन्नरिंदमा ।
उद्भावनमकुर्वन्तो विदुरस्य मते स्थिता ।
अधिजग्मुश्च कुरवो धनुर्वेद कृपात्तु ते ।

Colophon

☞ This additional adhy. is nothing more than a recast of our adhy 119, incorporating the additional matter contained in passages No 71-72 above, which latter are Northern interpolations It is worth nothing that this (addl) adhy ends (lines 130-133) with a *repetition* of the last two stanzas of adhy 119, a confirmation (if any were needed) of the fact that this adhy is an interpolation in T G MSS. The last line (134) of the passage, which is otherwise found only in Dn D1 (cf. 1323*), was added only to link up somehow with the next adhy, which, in the constituted text, seems to begin rather abruptly — Cf. also footnote under 1 119 29.

74

After 1 121 21, B1 ins.

प्रयच्छ भगवन्मह्य वरमेतन्मया वृतम् ।
कृतार्थ च भविष्यामि वर लब्ध्वा द्विजोत्तम ।

— (L. 91) T1 G4 नायांत स स पश्यति, G1 तेषामेवासमजस. — (L 100) G1 उद्यानानि विचित्राणि नदीनि च सरांसि च — After line 100, G1 ins

विचिन्वाना न पश्यामो भीमम्ब कुतो गत ।

— For lines 101-105, cf. lines 51-52 of passage No 72 above — (L 105) G1 न च मे प्रीयते चक्षुर्न मनो मे प्रसीदति — After line 105, G1 ins.

दुर्योधनो न हि स्पष्टस्तस्त्वद्धेत मे मन ।

— For lines 107-114, cf lines 59-66 of passage No. 72 above — After line 112, G1 ins.

विचिन्वन्तो वने भीम पाण्डवा· प्रलद दिया ।

दु खाकारं गोपयत दु खिता [शेरते] निशि ।
— For lines 115-124, of lines 74-75, 80-89 of passage No 72 above — (L 123) G1 तै सर्वैर्दुनं परिषस्वजे — (L 124) G1 यमावपि परिष्वज्य यथान्याय्यमपेरयत — After line 124, G1 (which om line 125) ins

नागालोकवृत्तान्त प्रत्यागमनमेव च ।
प्रजानस्ते यदा सर्व दुर्योधनकृत नृप ।

— (L 126) T1 प्रयतं तास रत्ने, T2 G2 प्रयातास्म रत्ने, G1 प्रचक्रुस्ते स्र°, G3 5 प्रयतुस्तस्य र°, G6 प्रयतश्च र° — (L 130) T1 G3 5 कर्ण (for पाप)

राम उवाच ।
प्रतिगृह्णीष्व विप्रेन्द्र द्रोण मत्तो यदीच्छसि ।
वरं तव ददाम्यद्य यदुक्तं ते द्विजोत्तम ।
गृहाणास्त्राणि दिव्यानि धनुर्वेदं च मामकम् । [5]
सपुत्रस्य ददाम्येतत्तव द्रोण महद्वरम् ।
कृतार्थो गच्छ विप्रेन्द्र गच्छ चैव यथागतम् ।
कृतास्त्रश्चैव शूरश्च सर्वशास्त्रविशारदः ।
अश्वत्थामेति विख्यातो भविष्यति महारथ ।

75

After 1 122 31[ab], all MSS except Ś1 Ko-3 ins

तच्च वाक्यमहं नित्यं मनसाधारयं तदा ।
सोऽहं पितृनियोगेन पुत्रलोभाद्यशस्विनीम् ।
नातिकेशीं महाप्रज्ञामुपयेमे महाव्रताम् ।
अग्निहोत्रे च सत्ये च दमे च सततं रताम् ।
अलभद्गौतमी पुत्रमश्वत्थामानमौरसम् । [5]
भीमविक्रमकर्माणमादित्यसमतेजसम् ।
पुत्रेण तेन प्रीतोऽहं भरद्वाजो यथा मया ।
गोक्षीरं पिबतो दृष्ट्वा धनिनस्तत्र पुत्रकान् ।
अश्वत्थामारुदद्बालस्तन्मे संदेहयद्दिशः ।
न स्नातकोऽवसीदेत वर्तमानः स्वकर्मसु । [10]
इति संचिन्त्य मनसा तं देशं बहुशो भ्रमन् ।
विशुद्धमिच्छन्गाङ्गेय धर्मोपेतं प्रतिग्रहम् ।
अन्तादन्तं परिक्रम्य नाध्यगच्छं पयस्विनीम् ।
अथ पिष्टोदकेनैनं लोभयन्ति कुमारकाः ।
पीत्वा पिष्टरसं बालः क्षीरं पीतं मयापि च । [15]
ननर्तोत्थाय कौरव्य हृष्टो बाल्याद्विमोहितः ।
तं दृष्ट्वा नृत्यमानं तु बालैः परिवृतं सुतम् ।
हास्यतामुपसंप्राप्तं कश्मलं तत्र मेऽभवत् ।
द्रोणं धिगस्त्वधनिनं यो धनं नाधिगच्छति ।
पिष्टोदकं सुतो यस्य पीत्वा क्षीरस्य तृष्णया । [20]
नृत्यति स्म मुदाविष्टः क्षीरं पीतं मयाप्युत ।
इति संभाषतां वाचं श्रुत्वा मे बुद्धिरच्यवत् ।
आत्मानं चात्मना गर्हन्मनसेदं व्यचिन्तयम् ।
अपि चाहं पुरा विप्रैर्वर्जितो गर्हितो भृशम् ।
परोपसेवां पापिष्ठां न च कुर्यां धनेप्सया । [25]
इति मत्वा प्रियं पुत्रं भीष्मादाय ततो ह्यहम् ।
पूर्वस्नेहानुरागित्वात्सदारः सौमकिं गतः ।

76

K4 N B D T2 G1 4 5 ins after 1 122. 47 G2, after 41[ab]

अभ्ययास्स ततो द्रोणं धनुर्वेदचिकीर्षया ।
शिक्षाभुजबलोद्योगैस्तेषु सर्वेषु पाण्डव ।
अस्त्रविद्यानुरागाच्च विशिष्टोऽभवदर्जुनः ।
तुल्येष्वस्त्रप्रयोगेषु लाघवे सौष्ठवेषु च ।
सर्वेषामेव शिष्याणां बभूवाभ्यधिकोऽर्जुन । [5]
